

# नाट्यशास्त्रं सौन्दर्यशास्त्रं च

**COURSE CODE: M23SN07DC**

Discipline Core Course

Postgraduate Programme

Sanskrit Language and Literature

SELF LEARNING MATERIAL

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# नाट्यशास्त्रं सौन्दर्यशास्त्रं च

Course Code: M23SN07DC

Semester - II

## Discipline Core Course
## Postgraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SGOU

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# नाट्यशास्त्रं सौन्दर्यशास्त्रं च

**Course Code: M23SN07DC**

**Semester - II**

**Discipline Core Course**

**MA Sanskrit Language and Literature**

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-971228-3-5

# DOCUMENTATION

## Academic Committee

Dr. Shyla C.A.
Prof. M. S. Muraleedharan Pillai
Dr. J.P. Prajith
Dr. N.K. Sundareswaran
Dr. Chandrashekaran Nair
Prof. C.S. Sasikumar
Dr. K. M. Sangameshan
Dr. Sreejith T.G.
Dr. K.Unnikrishnan

## Development of the Content

Dr. Vijayarajan K.U.

## Review

Content : Dr. Saritha Maheswar
Format : Dr. I.G. Shibi
Linguistics : Dr. Saritha Maheswar

## Edit

Dr. Saritha Maheswar

## Scrutiny

Dr. Vijayarajan K.U.

## Co-ordination

Dr. I.G. Shibi and Team SLM

## Design Control

Azeem Babu T.A.

## Cover Design

Jobin J.

## Production

August 2024

## Copyright

© Sreenarayanaguru Open University 2024

YouTube

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The university aims to offer you an engaging and thought-provoking educational journey. The postgraduate programme in Sanskrit offers a special mix of language and literature studies. While the programme covers various aspects of Sanskrit literature and provides the necessary credits, its main goal is to help learners better understand how different types of literature connect with society. We have also made sure to introduce learners to the newest developments in Sanskrit literature. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.

Warm regards.
Dr. Jagathy Raj V. P. 07-08-2024

**Block - 1** नाट्यशास्त्रसामान्यपरिचयः **1**

**Unit - 1** भारतीयकाव्यशास्त्रम्-काव्यभेदाः-दृश्यम् श्रव्यम्-रूपकसाहित्यम्-दशरूपकाणि-नाट्यशास्त्रग्रन्थाः **2**

**Unit - 2** भरतस्य नाट्यशास्त्रम् - नाट्यशास्त्रे प्रस्तुताः विषयाः **14**

**Unit - 3** विभवाः-स्थायिभावाः-अनुभावाः-व्यभिचारिणः-सात्विकभावाः **24**

**Unit - 4** रसचर्चा-उत्पत्तिवादः लोल्लटः, अनुकरणवादः श्रीशङ्कुकः, भुक्तिवादः भट्टनायकः, अभिव्यक्तिवादः अभिनवगुप्तः **31**

**Block - 2** नाट्योत्पत्तिः **40**

**Unit - 1** नाट्यशास्त्रप्रारम्भः। नाट्यशास्त्रम् प्रथमाध्यायः-प्रथमश्लोकात् **41**

**Unit - 2** नाट्यविषये समस्याः **46**

**Unit - 3** नाट्यप्रयोगः **57**

**Unit - 4** नाट्यगृहविशेषः **68**

**Block - 3** रसविकल्पः **76**

**Unit - 1** नाट्यशास्त्रस्य रसाध्याये नाट्यसंग्रहः **77**

**Unit - 2** रसचर्चा **102**

**Unit - 3** शान्तरसनिरूपणम् **146**

**Block - 4** रससिद्धान्तनिरूपणम् **162**

**Unit - 1** लोल्लटस्य उत्पत्तिवादः तथा श्रीशङ्कुकस्य अनुमितिवादः **163**

**Unit - 2** भट्टनायकस्य भुक्तिवादः खण्डनं च **177**

**Unit - 3** अभिनवगुप्तस्य अभिव्यक्तिवादः **185**

**Model Question Paper (SET – A)** **190**

**Model Question Paper (SET – B)** **192**

# नाट्यशास्त्रसामान्यपरिचयः

# BLOCK 1

SGOU

UNIT 1

# भारतीयकाव्यशास्त्रम् -काव्यभेदाः - दृश्यम् श्रव्यम् - रूपकसाहित्यम् दशरूपकाणि नाट्यशास्त्रग्रन्थाः

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

भारतीयपरम्परा – भारतीय-नाट्यशास्त्रस्योत्पत्तिविषये महामुनिना भरतेन स्वीयनाट्यशास्त्रे उल्लिख्यते यद् देवानां प्रार्थनाम् उररीकृत्य ब्रह्मा चतुर्वेदाङ्गसम्भवं सर्ववर्णरुचिकरं पञ्चमं वेदं नाट्यशास्त्रं नाट्यवेदं वा प्रणिनाय । स वेदचतुष्टयाद् नाट्यशास्त्रोपयुक्तं तत्त्वचतुष्टयं जग्राह। ऋग्वेदात् पाठ्यम्, सामवेदाद् गीतम्,यजुर्वेदाद् अभिनयम् अथर्वेदाच्च रसतत्त्वम्। एवं पञ्चमो वेदोऽयं नाट्यवेदः सर्ववर्णमनोरञ्जकत्वेन प्रादुरभवत्।

भरतमुनिप्रणीते आदिमग्रन्थे नाट्यशास्त्रे उपलब्धं विवरणं, सम्भवतः निखिलविश्वसाहित्येषु उपलब्धस्य नाट्योत्पत्तेः सर्वाधिकं प्राचीनं विद्यते।

## Keywords

भारतीयकाव्यशास्त्रम्, काव्यभेदाः, नाट्यशास्त्रम्, दशरूपकाणि, नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथि, अङ्कः, ईहामृगः प्रमुखाः आचार्याः, अभिनव भारती, आनन्दवर्धनाचार्यः, उद्भटः, लोल्लटः, शङ्कुकः।

## Discussion

### भारतीयकाव्यशास्त्रम्

साहित्यं इति पदस्य सहितभावः इत्यर्थः

संस्कृतसाहित्ये काव्यानामद्वितीयं स्थानमस्ति। । ततः साहित्यं नाम किमिति चिन्त्यताम्। साहित्यं इति पदस्य सहितभावः इत्यर्थः।तत्र शब्दार्थयोः सहितभावः एव साहित्यं इति उच्यते।

### काव्यभेदाः

कवेः कर्म काव्यम् इति काव्यकर्मस्य व्युत्पत्तिः

कवेः कर्म काव्यम् इति काव्यपदस्य व्युत्पत्तिः। गद्यरूपेण पद्यरूपेण वा रसप्रकाशनपरतया प्रयुक्तानि वाक्यान्येव काव्यमिति उच्यन्ते । काव्यं दृश्यं श्रव्यश्चेति द्विधा विभज्यते । श्रवणयोग्यं काव्यं श्रव्यकाव्यम्। दर्शनयोग्यं काव्यं दृश्यकाव्यञ्च । दृश्यकाव्यानां श्रवणयोग्यत्वमप्यस्ति। रघुवंशादीनि श्रव्यकाव्यानि, शाकुन्तलादीनि दृश्यकाव्यानि च। दृश्यकाव्यानां रङ्गमञ्चेऽभिनयद्वारा आविष्कारेणैव दर्शनयोग्यत्वसिद्धिः। तेनैव तस्य रूपकमिति नामाप्यस्ति। रङ्गे नटैः चतुर्विधाभिनयद्वारा यत्प्रयुज्यते तदेव रूपकम्। रूपकेष्वन्यतमं प्रमुखञ्च भवति नाटकम्। नटेषु अनुकार्यपुरुषाणां (कथापात्राणां) रूपं आरोप्यत इत्यत नाटकादीनां रूपकसंज्ञा। तदुक्तं “तद्रूपारोपात्तु रूपकम्”। (सा.द. 6 .1) इति साहित्यदर्पणकारेण विश्वनाथाचार्येण, “रूपकं

तत्समारोपात् दशधैव रसाश्रयम्।।"। (दशरूपकं 1.7) इति दशरूपककारेण धनञ्जयेन च । रूपकाणि मुख्यतया दशधा विभज्यन्त इत्यपि वयमत्र पश्यामः। नाट्यविषये परमप्रामाणिको भवति नाट्यशास्त्रकारो भरतमुनिः। नाट्यशास्त्रस्य प्रामाण्यं ज्ञातुं एतदेव पर्याप्तं भवति यत्, रूपकाणां रचनाविषये भरतमुनेः सिद्धान्तानां व्यतिक्रमः न केनाऽप्यङ्गीक्रियते। भासनाटकेषु भरतमुनेः सिद्धान्तानां निष्कर्षतयाऽवलम्बनं न दृश्यत इत्यस्मात्, भासः भरतात्पूर्ववर्तीति मन्यत इत्यस्माभिर्दृष्टञ्च।

नाट्यविषये परमप्रामाणिको भवति नाट्यशास्त्रकारो भरतमुनिः।

काव्येषु तज्जीवातुभूतस्य रसस्योत्पत्तिमधिकृत्य **"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"** (ना. शा. 6.32) इति भरतमुनिना प्रोक्तं रससूत्रम्। अद्यापि, न केवलं नाटकस्य, अपि तु समस्तस्यापि साहित्यप्रपञ्चस्य मार्गनिर्देशकं निकषायमाणञ्च विराजते। भरतमुनेः नाट्यशास्त्रे नाट्यस्योत्पत्तिं प्रति प्रतिपादितमस्ति।

**"जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।**

**यजुर्वेदादभिनयान् रसानथर्वणादपि ।।**"(ना. शा.1.17) इति ।

दृश्यकाव्यं रूपकमिति नाम्ना व्यवह्रीयते।

दृश्यकाव्यं रूपकमिति नाम्ना व्यवह्रियते। नाट्यशास्त्रानुरोधेन, रूपकाण्यधिकृत्य धनञ्जयेन विरचितः ग्रन्थःभवति दशरूपकम्। दशरूपकात्पूर्वं, भरतमुनेः नाट्यशास्त्रादन्यो ग्रन्थः रूपकशास्त्रे नोपलभ्यते। ततो धनञ्जयकृतस्य दशरूपकस्य सुमहत्स्थानमस्ति साहित्यशास्त्रे। नाट्यशास्त्रं न केवलं नाटकविषये नापि वा रूपकाणां विषये, अपि तु नृत्तनृत्यगीतवाद्यादिविषयेषु सर्वत्रापि सर्वव्यापिना प्रभावेण विराजते। अतिविपुले तस्मिन् शास्त्रग्रन्थे जनानां प्रवृत्तिः क्लेशकारिण्यासीत्। तदानीं धनञ्जयः रूपकेषु

दशरूपकम्- रूपकाणां वर्णन-विश्लेषण-व्याख्यार्थं विरचितं नाट्यशास्त्रटीका

औत्सुक्यं भजतां जनानां कृते दशरूपकाख्यस्य, स्वग्रन्थस्य रचनामकरोत्। रूपकाणां लक्षणप्रतिपादनपरतया दशविधरूपकाणां विवृर्तिं करोतीत्यतः 'दशरूपकम्' इति अन्वर्थसंज्ञाऽस्य ग्रन्थस्य । दशरूपककारः धनञ्जयः विष्णुनामकस्य पुत्रः भवति। धनञ्जयः माल्वायाः परमारवंशीयस्य राज्ञो मुञ्जस्य सदस्यः आसीत्। एतद् धनञ्जयेनैव स्वग्रन्थस्यान्ते प्रतिपादितमस्ति। मुख्यतया अनुष्टुप् छन्दसि रचितोऽयं ग्रन्थः अतीवसरलः। अस्याध्ययनेन च निःसंशयं वक्तुं शक्यते यदयं ग्रन्थः रूपकाणां वर्णन-विश्लेषण-व्याख्यार्थं विरचिता नाट्यशास्त्रटीका भवतीति ।

दृश्यं दर्शनीयप्रधान्यमभिनयं भवति।

दृश्यं दर्शनीयप्राधान्यमभिनेयं भवति। अभिनययोग्यमिति दृश्यकाव्यम्। रूपाणां रामादिस्वरूपाणाम् आरोपात् वेषाभिनयाभ्यां तदारोपस्य वोधनात् रूपकमुच्यते। रूपकाणि दश।

**नाटकमथ प्रकरणं भाणः प्रहसनं डिमः ।**
**व्यायोगसमवकारवीथ्यङ्केहामृगाः मताः ।। इति ।**

नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथि, अङ्कः, ईहामृगः इति दशरूपकाणि।

**१. नाटकम्**

रूपकाणां सम्पूर्णं लक्षणं नाटकम् एव विद्यते।

रूपकाणां सम्पूर्ण लक्षणं नाटके एव विद्यते। नाटके नानारसानां अङ्गाङ्गिभावेन प्राचुर्य वर्तते। नाटकस्य प्रारंभः परिसमाप्तिश्च मङ्गलपूर्वको भवितव्य इति व्यवस्था वर्तते। नाटकारंभे रङ्गविघ्नोपशमाय नान्दी कार्या। नाटकान्ते विश्वशान्त्याशंसापूर्वकं आशंसावाक्यं भवति भरतवाक्यम्। नटे' क्रियमाणेन चतुर्विधाभिनयेन सहेव नृत्यगीतवाद्यरूपस्य तौर्यत्रिकस्य च समञ्जससन्निवेशोऽपि नाटके विद्यते। नाटकं ख्यातवृत्तं स्यात्। पञ्चसन्धिसमन्वितं भवेत्। आधुनिकाः नाटकं कविकल्पितवृत्तम् इति। पञ्च वा पञ्चाधिकाः वा अङ्काः, प्रख्यातवंशः, धीरोदात्तः, प्रतापवान्, दिव्यः, दिव्यादिव्यः, गुणवान् नायकः भवेत्। श्रृङ्गारः, वीरो वा अङ्गी रसः स्यात्।

काव्येषु नाटकं रम्यम्।

एवं नाटके नानारूपाणां कलानामास्वादनायाप्यवसरो विद्यत इत्यतः काव्येषु नाटकं रम्यम् इति सहृदयसम्मतिरजायत। कालिदासस्य अभिज्ञानशाकुन्तलम् उदाहरणम्।

**२. प्रकरणम्**

कथावस्तु कविकल्पितं लौकिकं च भवेत्। धीरप्रशान्तो नायकः ब्राह्मणः, अमात्यः, वणिक् वा भवेत्। नायिका कुलस्त्री गणिका च। नायिकाभेदानुसारेण प्रकरणस्य त्रैविध्यम् - नायिका कुलस्त्री चेत् शुद्धप्रकरणम्, गणिका चेत् विकृतप्रकरणम्, उभेऽपि नायिके चेत् सङ्कीर्णप्रकरणञ्च। अङ्गीरसः श्रृङ्गारः। पञ्चाधिका दशपराः अङ्ङ्काः। मृच्छकटिकम्, मालतीमाधवमादिः उदाहरणम् ।

**३. भाणः।**

भाणः - एकाङ्ङ्कः

एकाङ्ङ्कः। कश्चन बुद्धिमान् द्यूतकरः, चोरः, धूर्तः, विटो वा नायकः। आत्मना अन्यैर्वा कृतं उपवर्णयति इत्येवंरूपो भवति भाणः। नटः स्वस्य अन्यानां चानुपमवर्णनं करोति। उक्तिप्रत्युक्तिरीत्या आकाराभाषितद्वारा सम्बोधनादिभिः क्रियन्ते। श्रृङ्गारो वीरो वा मुख्यः रसः। भाणे दश लास्याङ्ङ्गान्यपि प्रयुज्यन्ते। वररुचेः उभयाभिसारिका प्रसिद्धः भाणः ।

**४. प्रहसनम्**

प्रकृष्टं हसति इति प्रहसनम्

हास्यरसप्रधानम् रूपकं भवति प्रहसनम्। कविकल्पितमितिवृत्तम्। प्रकृष्टं हसति इति प्रहसनम् । विष्कम्भप्रवेशकरहितम्। प्रहसन्स्य शुद्ध, वैकृतं, सङ्करं चेति त्रयः प्रकाराः सन्ति। पाखण्डिनः, विप्राः, चेटचेटीविटादयश्च अस्मिन् प्राचुर्येण भवेयुः। तेषां चरितेः, वेषभाषादिभिश्च सङ्कुलं हास्यप्रधानञ्चापि भवति शुद्धम् प्रहसनम् । कामुकादीनां वचोवेषादिकं स्वीकृतवतां नपुंसक कञ्चुकि तापसादीनां चरितैर्युक्तं भवति वैकृतं प्रहसनम् । वीथ्याख्यास्याङ्गैः मिश्रितं धूर्तसङ्कलं च भवति सङ्कीर्णम् । महेन्द्रविक्रमस्य मत्तविलासप्रहसनं प्रहसनस्योदाहरणम्।

५. डिमः

प्रख्यातेतिवृत्तः - डिमः

प्रख्यातेतिवृत्तः । चतुरङ्ङ्कः। रौद्ररसः अङ्गी। अन्ये रसाः अङ्गाः। उद्धतनायकाः, देवगन्धर्वयक्षरक्षोरगादयः षोडश नायकाः। मायाभिः, इन्द्रजालैः, सङ्ग्रामैः, क्रोधोद्भ्रान्तादिचेष्टितैः, चन्द्रसूर्यग्रहणादिदृश्यैश्च व्याप्तं भवति इदम् रूपकम् । वि. राघवस्य प्रतापरुद्रविजयम्, रासाख्यकवेः मन्मथोन्मथनम् च उदाहरणे।

६. व्यायोगः

व्यायुज्यन्ते बहवः पुरुषाः अस्मिन्निति व्यायोगः।

व्यायुज्यन्ते बहवः पुरुषाः अस्मिन्निति व्यायोगः। पुराणेतिहासादिप्रसिद्धं वृत्तं अस्य इतिवृत्तं स्यात् । एकाङ्कः स्वल्पस्त्रीजनसंयुतः बहुपुरुषपात्रता च स्यात्। प्रख्यातः, राजर्षिः, दिव्यः धीरोदात्तः च नायकः भवेत्। श्रृङ्गारहास्यशान्तभिन्नाः रसाः। भासस्य मध्यमव्यायोगः उदाहरणम् ।

७. समवकारः

समवकीर्यन्ते अर्थाः अस्मिन्निति समवकारः। देवासुराश्रयं प्रसिद्धेतिवृत्तं समवकारे। त्रयः अङ्काः । प्रख्याताः देवमानयाः द्वादशनायकाः उदात्ताः। मुख्यो रसः बीरः। अन्ये रसाः अपि अङ्गाः। भासस्य पञ्चरात्रन् उदाहरणम् ।

८. वीथिः

वीथिः एकपात्रप्रयोजिता

वीथी एकपात्रप्रयोजिता। वोध्यामेकाङ्को भवेत्। आकाशभाषितैः चित्रां प्रत्युक्तिमाश्रितः नटः श्रृंगारो हि अड्ङ्गी रसो भवति, अन्येषां रसानामपि स्पर्शः स्यात् । माधवीवीथी उदाहरणम् ।

९. अङ्कः

उत्सृष्टिकाङ्का इति नामान्तरेण प्रसिद्ध रूपकं भवति अङ्कः। नाटकाद्यङ्कात् भेदः प्रदर्शयितुं उत्सृष्टिकाङ्का इति नामान्तरं उपयुज्यते। एकाङ्कः। प्रकृताः नराः नायकाः। प्रख्यातमितिवृत्तम्। स्थायीरसः करुणः। स्त्रीणां विलाप भवेत्। युद्धं जयपराजयां च वाचा अत्र प्रकाश्यन्ते। भासस्य ऊरुभङ्गम्,कर्णभारम् च उदाहरणम् ।

२०. ईहामृगः ।

मृगवदवलभ्यां नायिकां नायकोऽस्मिन्नीहते इतीहामृगः। ख्यातं कल्पितं किञ्चित् इतिवृत्तम्। चत्वारो अङ्काः। संकर्षसंकुलं कथानकम्। देवमानवयोः एकस्य नायकत्वे, अपरः प्रतिनायकः कार्यः। उभावपि इतिहासप्रसिद्धो धीरोद्धतो भवितव्यो । प्रतिनायकः युद्धिविपर्यासादेव अनुचितकर्मसु व्याप्तो भवति। वत्सराजस्य रुक्मिणीहरणम् उदाहरणम् ।

मृगवदवलभ्यां नायिकां नायकोऽस्मिन्नीहते इतीहामृगः

**नाट्यशास्त्रीयाः प्रमुखा आचार्याः तेषाञ्च ग्रन्थाः-**

अचार्याः बहवः श्रूयन्ते भरतमुनिप्रणीतस्य नाट्यशास्त्रस्य टीकाकाराः। तेषामुल्लेखोऽपि लभ्यते नैकेषु नाट्यशास्त्रीयग्रन्थेषु। किन्त्वभिनवभारतीं विहाय न कापि टीकाऽधुनोपलब्धा। अभिनवगुप्तपादाचार्योऽस्मिन्नभिनव भारत्यां भट्टोद्भटभट्टलोलट- भट्टनायक शङ्कुक कीर्तिधर भट्टयन्त्रप्रभृतीनां व्याख्याकाराणामुल्लेख विदधाति। शाङ्गदेवः स्वकीये सङ्गीतरत्नाकरे प्रायश एतेषामेवाचार्याणां स्मरणं नाट्यशास्त्रव्याख्याकृद्रूपेण करोति।

**व्याख्यातारो भारतीये लोल्लटोद्भटशङ्कुकाः।**
**भट्टाभिनवगुप्तश्च श्रीमत्कीर्तिधरोऽपरः । (१.१९)**

1. उद्भटः- आचार्योऽभिनवगुप्तपादोऽभिनवभारत्यां भट्टोद्भटस्य मतमुल्लिखति । आचार्यः आनन्दवर्धनोऽपि ध्वन्यालोकेऽमुं स्मरति। उद्भटः कश्मीरनरेशस्य जयादित्यस्य सभापण्डित आसीत्। राजतरङ्गिणीकारः कल्हणः सूचयति यत् राजा जयादित्यः प्रतिदिनमुदभटायैकलक्षस्वर्णमुद्रां (दीनारमिति) वेतनरूपेण प्रददाति स्म। जयादित्यस्य शासनकाल: 779-813 खि०व. आसीत्। अतोऽयमेव स्थितिरस्य (अष्टमख्रिष्टाब्दः) उद्भटस्यापि। उद्भटकृता नाट्यशास्त्रस्य टीका नोपलभ्यते। आचार्योऽभिनवगुप्तपादः भट्टोद्भटं रससूत्रस्य व्याख्याकारं मन्यते।

उद्भटः – रससूत्रस्य व्याख्याकारः

2.भट्टलोल्लटः-भट्टलोल्लटकृतां रससूत्रव्याख्याम् अभिनवभारती काव्यप्रकाशश्च पुरस्कुरुतः। अभिनवभारत्यां नैकस्थलेषु भट्टलोल्लटस्य मतानि समुल्लिखितानि। आचार्य हेमचन्द्रः स्वीये काव्यानुशासने भट्टलोल्लटस्य द्वे पद्ये समुद्धरति। अयं नाट्यशास्त्रस्य टीकाकृद्रूपेण स्मर्यते किन्त्वनेन कृता टीका

भट्टलोल्लटः उद्भटस्य मतं खण्डितवान्।

नोपलब्धा।भट्टलोल्लटो भट्टोद्भटस्यैकं मतं खण्डितवान्। अतोऽयं तस्य परवर्ती नवमक्रिस्त्वब्दे इति मन्यते।

शङ्कुकः रससूत्रस्य व्याख्याकारः

3.भट्टशङ्कुकः-आचार्यशङ्कुकोऽपि भारतीयरससूत्रस्य व्याख्याकारः। अभिनवभारत्यां काव्यप्रकाशे चास्य रससूत्रव्याख्या समुद्धृता। अयं भट्टलोल्लटस्य परवर्ती। नवम ख्रिष्टशताब्दी अस्यापि स्थितिकालः। अभिनवभारत्यां नैकस्थानेषु शङ्कुकस्य मतानि समुल्लिखितानि। कश्मीरदेशीयस्यास्यापि नाट्यशास्त्रटीका नोपलभ्यते।

4. भट्टनायकः - भट्टनायकः कश्मीरनरेशस्याऽवन्तिवर्मण आश्रितकविरासीत्। अस्य स्थितिकालो नवमखिष्टशताब्दस्योत्तरार्धमासीत्। अयमपि भरतप्रणीतनाट्यशास्त्रस्य टीकाकार इति प्रसिद्धिर्वर्तते, किन्तु सा टीका सम्प्रति नोपलभ्यते। भारतीयरससूत्रस्य व्याख्याकारेषु भट्टनायकोऽग्रगण्यः। अभिनवभारत्यां काव्यप्रकाशे चास्मिन् प्रकरणेऽस्य रससूत्रव्याख्या सङ्कलिता वर्तते। स्वोपज्ञव्याख्यायां

भट्टनायकः भोगसिद्धान्तं स्थापितवान्।

भट्टनायको लोल्लटस्य, शङ्कुकस्याभिनवगुप्तस्य चापि रसनिष्पत्तिसिद्धान्तं खण्डयित्वा स्वकीयं भोगसिद्धान्तं स्थापितवान्। अभिनवगुप्तोऽपि भट्टनायकस्य सिद्धान्तं निराकृतवान्। अयं भट्टनायको रसस्य साधारणीकरणसिद्धान्तं प्रवर्तितवान्। भट्टनायको हृदयदर्पणग्रन्थस्य कर्तेति प्रसिद्धिरस्ति।

**अभिनवगुप्तपादाचार्यः- साहित्य-दर्शन-तन्त्रादिशास्त्राणां परमाचार्यः**

अभिनवगुप्तः – साहित्य-दर्शन-तन्त्रादिशास्त्राणां परमाचार्यः।

श्रीमदभिनवगुप्तपादो मूलतः कान्यकुब्जनिवासी पश्चाच्च कश्मीरदेशीयोऽभूत्। अस्य पूर्वजमत्रिगुप्तं कश्मीरनरेशो ललितादित्यो यो कान्यकुब्जनरेशं यशोवर्माणं पराजितवान्, तं कश्मीरमानीतवान्। अभिनवगुप्तपादस्य पितामहो वराहगुप्तः, पिता नरसिंहगुप्तः, पितृव्यो वामनगुप्त आसन्। अस्योपाध्यायानां भूयसी येषु साक्षाद्गुरुरासील्लक्ष्मणनाथः। शेषाः परम्परया गुरव आसन्। नाट्यशास्त्रेऽस्य गुरुर्भट्टतौतः काव्यशास्त्रे च भट्टेन्दुराजः । व्याकरणे पिता नरसिंहगुप्तस्तन्त्रशास्त्रे श्रीशम्भुनाथः, त्रिकदर्शने प्रत्यभिज्ञादर्शने शैवदर्शने च क्रमशो गुरव आसन् सोमानन्दः, उत्पलाचार्यः, लक्ष्मणगुप्तश्च। अयं

चत्वारिंशत् ग्रन्थानां प्रणेता। अस्य स्थितिकालोऽस्ति दशमखिष्टशताब्दी।

अभिनवगुप्तः नाट्यशास्त्रस्य काव्यशास्त्रस्य च परमाचार्यः। तेन विरचिता नाट्यशास्त्रग्रन्थमधिकृत्य टीका अस्ति। 'अभिनव भारती' तथा चानन्दवर्धनविरचितध्वन्यालोकस्य टीका 'ध्वन्यालोकलोचनम्', नाट्यशास्त्रे काव्यशास्त्रे चास्य कीर्तिं परां कोटिं नयतः। एतौ द्वौ टीकाग्रन्थौ नाऽपितु भाष्यग्रन्थौ, अनुभूयते यदेतौ विना तौ मूलग्रन्थावपूर्णाविव। अभिनव-भारतीमाध्यमेनानेन नाट्ये शान्तरसस्य स्थापना कृता। काव्यशास्त्रेऽभिनवगुप्तपाद आनन्दवर्धनस्यानुयायी ध्वनिसिद्धान्तस्य पोषकः। रसनिष्पत्तिविषयकसिद्धान्तेषु 'अभिव्यक्तिवाद' इति ख्यातमस्य मतम् ।

अभिनवगुप्तः – अभिनवभारती ध्वन्यालोकलोचनम् च।

धनञ्जयो धनिकश्च-एतौ द्वौ विष्णोः सुतौ सहोदरौ नाट्याचार्यौ कवी च। धनञ्जयो दशरूपकं नाम ग्रन्थं विरचितवान् यो भरतमुनिकृतं नाट्यशास्त्रमनुसरति । धनिकस्तं ग्रन्थमवलोकवृत्त्या सनाथं कृतवान्। धनञ्जयो धारानरेशस्य मुञ्जस्य (वाक्पतिराजस्य) राजकविरासीत्। अतोऽस्य स्थितिकालः दशमखिष्टशताब्दोऽस्ति ।

धनञ्जयः दशरूपकं नाम ग्रन्थं रचितवान्।

एतदतिरिक्तं, भोजदेव हेमचन्द्र विद्यानाथ विश्वनाथप्रभृतय आचार्याः स्वकीयेषु काव्यशास्त्रीयग्रन्थेषु नाट्यशास्त्रीय-विषयाणामप्युपन्यासं कृतवन्तः। आचार्यविश्वनाथ-कविराजकृते साहित्यदर्पणे तृतीये षष्ठे च परिच्छेदे नाट्यशास्त्रस्य प्रायः सर्वाणि तत्त्वानि वर्णितानि सन्ति। अत एव साहित्यदर्पणो महदुपयोगी वर्तते।



SGOU

## Summarised Overview

गद्यरूपेण पद्यरूपेण वा रसप्रकाशनपरतया प्रयुक्तानि वाक्यान्येव काव्यमिति उच्यन्ते । काव्यं दृश्यं श्रव्यञ्चेति द्विधा विभज्यते । श्रवणयोग्यं काव्यं श्रव्यकाव्यम्। दर्शनयोग्यं काव्यं दृश्यकाव्यञ्च । दृश्यकाव्यं रूपकमिति नाम्ना व्यवह्रियते। दृश्यकाव्यानां रङ्गमञ्चेऽभिनयद्वारा आविष्कारेणैव दर्शनयोग्यत्वसिद्धिः। तेनैव तस्य रूपकमिति नामाप्यस्ति। नाट्यविषये परमप्रामाणिको भवति नाट्यशास्त्रकारो भरतमुनिः। "विभावानु-भावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" (ना. शा. 6.32) इति भरतमुनिना प्रोक्तं रससूत्रम्। अद्यापि, न केवलं नाटकस्य, अपि तु समस्तस्यापि साहित्यप्रपञ्चस्य मार्गनिर्देशकं निकषायमाणञ्च विराजते। नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथि, अङ्कः, ईहामृगः इति दशरूपकाणि। नाट्यशास्त्राचार्याणां व्यक्तित्वं कर्तृत्वञ्चापि मितैर्वाक्यैः प्रस्तुतम्।

## Assignments

1. भारतीयकाव्यशास्त्रस्य सविशेषतां विशदीकुरुत।
2. दृश्यं श्रव्यमिति काव्यम् – विशदयत।
3. रूपकम् नाम किम् दशरूपकाणि विशदयत।
4. नाट्यशास्त्रग्रन्थान् प्रति टिप्पणीं लिखत।

## Suggested Readings


1. Bharata Muni, Natyasastra, Edited by Manomohan GhoshChoukhamba Sanskrit Series Office, Varanasi,reprint 2017
2. Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971
3. Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971
4. Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

# References


1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2. Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice,MotilalBanarasidass Publishers, Delhi.1924


SGOU

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# UNIT 2

# भरतस्य नाट्यशास्त्रम् - नाट्यशास्त्रे प्रस्तुताः विषयाः

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

संस्कृतसाहित्यजगति साहित्यान्तरमिव रूपकसाहित्यमपि सुसमृद्धं विद्यते। तत्र तस्य हि स्वकीया एव विशिष्टपरम्परा। लोकप्रियतादृष्ट्या काव्येषु रूपकसाहित्यस्य प्रथमं स्थानम्। तस्य हि त्रयाणामेवाङ्गानां नाट्यनृत्यवाद्यानां वैदिकयुगात्प्रागेवप्यस्तित्वं आसीत् इति वेदे पुरूरवोर्वशीसूक्ते , यमयमीसूक्ते च द्रष्टुं शक्यते। इत्थं हि वैदिककाले समुप्तं नाट्यबीजं रामायणकाले तथा महाभारतकाले च समुद्गतं दृश्यते। पुराकालादारभ्य प्रवर्तमानानि नाट्याभिनयकर्माणि निरीक्ष्य तन्नियमनाय सिद्धान्तसूत्राणि ग्रथितानि । एतत्कर्मव्याप्तेषु तेष्वाचार्येषु नाट्याचार्यो भरतमुनिः प्राथम्यं भजते । आचार्यभरतमुनिना प्रणीतमुपदिष्टं वा 'नाट्यशास्त्रम्' अद्यापि सर्वव्यापकत्वात्पञ्चमो वेद इति संज्ञयालङ्कृतं भवति। भरतमुनिना रचितस्य नाट्यशास्त्रस्य परिचयं प्राप्नुमः।

## Keywords

पञ्चमो वेदः, भरतमुनिः, नाट्यशास्त्रस्य प्रयोजनं, षड्त्रिंशत् अध्यायाः, प्रतिपाद्यविषयाः, रसनिष्पत्तिः, नाट्योत्पत्तिः, नाट्यधर्मी, पञ्चसन्धिः, अभिनयः, सङ्गीतोपकरणानि।

## Discussion

नाट्यशास्त्रम् पञ्चमवेदत्वेन ज्ञायते।

संस्कृतसाहित्ये नाट्यशास्त्रस्यातीव महत्त्वं प्राथितमेव नाट्यशास्त्रस्योपजीव्यत्वमेवास्य महत्त्वम्। नाट्यशास्त्रं स्वमहत्त्ववशादेव पञ्चमो वेद इति कथितम्। नाट्यशास्त्रमाधारीकृत्य नाट्याभिनयरसविषयका बहवो ग्रन्था विरचिताः। भरतमुनिकृतं 'रससूत्रम्' न केवलं नाट्यशास्त्रं काव्यशास्त्रमपि भृशमुपकरोति । रससूत्रस्वरूपोपबृंहणं विधायाऽऽचार्यैः नैके नवीना रसा आविष्कृताः। नाट्यशास्त्रमनुशील्य कोऽपि समकालिकी भाषां लोकसंस्कृतिञ्च विज्ञातुमर्हति। नाट्यशास्त्रमेव काव्यशास्त्रस्यापि मूलम्।

**भरतमुनिः**

भरतमुनिः नाट्यशास्त्रस्य कर्ता।

अयं नाट्याचार्यो भरतमुनिः नाट्यशास्त्रस्य प्रणेतेति लोकविश्रुतः। न कोऽप्यस्यापलापं कर्तुमर्हति। अयं भरतमुनिः नाट्यवेदकर्तुः ब्रह्मणः शिष्य आसीत्। ब्रह्मा स्वयमेनं नाट्यवेदं शिक्षितवान्। भरतमुनिरेव नाट्यवेदं संक्षिप्य लोकोपयोगिनं षट्सहस्रमयं नाट्यशास्त्रं निर्मितवान्। गुरोः ब्रह्मणो नाट्यवेदस्य शिक्षामुपदेशं वाऽधिगम्य स स्वकीयान् शिष्यान् शिक्षितवान्। भरतमुनेः शिष्याणां संख्या शतमित्युल्लिखितं नाट्यशास्त्रे। पुत्रवत्प्रिया एते शिष्या भरतपुत्रा इति ख्याताः।

नाट्यशास्त्रस्य रचनाकालो नैकान्तिकं नात्यान्तिकं वा निर्धारितुं शक्यते। अस्य रचनाकालनिर्धारणमतिदुष्करम्। अस्मिन् विषये केवलमनुमानमेव प्रमाणम्। भारतीयपरम्परानुसारेण, नाट्यशास्त्रस्य प्रणयनं भरतमुनिना कृतम्। किन्तु नैके भरतसंज्ञकाः पुरुषाः प्रथितास्सन्ति

भारतीयेतिहासे। अतः समस्यासमाधाने इयमेका महती बाधा, यस्या निराकरणमधुनाऽपि नास्ति ।

**नाट्यशास्त्रस्य प्रयोजनं महत्वञ्च-**

शासनात् शास्त्रम्।

यथा वयं (नाट्यशास्त्रादेव) जानीमो, देवैः प्रार्थितः पितामहो ब्रह्मा लोकविश्रान्तिजननं नाट्यवेदं विरचितवान्। पुनश्चेन्द्रादिभिः परामृष्टः स तस्य नाट्यवेदस्य धारणाय भरतमुनिमादिदेश। ब्रह्मा स्वयमेव भरतमुनिं नाट्यवेदमुपदिष्टवान् (अध्यापयामास)। एवं नाट्यवेदं संगृह्य भरतमुनिस्तं संक्षिप्य नाट्यशास्त्रं प्रणीतवान्। स्वीयैः पुत्रैः सह नाट्यं प्रयुक्तवान्। एवं वक्तुं शक्यते यन्नाट्यवेदस्यप्रकाशनमेव नाट्यशास्त्रस्य प्रयोजनम्।

कस्यचिदपि कर्मणो मूले तत्प्रयोजनं भवत्येव। अतो प्रयोजनमूलं हि कर्म। अनुबन्धचतुष्टये योऽधिकारी भवति, स एव प्रयोजनस्य हेतुर्भवति। अतोऽधिकारिदृष्ट्या प्रयोजनस्य निर्धारणम् भवति।

अत्र भरतमुनिप्रणीतोऽयं ग्रन्थः शास्त्रमिति सुविदितम्। शासनाच्छास्त्रम्। अत उपदेशपरं हि शास्त्रम्। उपदेशस्य विनियोगः कस्मै कर्तुं युज्यत इति विचार्यैव शास्त्रं प्रवर्तते। नाट्यशास्त्रस्य प्रारम्भ एवास्य प्रयोजनं भरतमुनिना निर्दिष्टम्-

**"नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्।।"** (1.1.) ।

कालिदासः भरतमुनेः कालसामीप्यं भजते।

अभिनवभारत्यामस्याभिप्रायः प्रकटितोऽभिनवगुप्तपादेन- "नाट्यस्य नटवृत्तस्य शास्त्रं शासनोपायं ग्रन्थं प्रवक्ष्यामीति"। अर्थात् नटानां वृत्तमभिनयमाचरणं कर्तव्यं वा, शास्त्रमिदं तदनुशास्ति । नटा नाट्यमर्यादां पालयन्तु, अभिनेतारः पात्राणि स्वेच्छाचारिणो मा भवेयुः (मञ्चे प्रेक्षकाणां समक्षम्) इत्युद्दिश्य नाट्यशास्त्रं प्रणीतम्। अभिज्ञानशाकुन्तलस्य प्रथमाङ्ङ्कारम्भे महाकविः कालिदासः प्रस्तौतीमां शङ्कामेभिर्वचनैः: 44 "सूत्रधारः.............तत् प्रतिपात्रमाधीयतां यत्नः। नटी- सुविहितप्रयोगतयाऽऽर्यस्य न किमपि परिहास्यते। सूत्रधारः- आर्ये, कथयामि ते भूतार्थम्-आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्। बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।

महाकविः कालिदासो भरतमुनेः कालसामीप्यं भजते। स भरतमनुस्मरति नाट्यशास्त्रं चानुसरति। नाट्यशास्त्रस्य भाष्यकारो भट्टनायको प्राह यन्नाट्यस्य प्रयोजनं यथा पुरुषार्थसिद्धिस्तथैव नाट्यशास्त्रस्य प्रयोजनमपि पुरुषार्थोऽथ च मोक्षसिद्धिरेव। 'स्वं स्वं निमित्तमादाय शान्तादुत्पद्यते रसः' इति कारिकांशमुद्धृत्य, "नाट्ये शान्तरस एव मूलरसः" इत्युक्त्वा प्रतिपादयति- 'शान्तरसात् तत्त्वज्ञानं मोक्षस्यावाप्तिरिति प्रयोजनं नाट्यस्य नाट्यशास्त्रस्य च।'

भरतमुनेः नाट्यशास्त्रे षड्त्रिंशत् अध्यायाः सन्ति।

षष्ठोऽध्याये रसनिष्पत्तिः रसनिरूपणम् च

भरतमुनिप्रणीतस्य नाट्यशास्त्रमिति ग्रन्थस्य षड्त्रिंशदध्यायेषु नाट्यविषयाणां नाट्यकलायाश्च विशदं विवेचनमुपलभ्यते। नाट्यविषये यद्यदभिलषितं तत्तत्सर्वमत्र सन्निधत्तं, न किमपि त्यक्तं वा। विश्वनाट्यजगति इदं भारतीयं योगदानममूल्यं कल्पनातीतमविस्मरणीयं च। विश्वस्येतिहासे न कोऽप्येतादृशो नाट्यग्रन्थो यस्मिन् नाट्यकलामधिकृत्यैतावता विस्तरेण, स्पष्टतया, सूक्ष्मतया च विवेचनं कृतं स्यात्। अत्र प्रति-अध्यायं सन्निविष्टं वस्तु संक्षेपतः प्रस्तूयते-

प्रथमाध्याये नाट्योत्पत्तिवर्णनम्, वृत्तित्रयं, वृत्तिचतुष्टयं च आश्रित्य नाट्यप्रयोगप्रारम्भस्य जिज्ञासा। कैशिकी-वृत्तिनिरूपणम्, विधात्रा नाट्यवेदस्य रचना, तस्य प्रयोगः च वर्णयन्ति।

द्वितीये अध्याये त्रिविधप्रेक्षागृहाणां निर्माणविधिः चित्रकर्म-निरूपणम् च।

तृतीये अध्याये नाट्याचार्याणां प्राथमिककर्तव्यम् देवता-र्चनपूजनविधिं च विचार्यते।

चतुर्थे अध्याये 'अमृतमन्थन' नाम्नः समवकारस्य 'त्रिपुरदाह' नाम्नश्च डिमस्य प्रयोगः। ताण्डवनृत्तस्य 108 करणानि, 32 अङ्गहाराः, 4 रेचकाः, गीतादिप्रयोगाश्च।

पञ्चमे अध्याये पूर्वरङ्गस्य विविधान्यङ्गानि।

षष्ठे अध्याये रसनिष्पत्तिः, रसनिरूपणम् च विचार्यते।

सप्तमाध्याये भावान्, विभावानुभावव्यभिचारिभावाः, स्थायिभावाः सात्त्विकभावाश्च प्रतिपादयति।

अभिनयरीतिं वर्णयति अष्टमेऽध्याये। आङ्गिकः, वाचिको, आहार्यः, सात्विकः (मनोव्यापारः) इति चत्वारः अभिनयाः।

शरीराङ्गानाम् अभिनयक्रमं वर्णयति नवमेऽध्याये। शिरसः, नयनयोः, भ्रुवोः, नासिकायाः, ओष्ठयोः, कपोलयोः च चलनादिकं कथमिति सविस्तरं प्रतिपादयति।

उरसः, पार्श्वयोः, उदरस्य, कटिप्रदेशस्य, ऊर्वोः, जङ्घायाः, पादयोः च चलनवैचित्र्यं कियन्मात्रम् आकर्षकं नृत्त-नृत्येषु इति विशदयति दशमेऽध्याये।

एकादशेऽध्याये चारीचलनं विशदयति। एकपादेन क्रियमाणं चलनमेव चारी इत्युच्यते। द्वात्रिंशत् चारिणः सन्ति।

लोकधर्मी नाट्यधर्मी च धर्मो द्विविधः।

द्वादशेऽध्याये द्वयोः धर्मिणोः लक्षणं विस्तारयति। लोकधर्मी नाट्यधर्मी इति धर्मो द्विविधः। यदि नाट्ये पुरुषः स्त्रीभूमिकां स्वीकरोति, स्त्री पुरुषभूमिकां स्वीकरोति तर्हि तदेव नाट्यधर्मी। पुरुषः पुरुषस्य, स्त्री स्त्रियाः वेषं स्वीकरोति तर्हि तद् लोकधर्मी।

त्रयोदशेऽध्याये विभिन्नरीत्या वर्तमानानि पादविन्यासानि वर्णयति। नायिकानायकयोः चलनं वेषभूषादयः रङ्गसज्जीकरणमित्यादीनि अस्मिन्नध्याये विशदयति।

चतुर्दशेऽध्याये भाषाप्रयोगरीतिं, प्रवृत्तिं च विशदयति। पञ्च प्रवृत्तयः। आवन्ती, दाक्षिणात्या, औण्ड्रमागधी, पाञ्चाली, मध्यमा चेति (वृत्तयः)। सर्वाः देशाश्रिताः भवन्ति।

नाटकीयशोभावर्धकान् षड्त्रिंशत् लक्षणानि सप्तदशाध्याये वर्णयन्ति।

पञ्चदशेऽध्याये नाटकेषु सम्भाषणस्य प्राधान्यं संसूच्य नामाख्यातनिपातोपसर्गान् शब्दप्रकारान् तद्धित-समाससन्धिविभक्तीनाम् आवश्यकतां च प्रदर्श्य पारायणद्वैविध्यं विशदयति । अक्षराणां स्वरूपं वर्णयन् धातून् विशदय्य वृत्तशास्त्रस्थानि सम-अर्धसम-विषमवृत्तानि विशदयति।

छन्दशास्त्रस्य विशदीकरणं षोडशेऽध्याये अप्यस्ति। शरीरशोभायै वस्त्रमालाभरणादीनां उपयोग इव काव्यशोभायै वृत्ततालादीनामावश्यकतास्ति। मालिनी-मालती-उद्धता-विद्युल्लेखादीनि वृत्तानि परामृष्टानि।

नाटकीयशोभावर्धकान् भूषण-अक्षरसंघात-शोभा-उदाहरण-हेतु-संशय-दृष्टान्त-प्राप्ति-अभिप्रायादीन् षट्त्रिंशत् लक्षणानि सप्तदशे अध्याये विशदयति ।

अष्टादशे अध्याये प्राकृतिकभाषायाः विशेषताः वर्णयति। कमल-अमल-रेणुतरङ्ग-लोल-सलिलप्रभृतीनि पदानि संस्कृते प्राकृते च समानानि। ऐ-औ-अनुस्वाराः प्राकृते न सन्ति। क ग त द य व प्रभृतयः विनष्टाः।
अपान इति पदं अवाणरूपेण उच्चरति। पुरुष (फरुष) मृग (मौ) मृतः (मौ) इत्येवंरूपेण ।

नाटकेषु उन्नतान् समानान् सेवकादीन् च कथं सम्बोधनां करिष्यति इति कार्यम् ऊनविंशतितमे अध्याये विशदयति। उन्नतान् भगवन् इति, ब्राह्मणः स्वभार्या आर्य इति, राजानं महाराज इति, समानान् नामधेयेन इति विविधरीत्या सम्बोधनां कुर्वन्ति ।

विंशतितमे अध्याये दशरूपकाणि विशदयन्ति।

दशरूपकाणि विंशतितमे अध्याये विशदयन्ति। नाटकं-प्रकरणं-अङ्कः-व्यायोगः-भाणः-समवकारः-वीथी-प्रहसनं-डिमः-ईहामृगः इति दश रूपकाणि।

पञ्चसन्धीनां मुख-प्रतिमुख-गर्भ-सावमर्श-निर्वहणादीनां सविशदं विवरणं एकविंशतितमे अध्याये वर्तते। सात्वती-कौशिकी-भारती-आरभटीवृत्तीनां विशदीकरणमेव द्वाविंशतितमे अध्याये। नेपथ्यं वेषभूषादीन् च विशदयति त्रयोविंशतितमे अध्याये। चतुर्विधाः वेषभूषाः। पुष्ट-अलङ्कार-अङ्गारार्चनं-सञ्जीवाः वेषभूषाः। अङ्गारार्चनं नाम अवयवेषु वर्णलेपनम्। सञ्जीवः जीवयुक्तेन प्राणिना सह प्रवेशः।

सङ्गीतशास्त्रमधिकृत्य अष्टविंशतितमे अध्याये सूचयति।

चतुर्विंशेऽध्याये सामान्याभिनयमधिकृत्य विशदयति। वाचकैः अङ्गैः च क्रियमाणमभिनयमेव सामान्याभिनयः। भावादयः अत्र प्रधानाः। स्त्रीणां भावाविकाराः अलङ्काराः भवन्ति लीला- विलास-विच्छित्ति-विभ्रम-किलकिञ्चित-मोट्टायित-कुट्टमिता-बिष्बोक-ललित-विहता दश। एतेषां सविस्तरा वर्णना अस्मिन्नध्याये सन्ति।

सन्देशवाहकानां स्वभावमहिमां लक्षणादिकं च विशदयति पञ्चविंशतितमेऽध्याये। चित्राभिनयं षट्विंशतितमे अध्याये वर्णयति। सर्वमपि कार्यं, दिनं-रात्रिः-कालाः सूर्यादयः अनेन चित्राभिनयद्वारा चित्रीकर्तुं शक्यते। दैविकी-मानुषी इति सिद्धिद्वयं विशदयति सप्तविंशतितमे अध्याये। वाङ्मयी शारीरी इत्यादयः सत्वाभिनये अन्तर्भवन्ति।

रसनिरूपणवत्प्राधान्यमर्हति नाट्यशास्त्रे सङ्गीतशास्त्रस्य विशदीकरणम्। सङ्गीतोपकरणानां, सङ्गीतस्य सप्तस्वरान् अधिकृत्य विस्तृतं विवरणम् अष्टविंशतितमे अध्याये सूचयति। सङ्गीतोपकरणानि चतुर्धा तत-अवनद्ध-सुषिर-घनभेदात्। स्वरसम्बन्धानि अनेकानि स्वरस्थानानि अस्मिन्नध्याये विवृणोति । स्वर-ग्राम- मूर्च्छन-ताना-स्थान-वृत्ति-साधारण इत्यादीनि सन्ति। तालक्रमाः अपि अनेकप्रकाराः। आवाप-निष्क्रम-विक्षेप-प्रवेशक-शाम्या-ताल-सन्निपात-परिवर्त-वस्तु-मात्रा-विदारी-अङ्ग-लय-यति-प्रकरण-गीति-अवयव-मार्ग पादभाग- पाणि इति विंशतिः तालक्रमाः।

सप्तस्वराः भवन्ति षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादाः। अत्र द्वाविंशतिः श्रुतयः तथा द्विशतसहस्राः स्वरभेदाः। तेषाम् आधुनिकग्रीक्सङ्गीतेन साकं निकटतमः बन्धः वर्तते।

नवविंशतितम् अध्याये सप्तस्वराणां विशदीकरणम्।

सप्तस्वराणां षड्ज-ऋषभादीनां रसादिषु सन्निवेशः कथमिति ऊनत्रिंशत्तमे अध्याये विशदयति। षड्ज-ऋषभ-स्वरौ वीररसपोषणौ, निषाद-गान्धारौ शान्तरसं, धैवतस्वरः अद्भुतरसं, मध्यमपञ्चमस्वरौ हास्यरसपोषणौ च भवन्ति।

सङ्गीतोपकरणेषु सुषिरवाद्यस्य (वेणोः) विशदीकरणं वर्तते। वेणुवादनसमये अङ्गुलीनां चलनेन संजाताः विशेषताः अस्मिन् त्रिंशत्तमे अध्याये विशदयति। वेणुना बहिर्गताः सप्तस्वराः नितान्तं मधुराः रसोद्दीपकाश्च। एवमेव वीणायाम् उद्भवाः स्वराः। प्रायेण अयमध्यायः ह्रस्वः।

तालल‌यादीनधिकृत्य एकत्रिंशत्तमे अध्याये विशदयति। तालादीनां समयक्रमः (निमेष-मात्राक्रमः) वर्तते। लयः तु त्रिधा विभक्तः। द्रुत-मध्यम-विलम्बितभेदात्। कला अपि त्रिविधा।

त्रयत्रिंशत्तमे अध्याये मृदङ्गादीनां विशदीकरणम्।

वृत्तानां विशदीकरणमेव द्वात्रिंशत्तमे अध्याये। अस्य अध्यायस्यारम्भे ध्रुवगीतानि विशदयति। ध्रुवागीतेषु प्रयुक्तमानानि भवन्ति श्रीप्रभृतानि वृत्तानि ।

त्रयत्रिंशत्तमे अध्याये मृदङ्ग-पणव-दर्दुरादीनां विशदीकरणमेव। अपि च झल्लरि-पटहाद्युपकरणान्यपि वाद्योपकरणेषु अन्तर्भवन्ति। विपञ्ची-चित्रा-कच्छपी-घोषकप्रभृतीनां वाद्योपकरणानां प्रयोगः कथमिति विशदति।

नाटकविषये पुनरपि विशदीकरणं वर्तते- नाट्यशास्त्रस्य चतुर्त्रिंशत्तमे अध्याये। कथापात्राणि प्रथमं त्रिधा, उत्तम-मध्यम-अधमभेदात्। जितेन्द्रियः, बुद्धिमान्, कलाकुशलः, करुणावान्, विविधेषु शास्त्रेषु निपुणः, सन्तुष्टचित्तः, क्षमावान् च भवति उत्तमः। जनैः साकं सम्पर्काय निपुणः, कलासु तत्परः, मधुरवाक्, बुद्धिमान् च भवति मध्यमः। परुषवाक्, दुर्विनीतः, आत्माभिमानरहितः, कलहप्रियः, आक्रमशीलः, परद्रोहे कुतुकी, विवेकशून्यः, स्त्रीलम्पटः, चौर्ये व्यापृतः च अधमः। नायकाः चतुर्विधाः धीरोद्धत-धीरललित-धीरोदात्त- धीरप्रशान्तः चेति । पुनः कर्मानुसारमपि विभजनमस्ति।

पञ्चत्रिंशत्तमे अध्याये अभिनेतुं योग्यानां चयनं विशदयति।

पञ्चत्रिंशत्तमे अध्याये नाटकम् अभिनेतुं योग्यानां जनानां चयनं कथं कर्तव्यमिति। कथापात्रस्यानुकूलः भवेत् अभिनेता। अभिनेतुः योग्यता तत्र प्रधानतया परिगणनीया। अभिनेता वयोऽन्वितः सर्वेणापि प्रकारेण कथापात्रस्य अनुयोग्यः भवेत्।

अन्तिमे अध्याये, षट्त्रिंशत्तमे अध्याये, आत्रेयवसिष्ठप्रभृतीनी महर्षीणां भरतमुनिना सह संवादेन आरभते। देवलोके प्रचरितं नाट्यवेदं भूमौ आगतस्य कारणं भरतः विशदयति। नाट्यशास्त्रस्य भूमौ अवतरणं प्रतिपादयति ।

## Summarised Overview

भरतमुनेः नाट्यशास्त्रे षट्त्रिंशत् अध्याये नाट्यस्य सर्वाणि कार्याणि सन्ति। नाट्यशास्त्रं न केवलं नाटकविषये नापि वा रूपकाणां विषये, अपि तु नृत्तनृत्यगीतवाद्यादिविषयेषु सर्वत्रापि सर्वव्यापिना प्रभावेण विराजते। अतः नाट्यशास्त्रं पञ्चमवेदेन ज्ञायते।

नाट्योत्पत्तिः, नाट्यवेदस्य रचना, नाट्यगृहाणां निर्माणविधिः, रसनिष्पत्तिः, अभिनयरीतिः, अभिनयक्रमः, धर्मी, भाषाप्रयोगरीतिः, संभाषणस्य प्राधान्यं, छन्दशास्त्रनिरूपणं, प्राकृतिकभाषायाः विशेषताः, दशरूपकाणि, पञ्चसन्धयः इत्यादि नाट्यसंबन्धीन् सर्वान् विषयान् नाट्यशास्त्रे विचारयन्ति।

## Assignments

1. नाट्यशास्त्रस्य प्रयोजनं महत्त्वं च प्रतिपादयत।
2. नाट्यशास्त्रस्य कर्तृत्वं रचनाकालं च विचारयत।
3. नाट्यशास्त्रस्य प्रथमदशाध्यायेषु प्रतिपादितानि विषयाणि कानि ?
4. नाट्यशास्त्रस्य एकादशाध्यायादारभ्य विंशतिपर्यन्तेषु अध्यायेषु प्रतिपादितानि विषयाणि कानि ?
5. नाट्यशास्त्रे प्रतिपादितानि विषयाणि संगृह्य लिखत।

## Suggested Readings


1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014


## References


1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice,Motilal Banarasidas Publishers, Delhi.1924

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# UNIT 3

# विभावाः-स्थायिभावाः-अनुभावाः-व्यभिचारिणः - सात्विकभावाः

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

नाट्यविषये परमप्रामाणिको भवति नाट्यशास्त्रकारो भरतमुनिः। **"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"** (ना. शा. 6.32) इति भरतमुनिना प्रोक्तं रससूत्रम्। अद्यापि, न केवलं नाटकस्य, अपि तु समस्तस्यापि साहित्यप्रपञ्चस्य मार्गनिर्देशकं निकषायमाणञ्च विराजते। नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथr, अङ्कः, ईहामृगः इति दशरूपकाणि। नाट्यशास्त्राचार्याणां व्यक्तित्वं कर्तृत्वञ्चापि मितैर्वाक्यैः प्रस्तुतम्।

## Keywords

रसनिष्पत्तिः, विभावाः, स्थायिभावाः,अनुभावाः, व्यभिचारिणः, सात्विकीभावाः, हेतुः, सञ्चारिभावः, रतिः, उत्साहः, जुगुप्सा, क्रोधः, हासः,विस्मयः, भयं, शोकः, शृङ्गारः, वीरः, बीभत्सः, रौद्रः, हास्यः, अद्भुतः, भयानकः, करुणः,शान्तः, रसाः।

## Discussion

**रसनिष्पत्तिः :-**

“विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः” (ना. शा. 6.32) इति भरतमुनिना प्रोक्तं रससूत्रं भारतीयकाव्यशास्त्रस्यैव आधारतया वर्तते। विभावानां अनुभावानां व्यभिचारिभावानाञ्च स्थायिभावैः सह सन्निवेशेन रसोत्पत्तिरिति सूत्रार्थः। तदुक्तं दशरूपके च -

भरतमुनिना प्रोक्तं रससूत्रं काव्यशास्त्रस्य आधारतया वर्तते।

**“विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः।**

**आनीयमानः स्वाद्यत्वं स्थायिभावो रसः स्मृतः॥”** (द.रू. 3.1) इति।

सूत्रेऽस्मिन् विद्यमानयोः संयोगनिष्पत्तिपदयोः व्याख्यानविषये पण्डितानां मध्येऽपि बहवो विप्रतिपत्तिप्रकारा विद्यन्ते। भारतीयकाव्यशास्त्रे प्रादुर्भूतेषु सिद्धान्तेषु प्रायेण सर्वेऽपि एतदाधाराणैवाऽजायन्त इत्येव वक्तुं शक्यते।

इदानीं विभावानुभावव्यभिचारिणः क इति वयमवलोकयामः। विभावो नाम हेतुः। अस्य आलम्बनं उद्दीपनं चेति द्वैविध्यं विद्यते। यमवलम्ब्य मनसि स्थायिभावाः प्रादुर्भवन्ति स आलम्बनविभावः। प्रादुर्भूता भावाः, यैः उद्दीप्ता भवन्ति, त एवोद्दीपनविभावाः। विभावैः प्रादुर्भूतस्य, अनुभावैः ज्ञापितस्य च स्थायिनः परिपोषः यैः क्रियते ते सञ्चारिभावाः। विविधान् रसान् प्रति आभिमुख्यं भजन्त इत्यतः त एव व्यभिचारिण इत्युच्यन्ते। विविधानां रसभावानां प्रादुर्भावे गात्रे दृश्यमाना भावा सात्विकभावाः। स्थायिनः सञ्चारिणश्च हृद्गतत्वात् नेन्द्रियगोचरा इत्यवगन्तव्यम्। सात्विकानां गात्रगतत्वान्न भावत्वमिति पूर्वमेवोक्तम् । अतः अष्टौ स्थायिनः,

विभावो नाम हेतुः।अस्य आलम्बनं उद्दीपनं चेति द्वैविध्यम्।

त्रयस्त्रिंशद्व्यभिचारिणश्च मिलित्वा एकचत्वारिंशद्भावाः सन्ति। काव्यव्यापारेण स्थायिभावानां मुख्यतयाऽभिव्यञ्जनमेव रसध्वनिरित्युच्यते। एवमेव सञ्चारिभावानां मुख्यतयाऽभिव्यञ्जनं भवति भावध्वनिः।

**स्थायिभावाः –**

**"विरुद्धैरविरुद्धैर्वा भावैर्विचिछिद्यते न यः।**

**आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः"**(दशरू. 4.34)

अविरुद्धैः विरुद्धैः वा भावैः यो भावः न तिरोदधाति,अन्यान् आत्मभावं नयति स स्थायिभावः।

अविरुद्धैः विरुद्धैर्वा भावैः यो भावः न तिरोदधाति, अन्यान् भावांश्चापि आत्मसात्करोति च स एव स्थायिभावः। यथा समुद्रः सर्वाण्यपि जलानि स्वस्मिन् अन्तर्भावयति, सर्वातिरिक्तप्रभावेण वर्तते च। स्थायी स्वप्रभावेण अन्यभावानां पुरतो विराजते। अष्टौ स्थायिनः –

**"रत्युत्साहजुगुप्साः क्रोधो हासः विस्मयो भयं शोकः।**

**शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य॥"** (दशरू. 4.35)

रतिः, उत्साहः, जुगुप्सा, क्रोधः, हासः,विस्मयः, भयं, शोकः इत्यष्टौ स्थायीभावाः। शमः शान्तरसस्थायी न सर्वैरङ्गीक्रियते।

रत्यादयः स्थायिभावाः

**अष्टौ रसाः -**

एभ्यः स्थायिभ्यः क्रमेण शृङ्गारः, वीरः, बीभत्सः, रौद्रः, हास्यः, अद्भुतः, भयानकः, करुणः इत्येते रसा जायन्ते। स्थायिनां तत्तद्रसानां च क्रमशः स्मरणाय साहित्यदर्पणकारोक्तं कारिकाद्वयं सहायकं भविष्यति। तत् कारिकाद्वयमत्रोच्यते –

श्रृङ्गारादयः रसाः

स्थायिभावाः -

“रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।

जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च॥” (सा.द. 3.175)

रसाः -

“शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।

बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तसस्तथा मतः॥” (सा.द. 3.182)

इति।

स्थायिनामपि लक्षणवाक्यानि साहित्यदर्पणकारोक्तदिशा अत्र दीयन्ते-

“रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणायितम्।
वागादिवैकृतैश्चेतोविकासो हास इष्यते॥
इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक्।
प्रतिकूलेषुतैक्ष्ण्यस्यावबोधः क्रोध इष्यते॥
कार्यारंभेषु संरम्भः स्थेयानुत्साह इष्यते।
रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम्॥
दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा।
विविधेषु पदार्थेषु लोकसीमातिवर्तिषु॥
विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः।
शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम्॥” (सा.द.3.173-180)

स्थायिभावस्य नायिकानायकौ परस्परं आलम्बनविभावौ भवतः।

रत्याख्यस्य स्थायिभावस्य नायिकानायकौ परस्परं आलम्बनविभावौ भवतः। चन्द्रिका - मन्दसमीरण - प्रकृतिरमणीयकादय उद्दीपनविभावाः। प्रादुर्भूतस्य स्थायिभावस्य ज्ञापकतया वर्तमाना भावाः मन्दहास - मसृणवीक्षणादयोऽनुभावाः। आवेग - औत्सुक्य - लज्जा - हर्ष - चपलताप्रभृतयः सञ्चारिभावाः। स्वेद - रोमाञ्च - स्वरभङ्ग - वैवर्ण्यादयः सात्विकभावाश्च। एषां सन्निवेशेन सहृदयचेतः रसास्वादप्रमुदितं भवेत्।

अर्थात् विभावानुभावव्यभिचारिसात्विकैः काव्योपात्तैः, अभिनयोपदर्शितैर्वा श्रोतृप्रेक्षकाणाम् अन्तर्विपरिवर्त्तमानो रत्यादिलक्षणः स्थायी स्वादगोचरतां, निर्भरानन्दसंविदात्मतां आनीयमानो रसः। एवमारम्भ्य रसभेदाः स्थायिभावाः सात्विकभावाश्च सर्वत्र द्रष्टव्याः।

रसास्वादः

साधारणीकरणेन सहृदयस्य वासना-संवादो भवति, सुषुप्तश्च स्थायिभावो निर्वैयक्तिकरूपेणाभिव्यक्तः सन् आनन्दास्वादं कारयति, एष एव रसास्वादः । अस्मिन् आस्वादे एव रसस्य स्थितिः । संवित्विश्रान्तिजन्य एष आनन्दः । अत्र चैतन्यं विश्रान्ति- स्थितौ सन्तिष्ठते। रसानुभूतिरियं सामान्यानुभूतिभिन्नत्वाद् उदात्तत्वात् सर्वजनवेद्यत्वाच्च अलौकिकी कथ्यते। अत्र सम्बन्धविशेषस्य परिहारः । रसोऽयं सहृदयसंवेद्यः । सर्वैरेव तत्र चेतनायाः पूर्णविश्रान्तेः स्थितिः स्वीक्रियते ।

अभिनवगुप्तस्य मतमिदं दर्शनमूलत्वात् मनोवैज्ञानिकचिन्तनपरत्वाद् यथार्थभावेन रसविश्लेषणाच्च अद्यत्वेऽपि सर्वैरेव काव्यतत्त्वज्ञैः गृह्यते स्वीक्रियते प्रशस्यते च ।

## Summarised Overview

“विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः” (ना. शा. 6.32) इति भरतमुनिना प्रोक्ते रससूत्रे विभावानां अनुभावानां व्यभिचारिभावानाञ्च स्थायिभावैः सह सन्निवेशेन रसोत्पत्तिरिति सूत्रार्थः अस्मिन् एकके संक्षिप्ततया विशदयति। विभावो नाम हेतुः। अस्य आलम्बनं उद्दीपनं चेति द्वैविध्यं विद्यते। विविधान् रसान् प्रति आभिमुख्यं भजन्त इत्यतः त एव व्यभिचारिण इत्युच्यन्ते। विविधानां रसभावानां प्रादुर्भावे गात्रे दृश्यमाना भावा सात्विकभावाः। अविरुद्धैः विरुद्धैर्वा भावैः यो भावः न तिरोदधाति, अन्यान् भावांश्चापि आत्मसात्करोति च स एव स्थायिभावः। रतिः, उत्साहः, जुगुप्सा, क्रोधः, हासः,विस्मयः, भयं, शोकः इत्यष्टौ स्थायीभावाः। शमः शान्तरसस्थायी न सर्वैरङ्गीक्रियते। एभ्यः स्थायिभ्यः क्रमेण शृङ्गारः, वीरः, बीभत्सः, रौद्रः, हास्यः, अद्भुतः, भयानकः, करुणः इत्येते रसा जायन्ते।

## Assignments

1.विभावाः नाट्यशास्त्रानुसारं विशदयत।
2.स्थायीभावाः विशदयत।
3.अनुभावाः विशदयत।
4.व्यभिचारीभावाः विशदयत।
5.सात्वीभावाः प्रतिपादयत।

## Suggested Readings

1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

## References

1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice, Motilal Banarasidas Publishers, Delhi.1924

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# रसचर्चा - उत्पत्तिवादः लोल्लटः, अनुकरणवादः श्रीशङ्कुकः, भुक्तिवादः भट्टनायकः, अभिव्यक्तिवादः अभिनवगुप्तः

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

रसनिष्पत्तिविषयकं सर्वप्रथममुल्लेखं भरतमुनिना नाट्यशास्त्रे कृतम्। तदेव सर्वरससिद्धान्तानां आधारः। भरतस्य रससूत्रस्य व्याख्यायामुत्तराचार्यैः स्वशक्त्याः प्रयोगं कृतम्। परिणामतः उत्पत्तिवादस्य, अनुमितिवादस्य, भुक्तिवादस्य, अभिव्यक्तिवादस्य सिद्धान्तचतुष्टयस्य विकासः अभवत्। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः इति भरतस्य सूत्रम्। अत्र प्रयुक्तस्य निष्पत्तिशब्दस्य अर्थचतुष्टयं विद्यते – भट्टलोल्लटमतेन निष्पत्तिशब्दस्यार्थः उत्पत्तिः,शंकुमतेन अनुमितिः, भट्टनायकमतेन भुक्तिः अभिनवगुप्तानुसारं अभिव्यक्तिश्च।एतानि व्याख्यानानि विशदरूपेण पश्यामः।

SGOU

## Keywords

रसचर्चा, उत्पत्तिवादः, अनुमितिवादः, भुक्तिवादः, अभिव्यक्तिवादः, अभिधा, भावकत्वं, भोजकत्वं, मीमांसा, न्यायः, सांख्यम्,भट्टनायकः,लोल्लटः, शङ्कुकः, अभिनवगुप्तः

## Discussion

### रसचर्चा

#### भट्टनायकः

भट्टनायको हि रसोत्पत्तिविषये नवीनं दृष्टिकोणमादत्ते। स हि शब्दस्य त्रिविधं व्यापारं मन्यते। अभिधा, भावकत्वं, भोजकत्वञ्च। तत्राभिधाव्यापारेण काव्यस्य सामान्योऽर्थ उपस्थितो भवति। भावकत्वाव्यापारेण सीतारामादीनां विशेषस्वरूपमुपकृत्य तान् साधारणीकरोति। भोजकत्व-व्यापारेण सामाजिकान् रसानुभवं कारयति ।

यथोक्तम् -

अभिधा भावना चान्या तद्भोगीकृतिरेव च ।
अभिधाधामतां याते शब्दार्थालङ्कृती ततः ।।
भावनाभाव्य एषोऽपि शृङ्गारादिगणो मतः ।
तद्भोगीकृतिरूपेण व्याप्यते सिद्धिमान् नरः ।॥ इति ।

काव्यानुशासनविवेके हेमचन्द्रः स्मरति-

भट्टनायकः- रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते च।

भट्टनायकस्त्वाह-रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते। स्वगतत्वेन हि प्रतीतौ करुणे दुःखित्वं स्यात्। न च सा प्रतीतिर्युक्ता सीतादेरविभावत्वात् स्वकान्तास्मृत्यसंवेदनात्। देवतादौ साधारणीकरणयोग्यत्वात्। समुद्रोल्लङ्घ-नादेरसाधारण्यात् । न च तत्त्वतो रामस्य स्मृतिरनुपलब्धत्वात्। न च शब्दानुमानादिभ्यस्तत्प्रतीतौ ताटस्थ्यमेव भवेत्तत्प्रीतिरनुभवस्मृत्यादिरूपा रसस्य युक्ता ।" इति ।

**भट्टलोल्लटस्य उत्पत्तिवादः**

लोल्लटः उत्पत्तिवादस्य समर्थकः।

भरतसूत्रस्य व्याख्याकारेषु भट्टलोल्लटः उत्पत्तिवादस्य समर्थकः। तस्य मते विभावानुभावादि-संयोगाद् अनुकार्यरामादिषु रसस्योत्पत्तिः भवति । तेष्वपि विभावा सीतादयः मुख्यतः रसस्योत्पादकाः सन्ति। अनुभावाः तदुत्पन्नरसस्य बोधकाः व्यभिचारिभावाश्च पोषकाः भवन्ति । अत एव स्थायिभावेन विभावानाम् उत्पाद्योत्पादकभावसम्बन्धः अनुभावानां गम्यगमकभावसम्बन्धः व्यभिचारिभावानां पोष्यपोषकभावसम्बन्धः भवति। अत एव रससूत्रे प्रयुक्तस्य संयोगशब्दस्य भट्टलोल्लटमतेनार्थत्रयं विद्यते - विभावैः सह संयोगः अर्थात् उत्पाद्योत्पादकभावसम्बन्धः अनुभावैः सह गम्यगमकभावसम्बन्धः व्यभिचारिभावैः सह पोष्यपोषकभावसम्बन्धः संयोगशब्देनाभिप्रेतः। अपरञ्च अस्य मतानुसारमनुकार्यरामादिषु मुख्यतः रसः भवति। तेषामनुकरणाद् गौणरूपेण नटेऽपि रसस्य स्थितिः मन्यते परञ्च सामाजिकेषु रसस्योत्पत्तिः न जायते। अपरञ्च भरतसूत्रे प्रयुक्तस्य संयोगशब्दस्यार्थवद् निष्पत्तिशब्दस्याप्यर्थत्रयमवबोधनीयम् - विभावेन सह स्थायिभावस्य संयोगः अर्थात् उत्पाद्योत्पादकभावसम्बन्धेन रसस्य निष्पत्तिः भवति। अत्र निष्पतिशब्दस्यार्थः उत्पत्तिः विद्यते। अनुभावैः सह संयोगः अर्थात् गम्यगमकभावसम्बन्धेन रसस्य निष्पत्तिः प्रतीतिः भवति। अत्र निष्पत्ति शब्दस्यार्थः प्रतीतिः वर्तते। व्यभिचारिभावैः सह पोष्यपोषकभावसम्बन्धेन रसस्य निष्पत्तिः (पुष्टिः) भवति। अत्र निष्पत्तिशब्दस्यार्थः पुष्टिः विद्यते। एषः एव भट्टलोल्लटस्याभिप्रायः।

उत्पत्तिवादः मीमांसासिद्धान्तानुसारं विद्यते।

टीकाकारणां मते व्याख्यानमेतद् मीमांसासिद्धान्तानुसारं विद्यते। अत्र मीमांसा-शब्देनोत्तरमीमांसायाः (वेदान्तस्य) ग्रहणं भवति । वेदान्तदर्शने जगतः आध्यासिकप्रतीतिः मता। यथा रज्जौ सर्पस्य आध्यासिकप्रतीतिसमये सर्पेऽविद्यमाने सत्यपि सर्पस्य प्रतीतिः तद्भयादिकार्योत्पत्तिश्च भवति तथैव अभिनयादिकाले रामादिगतसीताविषयकानुरागादिरूप- रत्यविद्यमाने सत्यपि नटे विद्यमानरूपेण तस्याः प्रतीतिः तथा च सहृदयेषु चमत्कारानुभूत्यादिकार्योत्पत्तिः भवति। अनेनैव सादृश्येन सिद्धान्तोऽयं मीमांसानुगामी अर्थात् उत्तरमीमांसानुगामी

वेदान्तानुगामी सिद्धान्तः अपि कथितुं शक्यते। अस्याः व्याख्यायाः प्रणेता भट्टलोल्लटः मीमांसायाः पण्डितः आसीत् ।

**शङ्कुकस्य अनुमितिवादः**

शङ्कुकस्य अनुमितिवादः

न्यायसिद्धान्तस्यानुयायिना रससूत्रस्य अपरेण व्याख्याकारेण शङ्कुकेन रससूत्रस्य अपरप्रकारेण व्याख्या कृता। तेन सामाजिकैः सह रसस्य सम्बन्धः स्थापितः । तन्मते नटः कृत्रिमरूपेण अनुभावादीनां प्रकाशनं करोति परञ्च तत्सौन्दर्यबलेन तस्मिन् वास्तविकतायाः प्रतीतिः भवति। तान् कृत्रिमानुभावादीन् दृष्ट्वा सामाजिकाः नटे वस्तुतः अविद्यमाने सत्यपि तस्मिन् रसस्यानुमानं कुर्वन्ति। स्ववासनायाः वशीभूतं भूत्वाऽनुमितरसस्यास्वादनं च कुर्वन्ति।

शङ्कुकस्य मतविश्लेषणेन इमानि तथ्यानि दृष्टिपथमायान्ति- १. शङ्कुकेन नटे रसः अनुमेयः इति उक्तः। सामाजिकाः चित्रतुरगन्यायेन नटेषु अनुकार्य-रामदिरूपमाग्रहणाद् रसानुभूतेः अनुमानं कृत्वा स्ववासनया तत्र रसानुभूतिं कुर्वन्ति। यथा अश्वस्य चित्रं दृष्ट्वा 'अश्वोऽयम्' इति प्रतीतिः भवति परञ्च प्रतीतिरेषा सम्यग्मिथ्या संशयसादृश्यप्रतीतिभ्यः विलक्षणा भवति तथैव नटे अनुकार्यरामादेः प्रतीति भवति सापि सम्यग्मिथ्यासंशय सादृश्यप्रतीतिभ्यः विलक्षणा जायते। २. रसस्य अनुमितौ रामसीतादीनां विभावानां प्रतीतिः चित्रतुरगन्यायेन भवति। तदतिरक्तिं यैः अनुभावव्यभिचारिभावरूपलिङ्गैः तेषु 'इयं

रसस्य अनुमितौ रामसीतादीनां विभावानां प्रतीतिः चित्रतुरगन्यायेन भवति।

सीता रामविषयकरतिमती, तस्मिन् विलक्षण-स्मितकटाक्षादिमत्वात् इति अनुमीयते। ते लिङ्गाः अपि अयथार्थाः। यथार्थतः स्मितकटाक्षाद्यनुभावाः तु यथार्थरामादिषु आसन् परञ्च अत्र चित्रतुरगन्यायेन उपस्थितरामादिरूपे नटे यथार्थस्मितकटाक्षादयः न विद्यन्ते। नटः स्वशिक्षाऽभ्यासाभ्याञ्श्च कृत्रिमस्मितकटाक्षादीनां प्रदर्शनं करोति । एवं कृत्रिमालम्बनरूपरामादौ नटैः कृत्रिमरूपेण प्रकाशितैः स्मितकटाक्षादिभिः "इयं सीता रामविषयकरतिमती, या "अयं रामः सीता विषयकरतिमान् तत्र विलक्षणस्मित-कटाक्षादिमत्त्वात्" एवमानुमानिकरसस्य प्रतीतिः भवति। ३. अत एव रससूत्रे प्रयुक्तस्य संयोगाच्छब्दस्यार्थः

सामान्यतः अनुमानादिप्रमाणैः उत्पन्नं ज्ञानं परोक्षं भवति।

गम्यगमकभावसम्बन्धात् भवति। ४. अत एव आनुमानिकरसस्य प्रतीतेः आधारोऽपि सामाजिकः न भवति प्रत्युत कृत्रिमरामसीतयोः विद्यमानायाः रत्याः रसस्य वा सामाजिकाः अनुमानं कुर्वन्ति। ५. सामान्यतः अनुमानादिप्रमाणैः उत्पन्नं ज्ञानं परोक्षं भवति। केवलं प्रत्यक्षप्रमाणेनैव अपरोक्षस्य प्रतीतिः भवति। परञ्च रसानुमितेः वैशिष्ट्यमिदं यत्तत् सा अन्यानुमितिभ्यः भिन्ना अपरोक्षा च भवति। अत एव तस्यानुमितेः आस्वादनं सामाजिकाः कुर्वन्ति। ६. सामाजिकानां रसप्रतीतेः कारणं तेषां वासना रसप्रतीतौ विलक्षणा अपरोक्षतायाः कल्पना च विद्यते। वस्तुतस्तु अनुमितरसः न तु सामाजिकेषु न च कृत्रिमरामादिषु विद्यते परञ्च वासनाबलात् सामाजिकेषु नटेष्वपि च अविद्यमानस्य रसस्य आस्वादं सामाजिकाःप्राप्नुवन्ति ।

अनुमितिवादः न्यायमतसिद्धान्तानुसारं विद्यते।

शङ्कुकस्यानुमितिवादः न्यायमतानुयायिसिद्धान्तः वर्तते। न्यायशास्त्रम् अनुमितिप्रधानशास्त्रं विद्यते। विशेषतया नव्यन्यायाचार्याः अनुमानस्य परिष्कारे स्वशक्तेः प्रयोगम् अकुर्वन् । न्यायस्य अनुमितिप्रधानप्रक्रियामाधृत्यैव शङ्कुकेन अनुमितिवादः स्थापितः।

**भट्टनायकस्य भुक्तिवादः**

भट्टनायकस्य भुक्तिवादः

भरतसूत्रस्य तृतीयव्याख्याकारेण भट्टनायकेन सामाजिकानां साक्षात्कारात्मकरसानुभूत्याः उपपादनार्थं नूतनमार्गस्यावलम्बनं गृहीतम् । यः साहित्यशास्त्रे भुक्तिवादनाम्ना ख्यातः। तदनुसारं रसस्योत्पत्तिः नानुकार्यरामादौ भवति नानुकर्त्तानटादौ। अनुकार्यः अनुकर्ता च तटस्थौ उदासीनौ भवतः। तौ रसानुभूतिं न कुरुतः। यथार्थानुभूतिः तु सामाजिकान् भवति। भट्टलोल्लटः मुख्यतया तटस्थरामादौ गौणरूपेण तटस्थनटे रसस्योत्पत्तिः मन्यते। अत्र सामाजिकानां कृते किमपि स्थानं न विद्यते। अत एव ताटस्थ्येन रसोत्पतिस्थापकस्य भट्टलोल्लटस्य सिद्धान्तः अयुक्तः। शङ्कुकमतानुसारं तटस्थे नटे रसस्यानुमितिः भवति तया च संस्कारवशात् सामाजिकाः रसचर्वणां कुर्वन्ति। परञ्च अनुमितिस्तु परोक्षज्ञानं भवति। साक्षात्कारात्मकरसानुभूतेः समस्यायाः निराकरणं अनुमित्या भवितुं न शक्यते।

एतदतिरिक्तं रसविषयकः एकः सिद्धान्तः अभिनवगुप्तस्य अभिव्यक्तिवादः विद्यते । तन्मते सामाजिकेषु रसस्याभिव्यक्तिः भवति। एतदनुसारं रसस्य स्थितिः तटस्थरामादौ तटस्थनटे च न भवति प्रत्युत सामाजिकेषु एव। सामाजिकेषु रसस्य उत्पत्तिः अनुमितिः वा न जायते अपितु अभिव्यक्तिरेव भवति । परञ्च भट्टनायकस्य मते अभिव्यक्तिवादस्य सिद्धान्तोऽयमयुक्तः यतो हि अभिव्यक्तिः पूर्वविद्यमानानां वस्तूनां भवति। रसस्तु अनुभूतिस्वरूपः । अनुभूतिकालात् पूर्वं परं वा रसस्य सत्ता न विद्यते। अभिव्यक्तमाणस्य वस्तुनः सत्ता अभिव्यक्तेः पूर्वं परं च भवत्येव। परं रसस्य तादृशी स्थितिः नास्ति। रसः अनुभूतिकाले एव विद्यते । अत एव अभिव्यक्तिवादस्य सिद्धान्तोऽयुक्तः। एवं भट्टनायकेन उत्पत्तिवादस्य अनुमितिवादस्य अभिव्यक्तिवादस्य खण्डनं कृत्वा भुक्तिवादस्य स्थापनं कृतम्।

भुक्तिवादे भावकत्वभोजकत्वरूप व्यापारद्वयस्यापि कल्पना कृता।

भट्टनायकेन भुक्तिवादस्य स्थापनाय शब्देषु स्वीकृताभिधालक्षणयोः शक्त्योः अतिरिक्तं भावकत्वभोजकत्व-रूपव्यापारद्वयस्य कल्पना कृता। तन्मते अभिधालक्षणाभ्यां काव्यस्योपस्थितः अर्थः भावकत्वव्यापारेण परिष्कृतः सन् सामाजिकानां कृते उपभोग्यः भवति। अत्र संयोगशब्दस्यार्थः भोज्यभोजकभावसम्बन्धः विद्यते। अभिधाद्वारा उपस्थितः काव्यस्यार्थः नायकनायिकयोः प्रणयकथादिरूपेण व्यक्तिविशेषेण सम्बद्धः भवति सामाजिकानां कृतेऽपि अनुपयोगयोग्यः न जायते। शब्दस्य भावकत्वव्यापारः अस्यां कथायां परिष्कारं कृत्वा व्यक्तिविशेषात् सम्बन्धं दूरीकृत्वा तस्याः साधारणीकरणं करोति। साधारणीकरणानन्तरं सामाजिकैः सह तस्याः कथायाः सम्बन्धः स्थापितः भवति। स्वसंस्कारानुरूपं सामाजिकः स्वयमेव कथायाः पात्रः जायते। एवं कथायाः यथार्थनायकनायिकादीनां स्थित्याः स्थानं साधारणीकरणव्यापारेण सामाजिकानां कृते उपलभ्यते।

भट्टनायकानुसारं भावकत्वव्यापारेण काव्यार्थस्य साधारणीकरणान्तरं शब्दस्य भोजकत्व- नामकव्यापारः सामाजिकान् रसस्य साक्षात्कारात्मकं भोगं कारयति । तद्भोजकसिद्धान्तः भुक्तिवादनाम्ना ख्यातः । एवं भट्टनायकेन शब्दे अभिधालक्षणाद्यतिरिक्तं भावकत्वभोजकत्व-नामकव्यापारद्वयस्य कल्पना कृत्वा सामाजिकानां रसानुभूतेः उपपादनस्य प्रयत्नं कृतम् ।

भुक्तिवादः सांख्यमतानुसारी वर्तते।

भट्टनायकस्य सिद्धान्तोऽयं टीकाकारमतेन सांख्यमतानुयायी वर्तते। यथा सांख्यमतानसारं सुखदुःखादयः वस्तुतः अन्तकरणस्य धर्माः न आत्मनः धर्माः परञ्च पुरुषस्य अन्तःकरणेन सम्बन्धात् पुरुषे तेषामौपधिकप्रतीतिः भवति तथैव सामाजिके अविद्यमानस्य रसस्य भोगः सामाजिकान् भवत्येव। अनेनैव सादृश्येन सिद्धान्तोऽयं सांख्यसिद्धान्तानुगामी कथ्यते।

**अभिनवगुप्तस्य अभिव्यक्तिवादः**

अभिव्यक्तिवादानुसारं सामाजिकगतः स्थायिभावः एव रसानुभूतेः निमित्तम्।

नाट्यशास्त्रस्य चतुर्थव्याख्याकारेण अभिनवगुप्तेन अभिव्यक्तिवादस्य स्थापना कृता। यथा भट्टलोल्लटेन उत्तरमीमांसायाः शङ्कुकेन न्यायस्य भट्टनायकेन सांख्यस्याधारेण स्वस्वमतानां स्थापना कृता तथैव अभिनवगुप्तेनापि स्वपूर्ववर्तिनः अलङ्कारशास्त्रस्य प्रमुखध्वनिवाद्याचार्यस्य आनन्दवर्धनस्याधारेण अभिव्यक्तिवादस्य प्रतिपादनं कृतम् । तेन स्पष्टरूपेण सामाजिकगतरसानुभूतेः उपपादनार्थं अपरस्य मार्गस्यालम्बनं गृहीतम् । तदनुसारं सामाजिकगतः स्थायिभावः एव रसानुभूतेः निमित्तम् । अत्र संयोगशब्दस्यार्थः व्यङ्गव्यञ्जकसम्बन्धः विद्यते। स्थायिभावः व्यङ्ग्यः विभावादयः व्यञ्जकाः । मूलमनः संवेगः अर्थात् वासनासंस्काररूपेण रत्यादिस्थायिभावा सामाजिकानां आत्मनि विद्यन्ते। ते साधारणीकृतरूपेण उपस्थितैः विभावादिभिः अभिव्यक्ताः उद्बुद्धाः वा जायन्ते तन्मयीभावाच्च वेद्यान्तरसम्यक्शून्य ब्रह्मास्वादसदृशपरमानन्दरूपे अनुभूताः भवन्ति। अत्र भावकत्वभोजकत्वव्यापारद्वयस्य कल्पना न कृता परञ्च भावकत्वव्यापारस्थाने साधारणीकरणव्यापारः अभिधालक्षणाभ्यां सह शब्दस्य व्यञ्जनानामकवृत्ति स्वीक्रीयते। अभिनवगुप्तस्य मतमिदमत्यधिकप्रशंसनीयम् ।

## Summarised Overview

विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः इति भरतस्य रससूत्रमाधारीकृत्य सूत्रे प्रयुक्तस्य निष्पत्तिशब्दस्य भट्टलोल्लटमतेन उत्पत्तिः,शंकुमतेन अनुमितिः, भट्टनायकमतेन भुक्तिः अभिनवगुप्तानुसारं अभिव्यक्तिश्च रूपेण विविधप्रकारैः व्याख्याः सन्ति। उत्पत्तिवादः मीमांसासिद्धान्तानुसारं विद्यते। अनुमितिवादः न्यायमतसिद्धान्तानुसारं विद्यते। भुक्तिवादः सांख्यमतानुसारीवर्तते। अभिव्यक्तिवादानुसारं सामाजिकगतः स्थायिभावः एव रसानुभूतेः निमित्तम्।

## Assignments

1.भट्टलोल्लटस्य उत्पत्तिवादं व्याख्यात।
2.शंकुमतस्य अनुमितिवादं व्याख्यात।
3.भट्टनायकमतस्य भुक्तिवादं व्याख्यात।
4.अभिनवगुप्तस्य अभिव्यक्तिवादं व्याख्यात।

## Suggested Readings

1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya,Dasarupaka, Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

## References

1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice,MotilalBanarasidass Publishers, Delhi.1924

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# नाट्योत्पत्तिः

# BLOCK - 2

SGOU

# UNIT 1

# नाट्यशास्त्रप्रारम्भः। नाट्यशास्त्रम् प्रथमाध्यायः - प्रथमश्लोकात्

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

वेदानां सर्वमूलत्वं स्वीकरोत्यस्माकमार्षपरम्परा 'वेदोऽखिलो धर्ममूलम्' 'वेदात्सर्वं प्रसिद्ध्यती'ति प्रायेणास्माभिरुच्यते। यतो हि वेदस्तु ज्ञानपर्याय एव। इतिहासपुराणानि वेदार्थमुपबृह्यन्ति। अर्थात् वेदार्थान् विशदीकुर्वन्ति। ब्रह्मा सुरासुरैः प्रार्थितो लोकरञ्जनमुद्दिश्य वेदानां साहाय्येन (तेभ्यः तत्त्वानि गृहीत्वा) नाट्यवेदं चकार । ब्रह्मण एवाज्ञया भरतमुनिस्तं नाट्यवेदमुपयुज्य बृहत्कलेवरं नाट्यशास्त्रं निर्मितवान्। अस्मिन् (नाट्यशास्त्रस्य प्रथमाध्यायस्य पाठ्यांशे तदेवविवरणं पूर्वभागमधिकृत्य) प्रस्तूयते। एतदर्थमत्रादितश्चत्वारिंशत् श्लोकाः प्रयुक्ताः।

## Keywords

कार्यस्य ग्रन्थस्य वा निर्विघ्नसमाप्तये मंगलाचरणम्, पितामहमहेश्वरौ, ब्रह्मणः, नाट्यदेवौ, नमस्कारात्मकं, वस्तुनिर्देशात्मकं, शिवः नृत्तनृत्योर्देवः, मुख्यार्थो रसः, वाचिकाभिनयः।

# Discussion

कार्यस्य ग्रन्थस्य वा निर्विघ्नपरिसमाप्तये मङ्गलाचरणं क्रियते।

**मङ्गलाचरणम्-**

कस्यचिदपि कार्यस्य (प्रकृतप्रसङ्गे ग्रन्थस्य) प्रारम्भे मङ्गलाचरणं कर्तव्यमिति शिष्टाचारः। कार्यस्य ग्रन्थस्य वा निर्विघ्नसमाप्तये मङ्गलाचरणं क्रियते। अत्र नाट्यशास्त्रस्यापि प्रारम्भे तत्कर्ता भरतमुनिः मङ्गलाचरणं विधत्ते-

**'प्रणम्य शिरसा देवौ पितामहमहेश्वरौ।**

**नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्।।'**

मङ्गलाचरणं त्रिविधमिष्यते- 'आशीर्नमस्क्रिया वस्तुनिर्देशोवापि तन्मुखम् । एवं हि मङ्गलाचरणमाशीर्वादात्मकं नमस्कारात्मकं वस्तुनिर्देशात्मकञ्च भवति।अत्रास्मिन्मङ्गलाचरणेऽस्य त्रयो भेदाः सम्भवन्ति । श्लोकस्य प्रथमपङ्क्तौ नमस्कारात्मकं, द्वितीयपङ्क्तौ वस्तुनिर्देशात्मकं मङ्गलमनुष्ठितम्। 'नाट्यशास्त्रं प्रवक्ष्यामि' इति भरतमुनेः प्रतिज्ञावचनम्। अनेन ऋषिभ्यः शिष्येभ्यो लोकाय च भरतमुनिर्नाट्यशास्त्रस्य सनिदर्शनं ज्ञानं दास्यति यद् ब्रह्मा तस्मै मुनये दत्तवानिति प्रतिज्ञायते। गुरवो यत् किमपि कस्मैचित् ददति तत् प्रसादावस्थायामेव भवति । एवं ह्यत्र 'नाट्यशास्त्रं प्रवक्ष्यामी 'त्यनेनाशीर्वादात्मकं मङ्गलाचरणं ध्वन्यते। आशीर्वादप्रदाने नाट्यशास्त्रप्रवचने विघ्नो माऽऽयात्विति पितामहमहेश्वरौ प्रणम्येते। पितामहो ब्रह्मा महेश्वरो भगवान् शिवः पितामहश्चमहेश्वरश्चेति पितामहमहेश्वरौ। तौ देवौ नाट्यदेवौ। ब्रह्मा नाट्यस्य देवो नाट्यवेदस्य कर्तृकत्वात्। नृत्यस्य (ताण्डवस्य) देवः। अत्र शिवशक्त्योरभिन्नत्वाच्छक्तिः पार्वती अपि गृह्यते, अन्यत् च तयोः प्रवर्तितं लास्यमपि। अतः शिवो नृत्तनृत्योर्देवः । प्रकृतप्रसङ्गे एतौ देवावभीष्टौ। अतः प्रणम्येते प्रणमनं नमनं प्रसादनार्थमादरार्थम् आत्माहङ्कारपरिहारार्थं च। एवं हि प्रणमनक्रियया पितामहमहेश्वरौ प्रसाद्य, तेनैव ब्रह्मणा

नाट्यशास्त्रस्य निर्विघ्नपरिसमाप्तये पितामहमहेश्वरौ प्रणम्येते।

यन्नाट्यशास्त्रम् उदाहृतमुपदिष्टं तन्नाट्यशास्त्रं प्रवक्ष्यामि, तस्य प्रवचनं करिष्यामीत्यर्थः ।

नाट्यस्य मुख्योऽर्थो रसः। तस्य रसस्याभिव्यक्तये नाट्येऽभिनयस्य प्राधान्यम् । मङ्गलाचरणे 'शिरसा' इति पदेनाङ्गिकोऽभिनयः सूचितः। ततो 'देवौ पितामहमहेश्वरौ प्रणम्य' इत्यनेन वाचिकोऽभिनयः सूचितः। यतो हि प्रणामस्य यो विधिः शास्त्रैरुपदिश्यते स तु प्रणम्यं जनं सम्बोध्यात्मनिवेदनपूर्वकम्। यथा "भो गुरो, भारद्वाज-गोत्रोत्पन्नोऽमुकपुत्रोऽमुकशर्माऽहं भवन्तमभिवादये" इति।

रसस्य अभिव्यक्तये नाट्ये अभिनयस्य प्राधान्यम्।

मङ्गलाचरणे ब्रह्मणः शिवस्य चानेकनामसु 'पितामहमहेश्वरौ' इति नाम्नोल्लेखः साभिप्रायः। अत्र द्वयोर्वर्णक्रमे 'महमह' इत्युच्चारणं भवति। अतः छेकानुप्रासः प्रयुक्तः । वाचिकाभिनयः सालङ्कारः । सालङ्कारं वाक्यं देवानां परितोषहेतुः। परितुष्टा देवा लोकहितैषिणो भवन्ति । इत्थं निर्विघ्नं हि नाट्यशास्त्रस्य प्रवचनमिति ।

## Summarised Overview

भरतमुनिना प्रणीतं नाट्यशास्त्रं 'प्रणम्य शिरसा ...इति मंगलाचरणेन प्रारभते। मङ्गलाचरणं त्रिविधमिष्यते- 'आशीर्नमस्क्रिया वस्तुनिर्देशोवापि तन्मुखम् । कार्यस्य ग्रन्थस्य वा निर्विघ्नपरिसमाप्तये मङ्गलाचरणं क्रियते। नाट्यशास्त्रस्य निर्विघ्नपरिसमाप्तयेभरतमुनिना पितामहमहेश्वरौ प्रणम्येते। पितामहमहेश्वरौ प्रसाद्य, तेनैव ब्रह्मणा यन्नाट्यशास्त्रम् उदाहृतमुपदिष्टं तन्नाट्यशास्त्रं प्रवक्ष्यामि, तस्य प्रवचनं करिष्यामि इति मङ्गलश्लोकस्य अर्थः।

## Assignments

1. मङ्गलाचरणं किमर्थं कर्तव्यम् ?
2. नाट्यशास्त्रे प्रतिपादितं मङ्गल्शोकं विशदयत।
3. नाट्यशास्त्रस्य प्रारम्भः कथं इति विशदयत।
4. मङ्गलश्लोके प्रतिपादितौ पितामहमहेश्वरौ कौ ?
5. नाट्यस्य मुख्यार्थः कः ?

## Suggested Readings


1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014


## References


1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice, Motilal Banarasidas Publishers, Delhi.1924

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# नाट्यविषये समस्याः

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

भरतमुनिना प्रणीतं नाट्यशास्त्रं 'प्रणम्य शिरसा ...इति मंगलाचरणेन प्रारभते।नाट्यशास्त्रे षड्त्रिंशत् अध्यायाः सन्ति। प्रथमाध्याये मंगलाचरणानन्तरं नाट्यविषये समस्याः ,नाट्यप्रयोगं नाट्यगृहं च विशदरूपेण प्रतिपादयति। अस्मिन् एकके नाट्यविषये समस्याः इति विषयमधिकृत्य पठामः।

## Keywords

नाट्यविषये समस्याः, आत्रेयप्रमुखाः ऋषयः, पञ्चप्रश्नाः, नाट्यवेदः कथं उत्पन्नः, कस्य कृते निर्मितः, कति अङ्गानि, किं प्रमाणः, प्रयोगः कीदृशः, पञ्चमो वेदः, ब्रह्मा निर्मितः, पुरुषार्थचतुष्टयम्, पाठ्यं, गीतं, अभिनयः, रसः।



SGOU

# Discussion

**भरतमुनिं प्रति मुनीनां प्रश्नाः ( नाट्यविषये समस्याः)**

प्रणिपातेन परिप्रश्नेन सेवया ज्ञानिनः ज्ञानं उपदेक्ष्यन्ति।

पुरा कदाचिदनध्यायदिवसे आत्रेयप्रमुखा ऋषयः नाट्यकोविदं भरतमुनिं पर्युपास्य प्रपच्छुः।प्रश्नकरणे विधिमुपदिशति भगवान् श्रीकृष्णः श्रीमद्भगवद्गीतायाम्-

**"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**

**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः॥"**

अस्याऽभिप्रायः यः तत्त्वदर्शी ज्ञानी भवति, स पृष्टे सति अवश्यमेव तत्त्वज्ञानमुपदिशति। कथम् ? प्रणिपातेन तुष्टः सेवया च प्रीतः। एतदतिरिक्तमिदमपि ज्ञेयं यत्प्रश्नमुपदिशति तस्य क उचितः कालः? यदि स तत्त्वदर्शी ज्ञानी कार्यान्तरे व्यापृतः स्यात्, श्रान्तः स्याच्चिन्तितः स्याद् व्यग्रः स्यादथवा कैश्चिद् विघ्नैरुपहितः स्यात्तदा प्रश्नो न प्रष्टव्यः। अनुकूलं समयं वीक्ष्य, तास्ता अवस्थाः परीक्ष्य, तच्चाभिवादनेन सपर्यया प्रसाद्यैवाऽवसरोचितः प्रश्नः करणीयः ।

**'समाप्तजप्यं व्रतिनं स्वसुतैः परिवारितम्।**
**अनध्याये कदाचित्तु भरतं नाट्यकोविदम्॥**
**मुनयः पर्युपास्यैनमात्रेयप्रमुखाः पुरा।**
**प्रपच्छुस्ते महात्मानो नियतेन्द्रियबुद्धयः ॥**
**योऽयं भगवता सम्यग् ग्रथितो वेदसम्मितः।**
**नाट्यवेदः कथं ब्रह्मन्नुत्पन्नः कस्य वा कृते ॥**
**कत्यङ्ङ्गः किं प्रमाणश्च प्रयोगश्चास्य कीदृशः।**
**सर्वमेतद् यथातत्त्वं भगवन् वक्तुमर्हसि ॥**

वर्जितासु तिथिषु अध्यापनं निषिद्धम्।

न अध्यायोऽनध्यायः, यस्मिन् दिवसे अध्यायोऽध्ययनं न भवति सोऽनध्यायदिवसः। अध्ययनाय वर्जितास्तिथयः सन्ति। तासु वर्जितासु तिथिषु अध्यापनं निषिद्धम्। प्रश्नोत्तरमप्यध्यापनस्यप्रकार एव। अतोऽत्राऽनध्यायत्वात्प्रश्नं कर्तुमुत्तरञ्च प्रदातुं न युज्यते। किन्त्वनध्यायस्यान्यान्यपि कारणानि भवन्ति तेष्वेकं कारणमतिथीनां पूज्यानामागमनमपि

भवति। अत्र आत्रेयप्रमुखागमनप्रयुक्तोऽनध्याय इतिसमाधानमुपपन्नम्। अन्यथातु शास्त्रविरोधः।

गुरुर्नाट्यवेदस्योपदेष्टा स भरतमुनिर्नाम शिष्यो स ब्रह्मैव यस्य नाट्यशास्त्रस्याऽसाधारणो वेत्ता विद्यादित्यत्र कः सन्देहः? अतो न भरतमुनिर्नाट्यकोविद इत्युक्तः। स नाट्यवेदस्य ज्ञाता प्रयोक्ता च। सः नाट्यशास्त्रं निर्मितवान्। अतो नाट्यतत्त्वानि सम्यग् विजानाति । एवं हितं प्रश्नं कर्तु युज्यते।

भरतमुनिः नाट्यवेदस्य ज्ञाता प्रयोक्ता च।

एकदाऽनध्याये स भरतमुनिः स्वपुत्रैः स्वकीयैः शिष्यैः (शिष्या अपि पुत्रामताः) परिवारितः शिष्यैः सहेत्यर्थः, सुखमासीन आसीत्। स व्रतनियमानां पालनकर्ता सदाचारी नित्यं क्रियमाणं जप्यं जपकर्म सम्पन्नं कृत्वा शिष्याणां मध्ये स्थित आसीत्। तस्मिन्नेव समये आत्रेयप्रमुखा ऋषयस्तत्राश्रमं गत्वा तथासीनं भरतमुनिं सादरमभिवाद्य नाट्यशास्त्रविषयसम्बद्धान् प्रश्नान् चक्रुः।

आत्रेयप्रमुखा ऋषयः कीदृशा आसन्? महात्मानो जितेन्द्रियबुद्धयस्ते आसन्। महात्मानः सदाशया उदारविचारोपेताः निष्कलुषमानसाः। जितेन्द्रियबुद्धयः येषामिन्द्रियाणि वशे मनोनियन्त्रणे भवन्ति तेषां बुद्धिरपि सत्त्वगुणविशिष्टा भवति, ते सुधियो भवन्ति। अत आत्रेयप्रमुखास्ते ऋषयः सद्गुणोपेतास्तपस्विनो वस्तुतो जिज्ञासव आसन्।

आत्रेयप्रमुखाः महात्मनः जितेन्द्रियबुद्धयः आसन्।

'आत्रेयप्रमुखाः' इत्यस्याभिप्रायः 'ये ऋषयस्तत्र तथाभूतं भरतमुनिं प्रति गतास्तेषां प्रमुखो नेतृपदप्रतिष्ठितो महर्षिः आत्रेय आसीत्। स ऋषीणां मुख्यः प्रतिनिधिः। अत ऋषीणां पक्षतः स एव प्रश्नान् पप्रच्छ।

अद्भुतं विस्मयकरं विशालं नाट्यवेदमालक्ष्य ऋषीणां मनसि पञ्च प्रश्नाः समुदिताः। पृष्टाः प्रश्ना आसन्-

ऋषिभिः नाट्यविषये पञ्चप्रश्नाः भरतमुनिं सम्मुखं उपस्थापिताः।

प्रथमः प्रश्नः- ब्रह्मन् हे मुने ! अयं नाट्यवेदः कथमुत्पन्नः कथं निर्मितः?

द्वितीयः प्रश्नः- अयं नाट्यवेदः कस्य कृते निर्मितः?

तृतीयः प्रश्नः- नाट्यवेदस्य कति अङ्गानि ?

चतुर्थः प्रश्नः- किं प्रमाणो नाट्यवेदः?

पञ्चमः प्रश्नः- नाट्यवेदस्य प्रयोगः कीदृशः?

आत्रेयप्रमुखैः ऋषिभिरेते पञ्चप्रश्ना भरतमुनिसम्मुखमुपस्थापिताः। प्रथमः प्रश्नो

नाट्यवेदस्योत्पत्तिविषयकः। अनेन प्रश्नेन प्रयोजनमपि संल्लक्षितम्। द्वितीयः प्रश्नः स्पष्टतो नाट्यवेदस्याधिकारिविषये पृष्टः। तृतीयः प्रश्नो नाट्यवेदस्य स्वरूपमधिकृत्य पृष्टः। चतुर्थप्रश्ने प्रयुक्तं 'प्रमाण' इति पदं श्लिष्टम्। प्रमाणमायतनमाकारो वा। आकारविषयकः कलेवरविषयकोऽयं प्रश्नः। नाट्यवेदे कति श्लोकाः के च विभागाः। कुत्र कुत्र किं किं वस्तु। तेषां वस्तूनां किं प्रमाणं प्रत्यक्षमनुमानं शाब्दं वा। यतो हि, अप्रामाणिकं वस्तु प्रति न कश्चिच्छ्रद्दधति। नाट्यवेदस्य दृश्यश्रव्यत्वात्प्रत्यक्षमेवात्र प्रमाणम्। नाट्यं हि चाक्षुषं क्रतुः। वेदस्तु क्रतुविषयः। एवं नाट्यवेदस्य श्रोत्रं चक्षुश्चेति द्वे प्रमाणे। पञ्चमः प्रश्नः प्रयोगविषयकः। अत्र प्रयोगविधिः पृष्टः। प्रयोगस्तु वाचिकाङ्गिकाद्यभिनयः।

इत्थं प्रश्नानां लक्ष्यभूतः स नाट्यवेदो वेदसम्मितोऽस्ति। वेदेभ्यः प्रादुर्भूतोऽत एव वेदतुल्यः। 'आत्मैव जायते पुत्रः' इति न्यायादयंनाट्यवेदोऽपि वेदस्य एव तेभ्यो जायमानत्वात्। अतोऽस्य वेदरूपता। अपि च पञ्चमो वेदो नाट्यवेदः। आत्रेयप्रमुखास्ते ऋषयो 'महात्मानः' इत्युक्ताः। लोककल्याणानुरक्ता महात्मानः। लोकहितायैव ते यथाविधान् प्रश्नान् पृष्टवन्तो न त्वात्मानो ज्ञानार्थं हितार्थं वा। ते सिद्धाः स्वतपः प्रभावादेतादृशान् विषयान् स्वयं विज्ञातुमर्हन्ति किन्तु लोकहितायैतेषां प्रश्नानामुत्तराणि नाट्यकोविदस्य व्रतिनो भरतमुनेर्मुखादेव श्रोतुं श्रेयसि इति ते आप्तकामा ऋषयोऽस्मिन् विषये कृतोद्यमा बभूवुः।

ऋषीणां प्रश्नानाम् उत्तराणि।

**'तेषां तद्वचनं श्रुत्वा मुनीनां भरतो मुनिः।**
**प्रत्युवाच ततो वाक्यं नाट्यवेदकथां प्रति।।**
**भवद्भिः शुचिभिर्भूत्वा तथावहिततमानसैः।**
**श्रूयतां नाट्यवेदस्य सम्भवो ब्रह्मनिर्मितः।।**
**पूर्वं कृतयुगे विप्रा ! वृत्ते स्वायम्भवेऽन्तरे।**
**त्रेतायुगेऽथ सम्प्राप्ते मनोवैवस्वतस्य तु।।**
**ग्राम्यधर्मे प्रवृत्ते तु कामलोभवशं गतः।**
**ईर्ष्याक्रोधादिसम्मूढे लोके सुखितदुःखिते ।।**
**देवदानवगन्धर्वयक्षरक्षमहोरगैः।**
**जम्बूद्वीपे समाक्रान्ते लोकपालप्रतिष्ठिते ।।**
**महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः।**

**क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत् ।।**
**न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु ।**
**तस्मात्सृजापरं वेदं पञ्चमं सार्ववार्णिकम्।।**

भरतमुनेरुत्तरं नाट्यवेदोत्पतिः तेषामात्रेयप्रमुखानां मुनीनां तद्वचनं नाट्यवेदं (नाट्यशास्त्रं) प्रति तान् प्रश्नान् श्रुत्वा ब्रह्मणः शिष्यो नाट्यकोविदो भरतो मुनिरुत्तरं दातुं समुद्यतः । क्रमशः एकैकं प्रश्नमुत्तरितुं समुद्यतो बभूव। नाट्यवेदस्य वृत्तान्तमाख्यातुं सारगर्भितवचोभिः (वाक्यमित्यत्र, जातावेकवचनमि 'ति नियमादेकवचनम्) तानात्रेयप्रमुखान् मुनिवर्यान् प्रति समुचितमुत्तरं दातुमारब्धवान्। 'मुनीनां मुनिर्भरतः' इत्येवमप्यन्वयं कर्तुं शक्यते। 'यतश्च निर्धारणमि 'तिनियमात्। अत्र मुनीनां भरतः सर्वश्रेष्ठो मुनिः (नाट्यशास्त्रकर्तृकत्वात्) इत्यप्यर्थः प्रतीयते।

अशौचावस्थायां वेदविषयकं किमपि कर्म निषिद्धम्।

भरतमुनिस्तानृषीन् सम्बोध्य वक्तुमारब्धवान् श्रूयन्तां नाट्यवेदसम्बन्धानि मे वचासि। यथा ब्रह्मनिर्मितस्य नाट्यवेदस्य सम्भवः समुत्पत्तिरभूत्तथा सर्व प्रवक्ष्यामि। किन्तु श्रवणात्पूर्व भवन्तोऽवहितमानसा भवेयुः। कथाश्रवणे तु मानसं स्वयमेवावहितं भवति तस्याः रोचकत्वात्। आबालवृद्धाः दत्तावधानाः मनोयोगपूर्वकं कथां शृण्वन्ति। यतोहि कथायां सरसं वस्तु पदे पदे जिज्ञासां जनयति। तत्र मानसमवहितं कर्तुं यत्नो न विधेयः, तत्स्वयमेव भवति । किन्त्वत्र यच्छ्रोतव्यं तस्मिन् गूढं शास्त्रीयतत्त्वमपि विद्यते। अत एव, सप्रयत्नं सावधानमानसा भवितव्याः । ततोऽपि प्राक् शुचयो भवन्तु। यतो हि शुचिर्भूत्वैव वेदाध्ययनं, वेदश्रवणं वा कर्तव्यम्। एषः सर्वथाऽनुष्ठेयो धर्मः। अशौचावस्थायां वेदविषयकं किमपि कर्म निषिद्धम्। 'यस्योच्छ्वसिता वेदाः' इति वेदाः परमेश्वर इव परमपवित्राः। अयं नाट्यवेदोऽपि तेभ्यो वेदेभ्य एव समुत्पन्नः। अत एवाऽयमपि पवित्रः। अयं नाट्यवेदोऽपि परमपवित्रो भूत्वा श्रोतव्यः। शुचिताऽपि न केवलं कायेनाऽपितु मनसा वचसा कर्मणा च। अतः सर्वात्माभिर्भवद्भिः शुचिभिर्भूत्वेति साधूक्तम् ।

नाट्यवेदः ब्रह्मनिर्मितः।

पितामहेन ब्रह्मणा चतुरो वेदान् निर्माय नाट्यवेद आविष्कृत इति नाट्यवेदो ब्रह्मनिर्मित इत्युक्तवान् भरतमुनिः।

पुराकाले स्वायम्भुवे मन्वन्तरे यदा कृतयुगं (सत्ययुगम्) समाप्तिं गतमथ च वैवस्वते मन्वन्तरे त्रेतायुगं समारब्धः, तदा लोकस्य स्थितिः शोचनीया संवृत्ता। जनाः कामस्य लोभस्य च वशीभूता अधमकर्मसु प्रवृत्ताः । ये कामलोभाविष्टाः भवन्ति तेषां विवेकबुद्धिर्नश्यते। ते हीनवृत्तयः स्वार्थमेव पश्यन्ति । कामातुराः लोभोपहतचेतसः साहसिका भवन्ति । किमुचितं किं वानुचितमित्यपरीक्ष्यैव कर्म कुर्वन्ति। अतो ग्राम्यधर्मे प्रवृत्ता भवन्ति । ग्राम्ये ग्रामसम्बन्धिनि धर्मे स्वानुकूले स्वयंकल्पिते कर्मणि प्रवृत्ताः। यो धर्मः शास्त्रेण नानुमोदितः स ग्राम्यधर्मः । ग्राम्यधर्मप्रवृत्तिकारणात् लोके जना ईर्ष्यया क्रोधादिभिः विवेकभ्रष्टा मतिभ्रान्ताः, अत एव सुखदुःखानुभवकारिणो भूताः। यद्यपि कस्यचिदेकान्ततः सुखं दुःखं वा नोपनतम् तथापि ये सदाचारिणस्तेषां सुखमधिकं दुःखं तु स्वल्पम्, किन्तु ये दुराचारिणस्तेषां दुःखमधिकं सुखं तु स्वल्पमिति लोकः प्रमाणम्।

लोकपालैः प्रतिष्ठितो जम्बूद्वीपो यदा देवदानव-गन्धर्वयक्षरक्षोमहोरगैः समाक्रान्तः परिव्याप्तोऽभूत्। अत्र मानवजातीनामनुल्लेखात्तासामभावो न मन्तव्यः। देवदानवमध्यगतो हि मानवः। अतो देवादीनां कथनेन मानवजातेरपि ग्रहणम्। तदा महेन्द्रादिप्रमुखा देवाः पितामहं ब्रह्माणमुपसृत्य तमवोचन् यत् वयं क्रीडनीयकमिच्छामः । क्रीडनीयक' क्रीडा, सा क्रीडा तादृशी स्याद् यस्यां दृश्यं श्रव्यं भवेत्। अर्थात् तस्यां क्रीडायां दर्शनीयं श्रवणीयं च वस्तु भवेदिति। एतादृशी क्रीडाऽतः पूर्व नासीत् कृतयुगे। अतः पितामहो देवैः प्रार्थितः तादृशीं विलक्षणां दृश्यश्राव्यसंयुतां क्रीडां तेभ्यः प्रदातुम्। अपूर्वा खल्वियं प्रार्थना। यतो हि सर्वसुखप्रदाता वेदः सर्वश्राव्यो नास्ति । व्यवहारे शूद्रा वेदवर्जिताः। अतः सर्वेषां वर्णानामुपयोगिनं काञ्चिदपरं पञ्चमं वेदं रचयत्विति पितामहो देवैः प्रार्थितः।

सर्वेषां वर्णानां उपयोगिनं वेदं रचयत्विति देवैः ब्रह्म प्रार्थितः।

कृतयुगे सर्वे जनाः सुखिनो भवन्ति, न क्वचिद् दुःखलेशः। यतो हि कृतयुगः सत्त्वगुणप्रधानः, तस्मिन् युगे सत्यधर्मप्रवृत्तिः। अतः स्वे-स्वे धर्मपालनेऽभिरतानां जनानां
कृतेऽन्यस्य क्रीडनीयकस्याऽऽवश्यकतैव न भवति। त्रेतायुगे सत्त्वे रजसो मिश्रत्वात् जना दुःखिता भवन्ति। अतो दुःखापनोदनाय

नाट्यवेदं देवमानवाः अपि द्रष्टुं श्रोतुं चार्हन्ति।

कस्यचिदन्यस्य क्रीडनीयकस्यावश्यकताऽनुभूयते । अतोऽत्र पितामहो नाट्यवेदमाविष्कर्तुं प्रार्थितः। इमं नाट्यवेदं देवादिभिः सह सशूद्रा मानवा अपि द्रष्टुं श्रोतुं चार्हन्ति।

**'एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च।**
**सस्मार चतुरो वेदान् योगमास्थाय तत्त्ववित् ।।**
**धर्म्यमर्थ्यं यशस्यं च सोपदेशं ससङ्ग्रहम्।**
**भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम्।।**
**सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम्।**
**नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्।।**
**सङ्कल्प्यभगवानेवं सर्वान् वेदाननुस्मरन्।**
**नाट्यवेदंततश्चक्रे चतुर्वेदाङ्ङ्गसम्भवम्।।।**
**जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि ।।**

देवैः प्रार्थितः पितामह एवं कर्तुं स्वीकृत्य देवराजं महेन्द्र विससर्ज (तत्वानि वेत्तीति तत्त्ववित्) । ब्रह्मा सरहस्यं लोकं वेदं च विजानातीति तत्त्ववित् कथितः। स तत्त्ववेत्ता ब्रह्मा योगं समाधिमास्थाय, एकान्ते समाधौ स्थित्वा स्थिरचित्तो भूत्वेत्यर्थः। चतुरो वेदान् ऋग्यजुःसामाथर्वान् सस्मार स्मृतिपथ-मानीतवान्। स्मरणं नाम दृष्टानुभूतविषयाणामनुचिन्तनं मनसा दर्शनं वा। इत्थं सुस्थिरचित्तः सन् पितामहश्चतुरो वेदान् मनसा ददर्श। 'योगमास्थाय' इत्यत्र योगस्तु चित्तवृत्तिनिरोध एव, स एव समाधिः। समाधिदशायां वेदा ब्रह्मणो मानसे उपस्थिता, ततः स सङ्कल्पितवान् यदहं नाट्यसंज्ञकं पञ्चमं वेदं ज्ञानसंहिता करोमि। सद्य एवं करिष्यामीत्यर्थः। कीदृशं नाट्यवेदम् ? सेतिहासम् इतिहाससहितम्। अधुना य इतिहासः प्रथितः स नात्राभिप्रेतः। भारतीयपरम्परायां तु यः पुरुषार्थचतुष्टयोपदेशपूर्वकं पुरावृत्तमाख्याति स इतिहासः-

ब्रह्मा नाट्यसंज्ञकं पञ्चमवेदं अधिकृत्य सङ्कल्पितवान्।

**'धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।**
**इतिवृत्तकथायुक्तमितिहासं प्रचक्षते ।।'**

यथा रामायणम्, महाभारतम्। वेदार्थानामुपबृंहण-मितिहासयोगेन क्रियते।

पुनः कीदृशं नाट्यवेदम्? धर्म्यमर्थ्यम् धर्मार्थसाधनं यशस्यं यशः प्रापकम्। नाट्यवेदाद्धर्मादिपुरुषार्थचतुष्टयस्य

सिद्धिर्भवति। तदर्थ्यं च, तस्मादभिलषितपदार्थानां प्राप्तिर्भवति। यशस्यं च, भिन्नरुचीनां जनानां बहुधाप्येकं समाराधनमिति मनोरमत्वात् सर्वदिक्षु व्याप्तं भवति। सोपदेशमुपदेशजननम्। उपदेशोऽपि कान्तासम्मितः सरसः सर्वजनग्राह्यो हृद्यः। ससङ्ग्रहम् लोकोपकारकविषयाणां सङ्ग्रहेन सहितम्। तथा चागामिनि काले लोकहितपराणां सत्कर्मणामनुदर्शकं मार्गनिर्देशकम्। पुनश्च कीदृशम् ? सर्वशास्त्रार्थसम्पन्नं सर्वाणि शास्त्राणि सर्वशास्त्राणि । तेषां सर्वशास्त्राणामर्थाः सर्वशास्त्रार्थाः तैः (अर्थः) सम्पन्नं परिपूर्णम्। यस्मिन् सर्वाणि शास्त्राणि स्वकीयैरर्थैः सह सन्निविष्टानि तादृशं नाट्यवेदं निर्मितवान्। पुनरपि कीदृशम् ? सर्वशिल्पप्रवर्तकम्। सर्वेषां शिल्पानां प्रवर्तकम्। 'शिल्पमिति' पदेन कलानामपि ग्रहणं कार्यम् । इत्थं नाट्वेदे सर्वासां विद्यानां सर्वेषां शास्त्राणामितिहासादीनाञ्च सन्निवेशः प्रदर्शितः ।

नाट्यवेदात् धर्मादिपुरुषार्थचतुष्टयस्य सिद्धिर्भवति।

चत्वारि नाट्याङ्गानि स्मृतानि यानि विना नाट्यस्य कल्पनैव न भवितुं शक्यते। तानि सन्ति पाठ्यं गीतमभिनयोरसश्च । कस्माद् वेदात्किं नाट्याङ्ग गृहीतमिति सूचयति-

चत्वारि नाट्याङ्गानि- पाठ्यं,गीतं, अभिनयः, रसश्च।

ब्रह्मा ऋग्वेदात् पाठ्यं संवादं, सामवेदाद् गीतं, यजुर्वेदादभिनयमथर्ववेदाद्रसान् गृहीतवान्।नाट्यं संवादरूपं भवति। नाट्यस्य यदपि कथावस्तु तदभिनेतृमुखेन प्रयुक्तैः पाठ्यैः संवादैरेव प्रस्तूयते। पात्राणि तत्र परस्परं संवदन्ते। संवादानां प्रभावशालिनी प्रस्तुतिरेव नाट्यस्य साफल्यहेतुः। अतः पाठ्यस्य विशिष्टं महत्त्वम्। व्यक्तं सुस्पष्टमुच्चारणमेव पाठ्यम्। अत्र स्वराणामलङ्काराणां योजनया सुसज्जितमुच्चारणं काम्यम्। सुविहितं पाठ्यं समुचितसम्प्रेषणीयतां घटयति, अभिनयं च विशदयति। ऋग्वेदे स्तुतयः संवादतत्त्वानि चोपलभ्यन्ते, तेभ्य एव पाठ्यं गृहीतम्।

ऋग्वेदात् पाठ्यं संवादं, सामवेदाद् गीतं, यजुर्वेददभिनयमथर्ववेदाद्रसान् गृहीतवान्।

गीतं नाट्ये पाठ्यस्योपरञ्जकमभिनयस्य च जीवितम्। रसचर्वणापि गीतस्यानुयोगतः सिद्ध्यति। गीते वाद्यस्यापि समाहारः। यज्ञार्थं यजुर्वेदः । यज्ञकर्मणि प्रवृत्तानामृत्विजां विविधा आङ्गिकक्रियाश्चेष्टा वा भवन्ति, तेषां परिधानोष्णीषादिविषयेऽपि नियमा भवन्ति। अतो यजुर्वेदादभिनयान् जग्राह। एवमेव, विभावादिजीवितो

रसोऽपि अथर्ववेदाद् गृहीतः। इत्थं, चतुर्भ्यो वेदेभ्यः समुद्धृत्योद्धृत्य क्रमशः सर्वाण्यपि नाट्याङ्गानि, पाठ्यं, गीतमभिनयं रसांश्चादाय नाट्यवेदं निर्मितवान् पितामहो ब्रह्मा।

## Summarised Overview

प्रथमाध्याये नाट्योत्पत्तिवर्णनम्, वृत्तित्रयं, वृत्तिचतुष्टयं वा आश्रित्य नाट्यप्रयोगप्रारम्भस्य जिज्ञासा। कैशिकीवृत्तिनिरूपणम्, विधात्रा नाट्यवेदस्य रचना, तस्य प्रयोगः च वर्णयति। भरतमुनिः नाट्यवेदस्य ज्ञाता प्रयोक्ता च। सर्वेषां वर्णानां उपयोगिनं वेदं रचयत इति देवैः ब्रह्मा प्रार्थितः। ब्रह्मा नाट्यसंज्ञकं पञ्चमवेदं अधिकृत्य सङ्कल्पितवान्। नाट्यवेदात् धर्मादिपुरुषार्थचतुष्टयस्य सिद्धिर्भवति। चत्वारि नाट्याङ्गानि- पाठ्यं,गीतं, अभिनयः, रसश्च। ऋग्वेदात् पाठ्यं संवादं, सामवेदाद् गीतं, यजु-र्वेददभिनयमथर्ववेदाद्रसान् गृहीतवान्। चतुर्भ्यो वेदेभ्यः समुद्धृत्योद्धृत्य क्रमशः सर्वाण्यपि नाट्याङ्गानि, पाठ्यं, गीतमभिनयं रसांश्चादाय नाट्यवेदं निर्मितवान् पितामहो ब्रह्मा।

## Assignments

1. नाट्यशास्त्रस्य प्रयोजनम् प्रति विचारयत।
2. देवैः ब्रह्मा किं प्रार्थितः।
3. नाट्यवेदोत्पत्तिं विशदयत।
4. पुरुषार्थचतुष्टयं निरूपयत।
5. ऋग्वेदात् पाठ्यं जग्राह। विशदयत।

## Suggested Readings

1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

## References

1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice,Motilal Banarasidas Publishers, Delhi.1924

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# नाट्यप्रयोगः

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

नाट्यशास्त्रे प्रथमाध्याये मंगलाचरणानन्तरं नाट्यविषये आत्रेयादि महर्षयः भरतं प्रति प्रश्नान् पृच्छन्ति।तेषां प्रश्नानां समाधानं भरतमुनिः वदति। ब्रह्मा नाट्यसंज्ञकं पञ्चमवेदं अधिकृत्य सङ्कल्पितवान्। नाट्यवेदात् धर्मादिपुरुषार्थचतुष्टयस्य सिद्धिर्भवति। चत्वारि नाट्याङ्गानि- पाठ्यं,गीतं, अभिनयः, रसश्च। ऋग्वेदात् पाठ्यं संवादं, सामवेदाद् गीतं, यजुर्वेददभिनयमथर्ववेदाद्रसान् गृहीतवान्। तदनन्तरं नाट्यप्रयोगविषये विचारयति। तत् अस्मिन् एकके पश्यामः।

## Keywords

इन्द्रं प्रति ब्रह्मादेशः, रङ्गशाला, पञ्चमः वेदः, नायकगुणाः, पाठ्यप्रयोगः, भरतस्य शतपुत्राः, भारती, सात्वती, आरभटी, कौशिकी, वृत्तयः, अप्सरसां सृष्टिः, तासां नामानि, ध्वजमहोत्सवः।

## Discussion

नाट्यप्रयोगाय इन्द्रं प्रति ब्रह्मादेशः-

"वेदोपवेदैः सम्बद्धो नाट्यवेदो महात्मना।
एवं भगवता सृष्टः ब्रह्मणा सर्ववेदेना।।
उत्पाद्य नाट्यवेदं तु ब्रह्मोवाच सुरेश्वरम्।
इतिहासो मया सृष्टः स सुरेषु नियुज्यताम्।।
कुशला ये विदग्धाश्च प्रगल्भाश्च जितश्रमाः।
तेष्वयं नाट्यसंज्ञो हि वेदः सङ्क्राम्यतां त्वया।।

ब्रह्मा नाट्यवेदमुत्पाद्य तस्य प्रयोगाय रङ्गशालायां प्रदर्शनाय आदिदेश।

इत्थमुपर्युक्तविधिना विधिना नाट्यवेदः प्रकल्पितः। भगवान् ब्रह्मा वेदज्ञः। स वेदसम्बद्धानुपवेदानपि विजानाति । वेदज्ञो भगवान् ब्रह्मा महेन्द्रादिभिः प्रार्थितो नोदितश्च वेदोपवेदसम्बद्धं नाट्यवेदं रचयामास'। चतुर्णा वेदानामुपवेदा अपि चत्वारः ऋग्वेदस्याऽऽयुर्वेदः, यजुर्वेदस्य धनुर्वेदः, सामवेदस्य गन्धर्ववेदोऽथर्ववेदस्यच स्थापत्यवेद इति। ब्रह्मा त्विमान् सर्वान् वेत्ति। अत एव स सर्वविदिति प्रोक्तः । सृष्ठिरचनानिपुणस्य तस्य सर्ववेदित्वान्नाट्यवेदरचनायां सामर्थ्य स्पष्टमेव।

अथ नाट्यवेदमुत्पाद्य विनिर्माय ब्रह्मा सुरेश्वरं देवाधिराजं महेन्द्रं सम्बोध्य तस्य प्रयोगाय अभिनयाय रङ्गशालायां प्रदर्शनाय वाऽऽदिदेश। स कथितवान् यदयं नाट्यवेद इतिहासरूपो मयासृष्टः समुत्पादितो विनिर्मितो वा। अतः परमस्य प्रयोगोऽभीष्टः। यथा यजुर्वेदे वर्णितान् यज्ञान् तैस्तैर्विधिभिः यजमानाः सम्पादयन्ति तथैवायं नाट्यवेदोऽपि प्रयोगार्होऽभिनेयः । सोऽयं सुरेषु देवेषु नियुज्यतां प्रयुज्यताम् । इतः पूर्वमस्याध्यायस्य पञ्चदशे श्लोके कथितम् "नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्।" अत्र कथितम्- "इतिहासो मया सृष्टः" इति। द्वयोरपि वचनयोर्न कोऽपि भेदः। प्रथमवचनस्यैव संक्षिप्तानुवादो द्वितीयं वचनम्। इतिहासलक्षणं तु पूर्वं प्रदत्तमस्मिन्नेव क्रमे। इन्द्रोऽस्य नाट्यवेदस्याभिनयं देवैः कारयतु।

नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्

अपि सर्वे देवा नाट्यप्रयोगं कर्तुमर्हन्तीति शङ्कायां के तत्रोपयुक्ताः स्युरिति निर्दिशति पितामहः। एवं हि नायकगुणा आख्यायन्ते। यः कुशलो वस्तुग्रहणे तद्धारणे च सुयोग्यः, विदग्ध ऊहापोहकरणे समर्थः, समाजे सभायां वा वाग्व्यवहारे दक्षो

वाक्पटुः यश्च जितश्रमो नाभिनयपरिश्रान्तः स नाट्यप्रयोक्ताऽभिनेता नटीभूमिको वा भवितुमर्हति। एभिः गुणैः सम्पन्ना देवा येऽपि स्युस्तेऽत्र नाट्यप्रयोगे प्रयोक्तव्याः नेतरे। अनेनाभिनेतृणां चत्वारो गुणाः प्रोक्ताः।

**पाठ्यप्रयोगे देवानामसामर्थ्यमृषीणाञ्च सामर्थ्यम्'-**

पाठ्यप्रयोगे ऋषीणां सामर्थ्यम्।

पाठ्यवेदं निर्माय ब्रह्मणासुरेश्वरं प्रति यदुक्तं तन्निशम्यशक्रो विनतेन शिरसा बद्धाञ्जलिर्भूत्वा भगवन्तं पितामहं प्रणम्य निवेदितवान् यदेते देवा नाट्यप्रयोगे रङ्गकर्मणि अयोग्या असमर्थाः सन्ति। नाट्यतत्वानां ग्रहणे धारणे ज्ञाने प्रयोगे चैते नितान्तमशक्ताः सन्ति। एभिर्नाट्यप्रयोगो दुष्कर इत्यहं वेदिम। ये प्रमुखा देवास्ते तु स्वाधिकारेऽप्रमत्ता तन्निर्वाहे निरन्तरं निरताः। अतस्तेषां समयाभावः, अन्ये श्रमभीरवो नाट्यं प्रति रुचिं न प्रदर्शयन्ति, बलान्नियोजिताश्चेत्, प्रयोग एव न साधु स्यात्। अतो देवानां नाट्यप्रयोगे असामर्थ्यम् भवत्कृते न किमप्यवज्ञेयम्। य इमे ऋषयस्ते तपस्विनः सदाचारिणो व्रतिनो यमनियमपालने दृढसङ्कल्पा अत्तस्ते नाट्यप्रयोगं विधातुं शक्ताः समर्थाः। एते ऋषयो वेदानां रहस्यं जानन्ति । अतः समानविषयत्वान्नाट्यवेदस्य ग्रहणे, धारणे प्रयोगे च सामर्थ्यवन्तः । एतेषां प्रयोगः शास्त्रसम्मतः प्रशंसनीयो यशस्यश्च भविष्यति।

ब्रह्मा भरतमुनिं नाट्यवेदं प्रयोक्तुं निर्दिष्टवान्

शक्रेण निवेदितमसामर्थ्यसूचकं वचनं श्रुत्वाऽम्बुजसम्भवः कमलयोनिर्ब्रह्मा माम् भरतमुनिं नाट्यवेदं प्रयोक्तुं निर्दिष्टवान्। हे अनघ । निष्पाप ! भरतमुनिं प्रतीदं सम्बोधनं साभिप्रायम्। शक्रः पापकर्मा, पुराणान्यत्र प्रमाणम् । किन्तु शक्रप्रमुखैर्देवैब्रह्मा

**तच्छ्रुत्वा वचनं शक्रो ब्रह्मणा यदुदाहृतम्।**
**प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम् ।।**
**ग्रहणे धारणे ज्ञाने प्रयोगे चास्य सत्तम।**
**अशक्ता भगवन् देवा अयोग्या नाट्यकर्मणि ।।**
**य इमे वेदगुह्यज्ञा ऋषयः संशितव्रताः ।**
**एतेऽस्य ग्रहणे शक्ताः प्रयोगे धारणे तथा।।**
**श्रुत्वा तु शक्रवचनं मामाहाम्बुजसम्भवः।**
**त्वं पुत्रशतसंयुक्तः प्रयोक्ताऽस्य भवानघ।।**
**आज्ञापितो विदित्वाहं नाट्यवेदं पितामहात्।**
**पुत्रानध्यापयामास प्रयोग चापि तत्त्वतः ।।**

नाट्यवेदसर्जनायप्रार्थितः। अतः सृष्टे नाट्यवेदे तेषामेव प्रथमोऽधिकार इति नयनियमात्तस्य प्रयोगाय प्रथमं शक्रं एवं पितामहेन निर्दिष्टः। असमर्थस्य तस्यैव परामर्शाद्ब्रह्मा भरतमुनिं निर्दिष्टवान्। पुनश्च, यदि नाट्यवेदस्य श्रवणे शुचित्वमपेक्ष्यते तदा तु तस्य प्रयोगेऽनघत्वं निष्पापत्वं नितान्तमपेक्षितम्। अतः साभिप्रायं सार्थकञ्चेदं सम्बोधनम्। भरतमुनिरन्ये चर्षयो निष्पापाः। 'पुत्रशतसंयुतः त्वमस्य प्रयोक्ता भवे 'ति भरतमुनिः पितामहेनाज्ञप्तः।

भरतमुनिः ब्रह्मणैव नाट्यवेदः शिक्षितः।

एवमाज्ञापितो भरतमुनिः प्रथमं तु ब्रह्मणैव नाट्यवेदः शिक्षितः। ब्रह्मा भरतं नाट्यवेदमध्यापयामास । ततः प्रशिक्षितो भरतमुनिः स्वपुत्रान् सरहस्यं नाट्यवेदमध्यापयामास। तस्य सुनिपुणं प्रयोगञ्चापि कारयामास। अत्र शिष्या एव पुत्रा मन्तव्याः।

**भरतपुत्राणां संख्या तेषाञ्च नामानि-**

'पुत्रशतसंयुक्तः' इति पितामहवचनात् भरतपुत्राणां संख्या शतमिति ज्ञायते ।अत्रैव प्रथमाध्याये तेषां नामानि कीर्तितानि-

भरतपुत्राणां संख्या शतमिति ज्ञायते।

शाण्डिल्य, वात्स्यः, कोहलः, दत्तिलः, जटिलः, अम्बष्टः, तण्डुः, अग्निशिखः, सैन्धवः, पुलोमा, शाद्वलि, विपुलः, कपिञ्जलिः, बादरिः, यमः, घूम्रायणः, जम्बुध्वजः, काकजङ्ङ्घः, स्वर्णकः, तापसः, कैदारिः, शालिकर्णः, दीर्घगात्रः, शालिकः, कौत्सः, ताण्डायनिः, पिङ्गलः, चित्रकः, बन्धुलः, भल्लकः, सुष्टिकः, सैन्धवायनः, तैत्तिलः, भार्गवः, शुचिः, बहुलः, अबुधः, बुधसेनः, पाण्डुकर्णः, केरलः, ऋजुकः, मण्डकः, शम्बरः, वञ्जुलः, मागधः, सरलः, कर्ता, उग्रः, तुषारः, पार्षदः, गौतमः, बादरायणः, विशालः, शबलः, सुनाभः, मेषः, कालियः, भ्रमरः, पीठमुखः, मुनिः, नखकुट्टः, अश्मकुट्टः, षट्पदः, उत्तमः, पादुकः, उपानहः, श्रुतिः, चाषस्वरः, अग्निकुण्डः, आज्यकुण्डः, वितण्ड्यः, ताण्ड्यः, कर्तराक्षः, हिरण्याक्षः, कुशलः, दुःसहः, लाजः, भयानकः, बीभत्सः, विचक्षणः, पुण्ड्राक्षः, पुण्ड्रनासः, असितः, सितः,

विद्युज्जिह्वः, महाजिह्वः, शालङ्कायनः, श्यामायनः, माढरः, लोहिताङ्ङ्गः, संवर्तकः, पञ्चशिखः, त्रिशिखः, शिखः, शंखवर्णमुखः, षण्डः, शङ्कुकर्णः, शक्रनेमिः, गभस्तिः, अंशुमाली, शठः, विद्युतः, शातजङ्ङ्घः, रौद्रः वीरश्च। अत्र पञ्चाधिकशतं नामानि सन्ति। चिन्त्यमेतत्। एते यथायोग्यं भूमिकासु नियोजिताः।

भरतपुत्राणां नामांनि

नाट्यशास्त्रं प्रति जिज्ञासावशान्मुनयो भरतमुनिं पृष्टवन्तः। भरतमुनिस्तैः कृतानां पञ्चप्रश्नानामुत्तरं ददौ। इन्द्रप्रमुखैर्देवैः प्रर्थितो ब्रह्मण वेदेभ्यः पाठ्यमभिनयं गीतं रसञ्च गृहीत्वा नाट्यवेदं चकार। प्रथमं तस्य प्रयोगाय महेन्द्रमादिष्टवान्। स सविनयमस्वीकृतवान्। ततो भरतमुनिं ब्रह्मा नाट्यवेदं प्रयोक्तुमादिदेश। भरतमुनिराज्ञां स्वीकृत्य स्वशतपुत्रानध्यापयामास ।

**नाट्यवृत्तयः-**

**'भारतीं सात्वतीं चैव वृत्तिमारभटी तथा।**
**समाश्रितः प्रयोगस्तु प्रयुक्तो वै मया द्विजाः।।**
**परिगृह्य प्रणम्याथ ब्रह्मा विज्ञापितो मया।**
**अथाह मां सुरगुरुः कैशिकीमपि योजय।।**
**यच्च तस्याःक्षमं द्रव्यं तद् ब्रूहि द्विजसत्तम ।**
**एवं तेनास्म्यभिहितः प्रयुक्तश्च मया प्रभुः ।।**
**दीयतां भगवन् द्रव्यं कैशिक्याः सम्प्रयोजकम् ।**
**नृत्ताङ्गहारसम्पन्ना रसभावक्रियात्मिका।।**
**दृष्टा मया भगवतो नीलकण्ठस्य नृत्यतः ।**
**कैशिकी श्लक्ष्णनेपथ्या शृङ्गाररससम्भवा।।**
**अशक्या पुरुषैः सा तु प्रयोक्तुं स्त्रीजनादृते।**
**ततोऽसृजन् महातेजा मनसाऽप्सरसो विभुः।।**

भारती, सात्त्वती आरभटी कौशिकी च - वृत्तयः

अथ भरतमुनिः स्वपुत्रानभिहितवान् यन्मयाऽभिनयस्योपक्रमः कृतः यो भारतीं सात्त्वतीमारभटीं च वृत्तिं समाश्रितः। ततो ब्रह्माणमुपगम्य प्रणम्य चैतत्सूचितवान्। तदा ब्रह्मा, त्रिभिवृत्तिभिः सह कैशिकीं वृत्तिमपि योजयेति तमाज्ञापितवान्। अत्र वृत्तीनां केवलमुल्लेखः। वृत्तिववरणं तु नाट्यशास्त्रस्य द्वाविंशेऽध्याये सविस्तरं प्रदत्तम्। किन्तु प्रसङ्गप्राप्तोऽयं विषयः संक्षेपतो विमृश्यते। नाट्यवृत्तयश्चतुर्भेदा मताः। ताः सन्ति-

भारती सात्त्वती आरभटी कैशिकी च। यथा नाट्याङ्गङ्गानि पाठ्यप्रभृतीनि वेदेभ्यः समुत्पन्नानि तथैव वृत्तयोऽपि वेदेभ्यः समुत्पन्नाः -

ऋग्वेदात् भारती

यजुर्वेदात् सात्त्वती

**ऋग्वेदाद् भारती क्षिप्ता यजुर्वेदाच्च सात्त्वती ।**
**कैशिकी सामवेदाच्च शेषा चाथर्वणादपि ।।**

अर्थात्, ऋग्वेदाद् भारतीवृत्तिः यजुर्वेदात्सात्त्वती वृत्तिः सामवेदात् कैशिकीवृत्तिरथर्ववेदाच्चारभटी वृत्तिः समुत्पन्ना । वृत्तीनामुत्पत्तिसम्बन्धेऽन्या अपि मान्यताः सन्ति। प्रकृतप्रसङ्ग तासां नोपयोगोऽतो विस्तरेणालम् । भारतीवृत्तिर्वर्वाग्व्यहारप्रधाना संस्कृतप्राया पुरुषपात्रप्रयोज्या भवति । भरतैः प्रयुज्यमानत्वात् सेयं भारतीत्युक्ता-

**या वाक्प्रधाना पुरुषप्रयोज्या स्त्रीवर्जिता संस्कृतवाक्ययुक्ता।**
**स्वनामधेयैः भरतैः प्रयुक्ता सा भारती नाम भवेत्तु वृत्तिः।।**

सामवेदात् कौशिकी

अथर्ववेदात् आरभटी

भरतैः इति पदेनात्र भरतपुत्राः नाट्यकलानिपुणा नटा अभिमताः। वाग्व्यापारात्मकत्वादियं भारती वृत्तिः सर्वत्राभिव्याप्ता भवति। अस्याश्चत्वारो भेदाः- प्ररोचना, आमुखम् ,वीथी, प्रहसनञ्च भवन्ति । वस्तुतः एतान्यङ्गानि कथितानि भारतीवृत्तेः । अत्र वीथीप्रहसने न नाट्य (रूपक) भेदौ।

**सात्त्वतीवृत्तिः -** सत्त्वमुख्या मानसव्यापारप्रधाना भवति । अस्यां वृत्तौ वाचिकाङ्गिकचेष्टाबाहुल्यं भवति। शोकस्य हर्षस्य चाधिक्यमस्या वैशिष्ट्यम्। वीराद्भुतरौद्ररसेष्वियं वृत्तिर्विशेषतया प्रयुज्यते। उद्धतैः पुरुषैरेषा प्रयोज्या भवति-

सत्त्वमुख्या मानसव्यापारप्रधाना सात्त्वतीवृत्तिः

**या सात्त्वतेनेह गुणेन युक्ता न्यायेन वृत्तेन समन्विता च।**
**हर्षोत्कटा संहृतशोकभावा सा सात्त्वती नाम भवेत्तु वृत्तिः ॥**

अस्या अप्यङ्ङ्गानि चत्वारि मतानि उत्थापकः परिवर्तकः संल्लापकः सङ्घात्यश्च ।

**कैशिकीवृत्ति :-** सुकुमारवेशभूषाभिर्विचित्रा प्रसाधिता नृत्यगीतादिबहुला, स्त्रीप्राया, शृङ्गाररसात्मिका स्त्रीपुरुषयोः शृङ्गारव्यापारयुता प्रोक्ता-

**या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंयुता या बहुनृत्तगीता।**
**कामोपभोगप्रभवोपचारा तां कैशिकीं वृत्तिमुदाहरन्ति।।**

नाट्यदर्पणे, स्त्रीणां ललितव्यवहारयुता वृत्तिरेव कैशिकीवृत्तिरित्युक्तम्। कैशिकीवृत्तेरपि चत्वारि अङ्ङ्गानि

नर्म, नर्मस्फिञ्जः, नर्मस्फोटः, नर्मगर्भश्च । आरभटीवृत्तिस्तु- दम्भाहङ्कारकपटछलप्रपञ्चपर्योक्तिबहुला ज्ञेया। उत्साहसम्पन्न- भटव्यापाराश्रयाऽऽरभटी। अत्र मायेन्द्रजालोपतन- कूर्दनमययुद्धप्रदर्शनम्-

**प्रस्तावपातप्लुतलङ्घितानि चान्यानि मायाकृतमिन्द्रजालम्।**
**चित्राणि युक्तानि च यत्र नित्यं तां तादृशीमारभटीं वदन्ति ॥**

यस्यां वृत्तौ भटानां शूरवीरणां चेष्टा- बाहुल्यं सा वृत्ति- रारभटी।

नाट्यदर्पणानुसारेण यस्यां वृत्तौ भटानां शूरवीरणां चेष्टाबाहुल्यं सा वृत्तिरारभटी। एषा नाट्यवृत्तिः कायिकयाचिकमानसिकप्रभृतिभिरभिनयैः सम्पन्ना भवति। आरभटीवृत्तेरपि संक्षिप्तावपातवस्तूत्थापनसम्फेटसंज्ञकानि चत्वारि अङ्गानि।

**अप्सरसां सृष्टिस्तासां च नामानि -**

'यच्च तस्याः क्षमं द्रव्यं तद् ब्रूहि द्विजसत्तम' इति पितामहे प्रोक्ते सति, भरतमुनिस्तं ययाचे - 'दीयतां भगवन् द्रव्यं कैशिक्यां सम्प्रयोजकम्' इति । तथेत्युक्त्वा परमतेजः सम्पन्नो विभुर्ब्रह्मा मनसाऽऽप्सरसोऽसृजत्। सृष्ट्वा च प्रयोगार्थं भरताय ददौ -

**ततोऽसृजन्महातेजा मनसाप्सरसो विभुः।(1.46)**

ब्रह्मणा कैशिकीप्रयोगार्थं सृष्टास्ता अप्सरसो जन्मनैव निसर्गतः नाट्यालङ्कारप्रयोगचतुराः कुशलाः निपुणाः आसन्। तासामप्सरसां नामानि सन्ति'**(1.47)** - मञ्जुकेशी, सुकेशी, मिश्रकेशी, सुलोचना, सौदामिनी, देवदत्ता, देवसेना, मनोरमा, सुदती, सुन्दरी, विदग्धा, विपुला, सुमाला, सतन्तिः, सुनन्दा, सुमुखी, मागधी, अर्जुनी, सरला, केरला, धृतिः नन्दा, सुपुष्कला, कलभा च। एताश्चतुर्विंशतिसंख्याका अप्सरसः पितामहस्य मनसः सङ्कल्पात् सद्य एव प्रादुर्भूताः प्राप्ताश्च भरतमुनिना, स्वयं ब्रह्मणा प्रदत्ता कैशिकी प्रयोगाय।

अप्सरसां नामानि

**नारदादिगन्धर्वाणां गानवाद्यप्रयोगः'-**

**स्वातिर्भाण्डनियुक्तस्तु सह शिष्यैः स्वयम्भुवा।**
**नारदाद्याश्च गन्धर्वा गानयोगे नियोजिताः ।।**

ब्रह्मा स्वातिं तस्य शिष्यैः सह भाण्ड (वाद्य) वादनार्थं नियुक्तवानपि च नारदाद्यान् गन्धर्वान् गानकर्मणि नियोजितवान्। स्वातिर्नाम मुनिः क्वश्चित् वर्षासु

नारदाद्यान् गन्धर्वान् गानकर्मणि नियोजितवान्

निपतज्जलधाराभिराहतपुष्कर (कमल) दलानां वर्णध्वनियोगानुहरणात् पुष्करवाद्यं निर्मितवानित्यभिनव भारत्यामुल्लेखः। ब्रह्मणो मानसपुत्रो नारदोऽपि वीणाया आविष्कारको वीणास्यरीति प्रथितः। पितामहेन ब्रह्मणा द्वावप्येतौ नाट्यकर्मणि शिष्यैः सह नियोजितौ। एवं हि भरतमुनिप्रयुक्ते नाट्येऽनयोरपि साहाय्यम्। स्वातिना सह तस्य शिष्याः भाण्डे नियुक्ताः, नारदेन सह गन्धर्वा गाने नियुक्ताः।

**नाट्यस्य प्रथमः प्रयोगः –**

**"एवं नाट्यमिदं सम्यग् बुद्ध्वा सर्वैः सुतैः सह।।**

**स्वातिनारदसंयुक्तो वेदवेदाङ्ङ्गकारणम्।**
**उपस्थितोऽहं लोकेशं प्रयोगार्थं कृताञ्जलिः।।**
**नाट्यस्य ग्रहणं प्राप्तं ब्रूहि किं करवाण्यहम् ।**
**एतत्तु वचनं श्रुत्वा प्रत्युवाच पितामहः।।**
**महानयं प्रयोगस्य समयः समुपस्थितः ।**
**अयं ध्वजमहः श्रीमान्महेन्द्रस्य प्रवर्तते।।**
**अत्रेदानीमयं वेदो नाट्यसंज्ञः प्रयुज्यताम्।।**

नाट्यस्य प्रथमः प्रयोगः।

एवं ग्रहणधारणाभ्यासबलेन भरतमुनिः स्वपुत्रैः (शिष्यैः) अप्सरोभिश्च सह नाट्यप्रयोगाय सुसज्जः स्वातिनारदसंयुतो ब्रह्माणमुपगम्य तमुक्तवान् यदिदं नाट्यमस्माभिः सर्वथाऽधिगतम्। साम्प्रतं वयं प्रयोगार्थ सज्जाः स्म। कृपयाऽऽदिशतु, किं करणीयमधुना ? भरतमुनेर्निवेदनं निशम्य ब्रह्मा तमुवाच यन्नाट्यप्रयोगस्यायमुपयुक्तः शोभनः कालः समागतः। इदानीमिन्द्रस्य ध्वजमहोत्सवः प्रवर्तते। अस्मिन्नेव ध्वजमहोत्सवे नाट्यवेदस्य प्रयोगं कर्तुं युज्यते। एवं तस्मिन्नवसरे महेन्द्रस्य विजयोल्लसिते ध्वजमहोत्सवे नाट्यस्य प्रथमः प्रयोगः प्रारब्धः।

**नान्दीपाठः –**

**'पूर्व कृता मया नान्दी ह्याशीर्वचनसंयुता ।**

**अष्टाङ्ङ्गपदसंयुक्ता विचित्रा वेदनिर्मिता।।**

नान्दी हि आशीर्वचनसंयुता

'नान्दी' तु प्रथमं नाट्यग्रहणधारणकाले एव प्रयोगदृष्ट्याभरतमुनिना निर्मिता आसीत् । अष्टाङ्ङ्गपदसंयुतेयं नान्दी आशीर्वचनसंयुता भवति। यथा वेदेभ्यो नाट्याङ्गानि, नाट्यवृत्तयस्तथैवेयं नान्दी अपि वेदेभ्यः एव निर्मिता। नाट्यशास्त्रस्य पञ्चमेऽध्याये नान्दीविधानं वर्णितम् -

**आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते।**
**देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥5.24॥**
**सूत्रधारः पठेत्तत्र मध्यमं स्वरमाश्रितम्।**
**नान्दीं पदैर्द्वादशभिरष्टाभिर्वाप्यसंस्कृताम् ॥ 5.107॥**

अर्थात्, आशीर्वचनसंयुतं मङ्गलमनुष्ठानम्। अस्यां देवद्विजनृपादीनामाशीर्वचोयुक्ता स्तुतिः प्रेक्षकाणां च प्रयोक्तृणां कृते मङ्गलाशंसा नान्दी विधीयते ।अस्याः प्रयोगतः सर्वे नन्दति, अतः इयं नान्दीति कथ्यते। कोशेषु नान्द्यार्युत्पत्तिर्लभ्यतेनन्दन्ति देवताः अस्यामिति । अष्टाङ्गानि- नामाऽऽख्यातोपसर्गनिपातसमासतद्धितसन्धिविभक्तयः। नाट्यशास्त्रस्य पञ्चमेऽध्याये नान्दी अष्टपदा द्वादशपदा चोक्ता 'भावप्रकाशने' शारदातनयो नान्दीं परिभाषते- 'नन्दयति सभ्यानिति नान्दी'। नाट्यप्रदीपे नान्दीशब्दस्य व्युत्पत्तिप्रदर्शिता -

**नन्दन्ति काव्यानि कवीन्द्रवर्गाः कुशीलवा पारिषदाश्च सन्तः।**
**यस्मादलं सज्जनसिन्धुहंसी तस्मादियं सा कथितेह नान्दी ।।**

नान्दीविषये क्वचिदन्यत्रेदमपि समुपलभ्यते-

**'नन्दी वृषः कोऽपि महेश्वरस्य रङ्गत्वमादौ किल खे जगाम ।**
**तद्रङ्गमुद्दिश्य कृतां तु पूजां नान्दीति तां नाट्यविदो वदन्ति ।।'**

नान्दी- देवनृपतिप्रजाकविनटप्रेक्षकाणां मङ्गल-कामनाभिरधिष्ठिता।

एवं नान्दी, देवनृपतिप्रजाकविनटप्रेक्षकाणां मङ्गल-कामनाभिरधिष्ठिता। अनया कवयोऽभिनेतारः सामाजिकाश्च सर्वे प्रसादमधिगच्छन्ति ।

## Summarised Overview

नाट्यवेदं निर्माय ब्रह्मा नाट्यं प्रयोक्तुं प्रथमं शक्रमामन्त्रितवान् किन्तु स समुद्यतो नाभूत्। ततः कार्यमेतत् भरतमुनये समर्पितम्। स स्वकीयैः पुत्रैः सह नाट्यं प्रयोक्तुं समुद्यतस्तान् नाट्यवेदमध्यापयामास। ततस्ते नाट्याभिनये प्रवृत्ता बभूवुः।भारती, सात्त्वती आरभटी कौशिकी च – वृत्तयः। ऋग्वेदात् भारतीयजुर्वेदात् सात्त्वती सामवेदात् कौशिकी अथर्ववेदात् आरभटी समुत्पन्ना। ब्रह्मणा कैशिकीप्रयोगार्थं सृष्टास्ता अप्सरसो जन्मनैव निसर्गतः नाट्यालङ्कारप्रयोगचतुराः कुशलाः निपुणाः आसन्। महेन्द्रस्य विजयोल्लसिते ध्वजमहोत्सवे नाट्यस्य प्रथमः प्रयोगः प्रारब्धः।

## Assignments

1. चतुर्विधवृत्तयः निरूपयत।
2. ब्रह्म सुरेशं प्रति किम् उक्तवान् ?
3. ब्रह्म भरतमुनिं किमादिदेश ?
4. नाट्यप्रयोगम् संक्षिप्य लिखत।
5. नान्दीपाठं विशदयत।

## Suggested Readings

1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

## References

1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice,Motilal Banarasidas Publishers, Delhi.1924

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# नाट्यगृहविशेषः

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

तत्रोपस्थिताः विरूपाक्षप्रमुखाः दैत्या इदं नाट्यप्रयोगं प्रेक्ष्य क्षुब्धा जाताः। असहमानास्ते विघ्नरूपाः सर्वे मायामाश्रित्याऽभिनेतृणां वाणीं चेष्टां स्मृतिं च स्तब्धवन्तः। तदा महेन्द्रस्तथाभूतं नाट्यावरोधं दृष्ट्वा तत्कारणं ज्ञातुं ध्यानावस्थायामिन्द्रोऽपश्यद्यत्सा नाट्यसभा परिवेष्टिता खलु दैत्यदानवविघ्नैः, अपि चाभिनेतारः सूत्रधारश्च नष्टसंज्ञाः जडीभूताः। ततो वेगात्समुत्थाय देवराट् ते दिव्यंध्वजं (यद्भरतेभ्यः पूर्व प्रदत्तं तन्त्र चावस्थितमासीत्) गृहीत्वा तेन सर्वान् रङ्गपीठस्थान् विघ्नान जर्जरीकृतवान्। तेनैव ध्वजप्रयोगेण सर्वेऽसुरा अपि जर्जरीकृता विनष्टाः ।शक्रध्वज एव जर्जरः-

एवं शक्रेण ध्वजप्रयोगतः सर्वैः दानवैः सह विघ्नेषु निहतेषु तत्रोपस्थिताः समे देवाः प्रहृष्टाः। तेदेवा ऊचुः- अहो भरत! त्वया तु शक्रप्रदत्तं ध्वजरूपमिदंदिव्यं प्रहरणं समासादितम्। यतो हि ध्वजेनानेन सर्वेषां दानवानामङ्गानि जर्जरीकृतानि विघ्नाश्चापोहिताः। दानवा विघ्नाश्चानेन जर्जरीकृता अतोऽयं ध्वजः 'जर्जर' इति संज्ञया प्रसिद्धो भविष्यति। येहिंसका अत्र विघ्नमुत्पादितुकामा अवशिष्टा अथवाऽऽगमिष्यन्ति।

## Keywords

नाट्यगृहम्, दानवानां विघ्नोत्पादनम् जर्जरोपयोगं च, शक्रस्य ध्वजप्रयोगः, नाट्यप्रयोजकानां रक्षकः, पितामहः, नाट्यगृहसंरक्षणम्, नेपथ्यरक्षणम्।

## Discussion

**नाट्यगृहविशेषः**

**दानवैर्विघ्नोत्पादनं जर्जरोपयोगश्च -**

दानवैः विघ्नोत्पादनम् जर्जरप्रयोगं च।

नान्द्यन्ते देवैर्दैत्यजयमूलकं नाट्यमभिनीतम्। 'अनुकृतिर्बद्धा' इत्यत्र, अनुकृतिः नानावस्थानुकरणं तदेव नाट्यम् 'अवस्थानुकृतिर्नाट्यम्'। बद्धा अभिनीता अस्यां देवासुरसङ्ग्रामानुकृतौ रोषपूर्णवाक्यानि 'रोषग्रथितवाक्यं तु सम्फेटः परिकीर्तितः।'(नाट्यशास्त्र. 19.88), (संवादाः) भयत्रासयुतं पलायनं 'नृपाग्निभयसंयुक्तः सम्भवो विद्रवः स्मृतः।' (तत्रैव, 19.87), अथवा शङ्काभयत्रासकृतो विद्रवः समुदाहृतः' (तत्रैव पाठान्तरम्) 'शस्त्रास्त्रप्रहाराश्चासन्'। तेन नाट्याभिनयेन प्रीताः ब्रह्मदेवादयः प्रेक्षकाः सामाजिकाः भरताय भरतपुत्रेभ्योऽप्सरोजनाय च बहून्यमूल्यवस्तूनि समुपहृतवन्तः। प्रीतो महेन्द्रो ध्वजं, ब्रह्मा कुटिलकं (वक्रकाष्ठदण्डम्) वरुणो भृङ्गम्, सूर्यश्छत्रं, शिवः सिद्धि, वायुर्व्यजनं, विष्णुः सिहासनं, कुबेरो मुकुट सरस्वती च नाट्यस्यश्राव्यत्वं ददौ। अवशिष्टा अन्ये देवगन्धर्वयक्षराक्षसनागाः भावरसरूपबलक्रियार्ददुः।

तत्रोपस्थिताः विरूपाक्षप्रमुखाः दैत्या इदं नाट्यप्रयोगं प्रेक्ष्य क्षुब्धा जाताः। असहमानास्ते विघ्नरूपाः सर्वे मायामाश्रित्याऽभिनेतृणां वाणीं चेष्टां स्मृतिं च स्तब्धवन्तः। तदा महेन्द्रस्तथाभूतं नाट्यावरोधं दृष्ट्वा तत्कारणं ज्ञातुं ध्यानावस्थायामिन्द्रोऽपश्यद्यत्सा नाट्यसभा परिवेष्टिता खलु

दैत्यदानवविघ्नैः, अपि चाभिनेतारः सूत्रधारश्च नष्टसंज्ञाः जडीभूताः। ततो वेगात्समुत्थाय देवराट् ते दिव्यंध्वजं (यद्धरतेभ्यः पूर्व प्रदत्तं तन्त्र चावस्थितमासीत्) गृहीत्वा तेन सर्वान् रङ्गपीठस्थान् विघ्नान जर्जरीकृतवान् । तेनैव ध्वजप्रयोगेण सर्वेऽसुरा अपि जर्जरीकृता विनष्टाः ।

शक्रध्वज एव जर्जरः-

शक्रेण ध्वजप्रयोगतः सर्वैः दानवैः सह विघ्नेषु निहतेषु देवाः प्रहृष्टाः

एवं शक्रेण ध्वजप्रयोगतः सर्वैः दानवैः सह विघ्नेषु निहतेषु तत्रोपस्थिताः समे देवाः प्रहृष्टाः। ते देवा ऊचुः- अहो भरत! त्वया तु शक्रप्रदत्तं ध्वजरूपमिदंदिव्यं प्रहरणं समासादितम्। यतो हि ध्वजेनानेन सर्वेषां दानवानामङ्गानि जर्जरीकृतानि विघ्नाश्चापोहिताः। दानवा विघ्नाश्चानेन जर्जरीकृता अतोऽयं ध्वजः 'जर्जर' इति संज्ञया प्रसिद्धो भविष्यति। येहिंसका अत्र विघ्नमुत्पादितुकामा अवशिष्टा अथवाऽऽगमिष्यन्ति

**"तदन्तेऽनुकृतिर्बद्धा यथा दैत्याः सुरैर्जिताः।**
**सम्फेटविद्रवकृता छेद्यभेद्याहवात्मिका।।**
**"अहो प्रहरणं दिव्यमिदमासादितं त्वया।**
**जर्जरीकृतसर्वाङ्गा येनैते दानवाः कृताः ।।**
**यस्मादनेन ते विघ्नाः सासुराः जर्जरीकृताः।**
**तस्माज्जर्जर एवेति नामतोऽयं भविष्यति ।।**
**हिंसार्थमुपयास्यन्ति हिंसकाः।**
**दृष्ट्वैव जर्जरं तेऽपि गमिष्यन्त्येवमेव तु ।।**
**एवमेवास्त्विति ततः शक्रः प्रोवाच तान् सुरान्।**
**रक्षाभूतश्च सर्वेषां भविष्यत्येव जर्जरः ।।**

महेन्द्रः नाट्यप्रयोजकानां रक्षकः भविष्यति।

तेऽस्य जर्जरस्य दर्शनमात्रेण विफलमनोरथा अपयास्यन्ति विनश्यन्ति वा। देवराजो महेन्द्रः तथाभूतं जर्जरमनुमन्याऽभिहितवान् यदयं जर्जरः सर्वेषां नाट्यप्रयोजकानां रक्षको भविष्यति ।

जर्जरस्य पूजनविधिः नाट्यशास्त्रस्य तृतीयेऽध्यायेऽपि च निर्माणविधिस्त्रयोविंशाध्याये वर्णितोऽस्ति । निर्माणविधौ जर्जरस्य प्रमाणमत्र दीयते। जर्जरः पुष्टवेणुदण्डेन निर्मितः स्यात्। अथ प्रमाणम् -

**प्रमाणतोऽङ्गुलानाञ्च शतमष्टोत्तरं भवेत्।**
**पञ्चपर्व चतुर्ग्रन्थिस्तालनात्रस्तथैव च।।**

अथ जर्जरं रङ्गपीठे यथास्थानं स्थापयित्वा तं यथाविधि पूजयेत्।पूजयित्वा तु सर्वाणि देवतानि यथाक्रमम्। जर्जरस्त्वभिसम्पूज्यः स्यात्ततो विघ्नजर्जरः ।। श्वेतं शिरसि वस्त्रं स्यान्नीलं रौद्रे च पर्वणि । विष्णुपर्वणि वै पीतं रक्तं स्कन्दस्य पर्वणि ।। मृडपर्वणि चित्रं तु देयं वस्त्रं हितार्थिना। सदृशं च प्रदातव्यं धूपमाल्यानुलेपनम्।। सर्वमेवं विधिं कृत्वा गन्धमाल्यानुलेपनैः । विघ्नजर्जरणार्थं तु जर्जरं त्वभिमन्त्रयेत्।। अत्र विघ्नविनाशार्थं पितामहमुखैस्सुरैः । निर्मितस्त्वं महावीर्यो वज्रसारो महातनुः ।। शिरस्ते रक्षतु ब्रह्मा सर्वैर्देवगणैः सह। द्वितीयं च हरः पर्व तृतीयं च जनार्दनः।। चतुर्थं च कुमारस्ते पञ्चमं पन्नगोत्तमः। नित्यं सर्वेऽपि पान्तु त्वां सुरार्थे च शिवो भव ॥

(ना.शा. ३.७३-८०)

**नाट्यगृहनिर्माणम्**

जर्जरस्थापनपूजनानन्तरं भरतमुनिः पुनरपि विशदंनाट्यप्रयोगमकरोत्। तदानीं ये विघ्नावशिष्टय आसन् ते पुनः त्रासदायकमुपद्रवं चक्रुः । दैत्यानां तां प्रतिशोधभावनामालक्ष्य भरतमुनिः स्वपुत्रैः सह ब्रह्माणमुपगतवान्। सनिवेदितवान् यदेभिर्दैत्यैर्विघ्नोत्पादनं सुनिश्चितम्। अतो भवता नाट्यरक्षणोपायो विधेयः। यथा नाट्यं निर्विघ्नं समपद्येत्तथा रक्षणं कर्तव्यमित्यर्थः। भरतस्य वचः श्रुत्वा नाट्यवेदकर्ता पितामहो विश्वकर्माणमाहूय शुभक्षणसम्पन्नं नाट्यगृहं निर्मातुं समादिदेश। विश्वकर्मा तु देवानां स्थपतिर्विचित्राद्भुतभवनानां रचयिता। एवमादिष्टः सोऽपि दिव्यशक्तिसम्पन्नोऽचिरेणैव कालेन सर्वलक्षणसम्पन्नं सर्वसौविध्ययुतं शोभाकरं शुभं नाट्यगृहं निर्माय तद्रष्टुं पितामहं निवेदितवान् ।

पितामहः नाट्यगृहं निर्मातुं समादिदेश।

नाट्यशास्त्रस्य द्वितीयेऽध्याये नाट्यगृहनिर्माण-विधेर्विवरणमुपनिबद्धम्। तत्र विकृष्टं, चतुरस्रमस्रञ्चेति त्रिविधं नाट्यगृहं वर्णितम्। विकृष्टमायताकारं चतुरस्रं वर्गाकारमस्रं च त्रिभुजाकारं भवति । विवरणं तु द्वितीयाध्याय एव द्रष्टव्यम् । दृष्टवान्। ब्रह्मा महेन्द्रेण सहान्यैश्च देवैः सह गत्वा विश्वकर्मणा निर्मितं नाट्यगृहं

**नाट्यगृहरक्षणम् -**

नाट्यगृहरक्षणाय सर्वान् देवान् अकथयत्।

विश्वकर्मणा निर्मितं शोभनं सर्वसौविध्यसम्पन्नं नाट्यगृहं दृष्ट्वा ब्रह्मा तद्रक्षणाय सर्वान् देवानकथयत् यत्स्वांशभागैर्युष्माभिरस्य रक्षा विधेया। समग्रस्यापि नाट्यमण्डपस्य रक्षायै चन्द्रमाः नियुक्तः । लोकपालः स्व-स्व दिग्विभागस्य मरुद्गणा अपि विदिक्षु नियुक्ताः। एवं पूर्वदिग्पाल इन्द्रः, दक्षिणदिग्पालो यमः पश्चिमदिग्पालो

**" निश्चिता भगवन् विघ्ना नाट्यस्यास्य विनाशने।**
**अतो रक्षाविधिं सम्यगाज्ञापय सुरेश्वर ।।**
**ततश्च विश्वकर्माणं ब्रह्मोवाच प्रयत्नतः।**
**कुरु लक्षणसम्पन्नं नाट्यवेश्म महामते ।।**
**ततोऽचिरेण कालेन विश्वकर्मा महच्छुभम्।**
**सर्वलक्षणसम्पन्नं कृत्वा नाट्यगृहं तु सः ।।**
**प्रोक्तवान् द्रुहिणं गत्वा सभायां तु कृताञ्जलिः।।**
**"दृष्ट्वा नाट्यगृहं ब्रह्मा प्राह सर्वान् सुराँस्ततः ।।**
**अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डपः ।।**

वरुण उत्तरदिग्पालश्च कुबेरो बभूवुः। एवमेव विदिश्वपि देवा नियुक्ताः । आग्नेयस्य अग्निः, नैऋत्यस्य निऋतिः, वायव्यस्य वायुरीशानस्य च ईशानः। नेपथ्यरक्षायै मित्रः (सूर्यः), नभोरक्षायै वरुणो वेदिरक्षायै अग्निः भाण्डवाद्यरक्षायै सर्वेदेवा नियुक्ताः। ब्राह्मणक्षत्रियवैश्यशूद्रा एते चत्वारो वर्णाः नाट्यमण्डपस्य मुख्यस्तम्भानां च रक्षणाय नियोजिताः। शेषाणां स्तम्भानां रक्षणाय द्वादशादित्या एकादशरुद्राश्च नियुक्ताः। धरणीषु भूतानि (पञ्चमहाभूतानि, न तु भूताः योनिविशेषाः) नियुक्तानि, शालासु बृहत्कक्षेषु अप्सरसो नियुक्ताः। समग्रेषु कक्षेषु यक्षिण्यो, महीपृष्ठे (कक्षस्थण्डिले) महोदधिः नियुक्तः । द्वारशालायां (द्वारपक्षे निर्मिते कक्षे) यमः कालश्च नियुक्तौ। एतद्विवरणं मुख्यस्थलेषु नाट्यमण्डपस्य नियुक्तानां देवादीनां प्रदत्तम्।"

नेपथ्यरक्षायै सूर्यं नियुक्तवान्

## Summarised Overview

अस्मिन् पाठ्यांशे आदौ नाट्यवृत्तीनां विवरणं दत्त्वा ततोऽप्सरसां सृष्टिर्वर्णिता तासां नामानि च सूचितानि । नारदादिगन्धर्वाणां गानवाद्यप्रयोगस्तथा च नाट्यस्य प्रथमः प्रयोग इन्द्रस्य विजयोत्सवावसरे कृतो वर्णितः। नाट्यप्रयोगात्पूर्वं हि नान्दीपाठः कृतोऽतः नान्द्याः स्वरूपं निरूपितम्। नाट्याभिनयं दृष्ट्वा देवानां प्रसन्नताऽपि च दैत्यानां क्षोभस्ततो दैत्यानामुपद्रवशमनाय जर्जरस्य स्थापना वर्णिता। अन्ते च नाट्यगृहनिर्माणं तद्रक्षणं च वर्णितम्।

## Assignments

1. नाट्यं दृष्ट्वा असुराणां भावविकारः कथमासीत् इति विशदीकुरुत।
2. नाट्यगृहविशेषाः विस्तरेण प्रतिपादयत।
3. ब्रह्मा नाट्यगृहसंरक्षणाय किम् कृतवान् ?

## Suggested Readings


1.Bharata Muni, Natyasastra, Edited by Manomohan GhoshChoukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

# References

1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A.B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice,Motilal Banarasidas Publishers, Delhi.1924

SGOU

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# रसविकल्पः

# Block 3

SGOU

# UNIT 1

# नाट्यशास्त्रस्य रसाध्याये नाट्यसंग्रहः

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

भरतमुनेर्नाट्यशास्त्रं प्रसिद्धम्। अस्य षष्ठाध्याये मुख्यरूपेण रसः सभेदं निरूपितः। किन्तु सहैव नाट्यविषयाणामन्येषामपि तत्त्वानामत्रानुषङ्गिकरूपेण निर्देशो विहितः। अयं षष्ठ एवाभिनवभारतीसहितोऽध्यायः पाठ्यग्रन्थत्वेन निर्धारितो वर्तते। अस्मिन् षष्ठाध्याये मुनिभिरात्रेयप्रभृतिभिः रसभावादिविषये पृच्छ्यते। भरतमुनिना तेषां प्रश्नानामुत्तरं दातुं प्रतिज्ञायते । प्रसङ्गत उद्देश-लक्षण-परीक्षारूपाणां संग्रह-कारिका-निरुक्तानां सोदाहरणं लक्षणमपि विहितं भरतेन । मुनिभिः के कथं च प्रश्नाः कृता भरतेन कथं च तेषामुत्तराणि दातुं प्रतिज्ञा क्रियत इति पाठेऽस्मिन् भवन्तो ज्ञास्यन्ति। ततः पूर्वं भरतमुनिविषये तदीयनाट्यशास्त्रविषये च ज्ञातव्यमिति तद्विषयेऽपि समासेनोच्यते।

नाट्यशास्त्रे षड्त्रिंशत् अध्यायाः सन्ति। अत एवाभिनवभारत्यां 'सप्तत्रिंश' इत्यपि पाठान्तरं लभ्यते। नाट्यशास्त्रस्य प्रामाणिकी संस्कृतटीकाऽभिनवभारती मूलस्य रहस्यं सम्यक् प्रतिपादयति । यद्यभिनवभारती चाऽभविष्यत् तदाऽनेकत्र नाट्यशास्त्रस्य रहस्यमज्ञातमेवाऽभविष्यत्। नाट्यशास्त्रस्य षष्ठेऽध्याये नाट्यन्नागभूतो रसो मुख्यरूपेण विवेचितः । अत्रैवाध्याये 'विभावानुभावसंचारिसंयोगाद् रसनिष्पत्तिः' इति रससूत्रं रसस्य निरूपिता भेदाश्च लभ्यन्ते। तत्राऽस्मिन् पाठे षष्ठाध्याये मुनिकृतानां प्रश्नानाम् उत्तरदानार्थं भरतमुनिना कृतायाः प्रतिज्ञायाश्च मुख्यतो निरूपणं विधीयते।

## Keywords

विविधप्रश्नाः, संग्रहः, रसः, भावः, अभिनयः, धर्मी,लोकधर्मी, नाट्यधर्मी, वृत्तिः, प्रवृत्तिः, सिद्धिः, स्वरः, आतोद्यम्, गानम्, रङ्गश्च

## Discussion

**मुनीनां रसभावादिविषये प्रश्नाः**

प्रथमाध्यायादारभ्य पञ्चममध्यायं यावद् भरतेन नाट्यवेदस्योद्भवो नाट्यसम्बद्धस्य पूर्वरङ्गस्य च विधिर्वर्णितः। एवं पूर्वरङ्गविषयम् अवगत्यात्रेयप्रमुखा मुनयो भरतं प्रति पञ्च प्रश्नान् कुर्वन्ति। तत्र प्रथमः प्रश्नो रसविषयो वर्तते। प्रथमाध्याये नाट्यस्योद्भवो वर्णितः। तत्र ऋग्वेदात् पाठ्यस्य, सामवेदाद् गानस्य, यजुर्वेदादभिनयस्य, अथर्ववेदाद् रसस्य च ग्रहणं विधाय विधात्रा नाट्यनामकः पञ्चमः सार्ववार्णिको वेदो रचित इति चर्चा कृता। तत्र पाठ्य-गानाभिनयाः प्रसिद्धाः। किन्तु प्रकृते रसपदेन कः पदार्थो विवक्षित इति ज्ञातुं न शक्यते। लोके षाडवादयो मधुरादय एव वा रसपदेन बोध्यन्ते। किन्तु 'रसान् आथर्वणादपि' इत्यत्र प्रथमाध्यायेऽथर्ववेदाद् यस्य रसस्य ग्रहणस्य चर्चा वर्तते स 'रस्यते आस्वाद्यते इति रसः' इति व्युत्पत्त्या रसनीयत्वेन रसपदवाच्यषाडवादिरूपो रसपदवाच्यमधुरादिरूपो वा न भवितुमर्हति। येऽपि शृङ्गाररससंभवः' इत्यत्र चतुर्थाध्याये, 'ततो रौद्ररसं श्लोकम्' इत्यत्र पञ्चमाध्याये चैवमादी ये शृङ्गारादयः प्रयुक्तास्ते रसपदेन कथं वाच्या भवितुमर्हन्ति ? रसशब्दो द्विधा निष्पद्यते। तन्त्र चुरादेः 'रस आस्वादनस्नेहनयोः' इति रसयतेर्निष्पन्नो रसशब्दो लौकिकं मधुरादिरसं बोधयति। यदि कर्मणि प्रत्ययस्तदा रसनीयेन्द्रियविषयोऽर्थः। यो रस्यते स रस इति। यदि भावे प्रत्ययस्तदा रसनं रस इति व्युत्पत्तौ सत्यामास्वादोऽर्थः। यदि तु 'रस शब्दे' इति भौवादिकाद् रसते रसशब्दो मन्यते तदा कर्मणि प्रत्यये यो रस्यते शब्देन बोध्यते सः, भावे च रसनं शब्दनं

रस्यते आस्वाद्यते इति रसः

शब्देन बोधनं शाब्दी प्रतीतिर्वा रस इत्यर्थः। एवं रसपदार्थविषये भवति जिज्ञासा यद् रसशब्देन के पदार्थाः स्वीकरणीयाः, रसानां रसत्वं रसपदवाच्यत्वं केन कारणेन, रसपदस्य प्रवृत्तिनिमित्तं किं वेति भवति प्रश्नः। रसो नाट्याङ्गेषु 'खिन्नां रसभावेषु **(5/159)'** इत्यत्र भरतेन रसं प्रत्यादरातिशयः प्रदर्शित इति प्रधानमिति रसविषयकः पूर्व सूचितोऽपि पुनः प्रश्नो युज्यते। एवं रसपदार्थविषये भरतं प्रति मुनीनां प्रथमः प्रश्नः। प्रश्नोपक्रम एवं कृतः षष्ठाध्यायारम्भे-

भावाः रससहचारित्वेन कथमुक्ताः इति प्रथमः प्रश्नः।

**पूर्वरङ्गविधिं श्रुत्वा पुनराहुर्महत्तमाः।**
**मुनयो भरतं सर्वे प्रश्नान् पञ्च ब्रूहि मे ॥**

ये रसा इति पठ्यन्ते नाट्ये नाट्यविचक्षणैः। रसत्वं केन वा तेषामेतदाख्यातुमर्हति ।

अत्र 'पठ्यन्ते' इति प्रयोगेण रसशब्दस्य शब्दार्थकादपि रसधातोर्निष्पत्तिः सूचितेति 'अत एव शब्दप्रादुर्भाव इति शब्दो रसा इति पठ्यन्त इति' इत्यभिनवभारतीवचनेन प्रतीयते।

किं पाठ्यगानादयः एव भावाः उत अन्ये सन्तीति द्वितीयः प्रश्नः।

भावविषयो द्वितीयः प्रश्नो वर्तते। अत्रावान्तराश्चत्वारः प्रश्नाः सन्ति। यद्यपि नाट्योत्पत्तिकथनप्रसङ्गे भावा न चर्चितास्तथापि 'खिन्नाम्' इति पूर्वोक्ते पद्ये केचन भावा रससहभावेनाऽभिहिताः। ते च भावा रससहचारित्वेन कथमुक्ता इति प्रथमः प्रश्नः। किं पाठ्यगानादय एव भावा उताऽन्ये सन्तीति द्वितीयः प्रश्नः। भावशब्दस्य निर्वचनम् (व्युत्पत्तिः) किं वर्तत इति तृतीयः प्रश्नः । तत्रापि 'किं भवन्ति उत्पद्यन्त इति भावाः' इति, भावयन्ति इति वा भावाः' इति वा व्युत्पत्तिः? 'भावयन्ति' पक्षे भावयन्तिपदस्य कोऽर्थः- उत्पादयन्ति इति, व्याप्नुवन्ति बोधयन्तीति वार्थः। भावाः कं पदार्थमुत्पादयन्ति व्याप्नुवन्ति बोधयन्ति वेत्युत्पादनस्य व्यापनस्य बोधनस्य वा कर्मविषये चतुर्थः प्रश्नः। एवं भावविषये चत्वारः प्रश्ना एवमभिहिता ध्वनिताश्च भावाश्चैव कथं प्रोक्ताः किं वा ते भावयन्ति हि। अत्र चशब्देनापिशब्देन च भावविषयाश्चत्वारः प्रश्नाः कृता इत्यभिनवभारत्यां स्पष्टम्। एवं भावविषयाश्चत्वारो रसविषयश्चैक इति संकलय्य पञ्च प्रश्नाः सन्ति। तत्र भरतेन रसविषय एव प्रश्नः षष्ठाध्याये समाहितः, भावविषयास्ते सप्तमे

समाहिताः। संग्रहः कः पदार्थ इति संग्रहविषये तृतीयः प्रश्नः, कारिका कः पदार्थ इति कारिकाविषयश्चतुर्थः, निरुक्तं कः पदार्थ इति निरुक्तविषये पञ्चमश्च प्रश्नो वर्तते। इमे संग्रहादिविषयास्त्रयः प्रश्नाः "संग्रहं कारिकां चैव निरुक्तं चैव तत्त्वतः' इति वचनेन सूचिताः। अथवैषा पञ्चप्रश्नी कथं समुत्तरणीयेति विधिरपि मुनिभिरुच्यते "संग्रहं कारिकां चैव निरुक्तं चैव तत्त्वतः' इति । रसभावानां तात्त्विकं निरूपणं भवता भरतेन संग्रहेण उद्देशेन, कारिकया (लक्षणेन), निरुक्तेन परीक्षया निर्वचनेन च कर्तव्यमिति मुनीनां प्रश्नस्याभिप्रायः ।यदि कश्चन पदार्थ उद्देशलक्षणपरीक्षाभिर्निरूप्यते तदा स सम्यक् ज्ञातो भवति। यद्येवं निरूपणं न भवति तदा पदार्थो यथार्थरूपेण ज्ञातुं न शक्यते। अतएव 'तत्त्वतः' इति पर प्रयुक्तम्। ततश्चास्मिन् पक्षे रसविषय एको भावविषयाश्च चत्वारः प्रश्ना इति पञ्च प्रश्ना भवन्ति। तत्र पूर्वपक्ष एवं समीचीनो भाति। अत एव भरतेनाग्रे संग्रहादीनामपि स्वरूपमुच्यते। एवं मुनिभिर्भरतमुनिं प्रति पञ्च प्रश्नाः कृताः। एते रसभावादिविषया वस्तुतः पूर्वमेवोक्तास्तथाप्यत्र तेषां विस्तर इत्याहाऽभिनवभारती।

**भरतेन रसभावादिनिरूपणस्य प्रतिज्ञा**

पञ्चानां प्रश्नानामुत्तराणि दातुं भरतेन प्रतिज्ञायते स संग्रहकारिकानिरुक्तपदार्था अपि सोदाहरणं निरूप्यते। तत्र बुद्धिवैशद्याय संग्रहस्य नैकान्युदाहरणानि दीयते। मुनीनां प्रश्नान् निशम्य भरतो वदति यद् यथा भवद्भिः रसभावविषये पञ्चप्रश्नाः कृतास्तथैवाहमुतराणि कथयामि। रसभावयोः तत्वतोनिरूपणं संग्रहकारकारिकानिरुक्तैरेव कर्तुं शक्यते। विस्तरेण तु तन्न संभवति,यतः शास्त्राणि शिल्पानि चानन्तानि सन्ति। एवं सर्वशास्त्रशिल्पमयत्वेन नाट्यमनन्तं विद्यते। नाट्यतत्त्वेषु कस्यचनैकस्यापि सीमा निर्धारयितुं न शक्यते। संग्रहादिरूपमुपायं विहाय रसभावयोरपि विवेचनमनन्तत्वेन न संभवति। अतो निरूपणार्थं संग्रहादिरेवोपाय आश्रीयते। उक्तं नाट्यशास्त्रे -

रसभावयोः तत्त्वतोनिरूपणं संग्रहकारिकानिरुक्तेरेव कर्तुं शक्यते।

**तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः।**
**प्रत्युवाच पुनर्वाक्यं रसभावविकल्पनम् ।।**
**अहं वः कथयिष्यामि निखिलेन तपोधनाः।**

**संग्रहं कारिकां चैव निरुक्तं च यथाक्रमम्॥**
**न शक्यमिह नाट्यस्य गन्तुमन्तं कथञ्चन।**
**कस्माद् बहुत्वात् ज्ञानानां शिल्पानां चाप्यनन्ततः ।।**
**एकस्यापि न वै शक्यमन्तं ज्ञानार्णवस्य हि।**
**गन्तुं किमुत सर्वेषां ज्ञानानामर्थतन्वतः ।।**

रसभावविकल्पनम् – रसभावयोः निश्चायकं वाक्यम् इत्यर्थः

इह 'रसभावविकल्पनम्' इति पदस्य 'रसभावा विकल्प्यन्ते निश्चीयन्तेऽनेनेति रसभावाविकल्पनं रसभावयोर्निश्चायकं वाक्यम्' इत्यर्थः, अन्तशब्दस्य निश्चयोऽर्थः, ज्ञानानामिति पदस्य व्याकरणादीनि शास्त्राण्यर्थः, शिल्पशब्देन चित्रपुस्तादिकर्मणां ग्रहणम्।

'कथञ्चन' इति पदेन सूच्यते यत् संग्रहादिरूपमुपायं विहाय रसभावादिनिरूपणं कर्तुं न शक्यते। 'यथाक्रमम्' इत्यनेन प्रतिपाद्यते यद् येन क्रमेणोद्देशः तेनैव क्रमेण विवेचनं भविष्यति। एवं मुनीन् प्रत्यभिधाय भरतमुनिरग्रे संग्रहादिस्वरूपं सोदाहरणमेवमाह-

संग्रहः

संग्रहस्य लक्षणमेवमुक्तम्-

**किन्त्वल्पसूत्रगूढार्थमनुमानप्रसाधकम्।**
**नाट्यस्यास्य प्रवक्ष्यामि रसभावादिसंग्रहम् ।।**
**विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः।**
**निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः ।।**

अत्र 'किन्त्वल्प' इति प्रथमेन श्लोकेन संग्रहस्य लक्षणमुच्यते । अस्य श्लोकस्यायमर्थः-अहं भरतो 'रसभावादयः संगृह्यन्तेऽनेने 'ति रसभावादीनां संग्रहम् उद्देशं प्रवक्ष्यामि कथयिष्यामि। कीदृशं संग्रहम् ? अल्पसूत्रगूढार्थम् अल्पो नाममात्रेणोद्देशतया संकुचितो भवति सूत्रम् लक्षणम्, तद्रूपो गूढोऽर्थो यत्र तमुदद्देशरूपं संग्रहम्।

संग्रहः- अल्पसूत्रगूढार्थानुमानप्रसाधकम्

अथवा 'अल्पसूत्रग्रन्थार्थम्' इति गूढस्थाने ग्रन्थपाठो मन्यते तदा **'सूत्रग्रन्थयोर्लक्षणपरीक्षयोर्यो लक्ष्यपरीक्षितव्यलक्षणः, सोऽल्पः संकुचितो नाममात्रेणोद्देश्यतया यत्र'** इति अभिनव-भारतीसम्मतोऽर्थो बोध्यः । पुनः कीदृशं संग्रहम् ? अनुमानप्रसाधकम् - अनुमानस्य केवलव्यतिरेकिरूपायाः

पदार्थानां सम्यक् निरूपणाय रीतिः त्रिधा प्रसिद्धा वर्तते।

अनुमितेः केवलव्यतिरेकिनो लक्षणस्याश्रयत्वेन केवल-व्यतिरेक्यनुमानास्य प्रसाधकं प्रकृष्टं साधकम् आश्रयत्वासिद्धिरूपहेत्वाभास- शङ्कानिवारणेन सहायक जनकं वा।

अयं भावः- पदार्थानां सम्यङ्निरूपणस्य रीतिस्त्रिधा प्रसिद्धा वर्तते। पूर्वं निरूपणीयानां पदार्थानां नामानि उच्यन्ते । नाममात्रेण पदार्थकीर्तनमुद्देश उच्यते। यथा 'पृथ्वी, जलम्, तेजः, वायुः' इत्यादिरूपेण नवानां द्रव्याणां नाममात्रेणोल्लेखरूप उद्देशो नवन्यायवैशेषिकयोः प्रसिद्धो वर्तते। ततः 'गन्धवती पृथ्वी' इत्यादिरूपेण गन्धादिरूपाणि लक्षणानि क्रियन्ते। ततो जलादावपि गन्धस्यानुभवेन गन्धरूपस्य पृथ्वीलक्षणस्य परीक्षा क्रियते यद् गन्धोऽसाधारणधर्मरूपं लक्षणं भवितुमर्हति न वेति। जलादौ पार्थिवपरमाणुसंयोगेन गन्ध इति गन्धस्य जलादौ नातिव्याप्तिरिति समाधीयते। अव्याप्त्यादिपरिहारेण लक्षणस्य स्थापनं परीक्षा भवति। तदेव लक्षणं भरतेनात्र सूत्रशब्देनोच्यते। गन्धरूपादि लक्षणं सर्वेषु पार्थिवादिविकारेषु माल्यगतपुष्पेषु सूत्रमिव (तन्तुरिव) अनुस्यूतं भवति। तल्लक्षणं गन्धादिरूपमुद्दिष्टेषु पृथिव्यादिषु पृथिवीत्यादिनाममात्रेण निर्दिष्टं भवति। पृथिव्या गन्धरूपं लक्षणं पृथिवीरूपे लक्ष्ये उद्देशे तिष्ठत् पृथिव्या इतरज्जलादिपदार्थेभ्यो भेदस्य ज्ञाने साधनं भवति। यथा 'पृथिवी जलाद् भिन्ना, गन्धवत्त्वात्, यन्त्र पृथिवी तन्त्र गन्धवत्, यथा तेजः' इति। उक्तमभिनवभारत्याम्- '**अनुमानं लक्षणम्, तद्धि केवलव्यतिरेकिरूपम्। तस्य चोद्देशधर्मिणं प्रकल्पयन् प्रकृष्टः साधकः आश्रयत्वासिद्धत्वशङ्काशमनेन पक्षधर्मत्वमूलाङ्गपोषकत्वात्।**" इति। एवं प्रथमं संग्रहलक्षणमेवं

संग्रहस्य लक्षणं अधिकृत्य विचारः।

फलति- इतरभेदानुमितौ केवलव्यतिरेकिरूपस्य हेतोराश्रयो हेतोराश्रयत्वेन केवलव्यतिरेक्यनुमाने सहायको य उद्देशः स एव संग्रह उच्यते। संग्रहस्येदं स्वरूपमन्येषामपि विदुषां सम्मतमिति 'विस्तरेणोपदिष्टानाम्' इति श्लोकेन प्रदर्श्यते। अस्यार्थो विद्यते यत् सूत्रे लक्षणे भाष्ये परीक्षायां च येऽर्था विस्तरेण विवेचिता भवन्ति तेषां संक्षेपेणैकत्र निबन्धो मनीषिभिः संग्रह उच्यते। अत्र सूत्रशब्दो भाष्यशब्दश्च क्रमेण लक्षणस्य लक्षणविचाररूपायाः

परीक्षायाश्च बोधक इति 'सूत्रं लक्षणम्। भाष्यं तद्व्यक्तीकरणरूपा परीक्षा।' इत्यभिनवभारत्या वचनेन स्पष्टम्। एवमुद्देश एव संग्रह इति मनीषिणां सम्मतिः। तस्य संग्रहस्योदाहरणमिदम्-

**रसा भावा ह्यभिनया धर्मिवृत्तिप्रवृत्तयः ।**
**सिद्धिः स्वराः तथातोद्यं गानं रङ्गश्च संग्रहः ।।**

रसः, भावः, अभिनयः, धर्मी, वृत्तिः, प्रवृत्तिः, सिद्धिः, स्वरः, आतोद्यम्, गानम्, रङ्गश्च - संग्रहः

अत्र नाट्यप्रतिपाद्यानामेकादशानां पदार्थानां संग्रहो वर्तते रसः, भावः, अभिनयः, धर्मी, वृत्तिः, प्रवृत्तिः, सिद्धिः, स्वरः, आतोद्यम्, गानम्, रङ्गश्च । एवं नाट्यस्य द्वादशाङ्गानि भवन्ति । उक्ते श्लोक इतिशब्दार्थे प्रयुक्तश्चशब्दो नाट्यसंग्रहस्य समाप्तिं सूचयति। नाट्यं द्वादशाङ्गमिति कोहलमतेन वर्तते, भरतमतेन तु नाट्यस्य पञ्चान्येवाङ्गानि भवन्ति- रसः, भावः, अभिनयः, गानम्, आतोद्यं च। एवं भरतमते नाट्यसंग्रहः पञ्चाङ्ग एव भवति। इदं मतमुद्भटमतानुसारिणां विदुषाम् । किन्तु भट्टलोल्लटो नाट्यस्यैकादशाङ्गत्वं भरतसम्मतमपि मनुत इत्याद्यभिनवभारत्यां स्पष्टम्। एवं संक्षेपेण कृतस्य नाट्यसंग्रहस्य 'रसा भावा' इत्याद्युदाहरणं वर्तते। अग्रे भरतेनास्यैव संग्रहस्य विभागों रसादिभेदप्रर्शनेन विधास्यते । रसादीनां विभागोऽपि संग्रहरूप एव भवति। विभाग उद्देशविशेषरूपो भवति। एवमिह संग्रहस्य लक्षणमेकमुदाहरणं च प्रदर्शितम्। इदानीं कारिकास्वरूपं विचार्यते।

## कारिका

अस्याः स्वरूपमेवं प्रतिपादितम्-

**अल्पाभिधानेनार्थो यः समासेनोच्यते बुधैः।**
**सूत्रतः सा तु विज्ञेया कारिकार्थप्रदर्शिनी ।।**

कारिकायाः स्वरूपम्

बुधैर्योऽर्थः अल्पाभिधानेन (अल्पेन शब्देन) समासेन संक्षेपेण सूत्रतः सूत्रेण यः (असाधारणधर्मात्मको) लक्षणरूपोऽर्थ उच्यते बोध्यते साऽर्थप्रदर्शिनी समग्रलक्ष्यरूपस्यार्थस्य ज्ञापिका कारिकाशब्देनोच्यत इत्यक्षरार्थः। कस्यचित् पदार्थस्यासाधारणधर्मरूपो लक्षणभूतो योऽर्थः स्वल्पेन सूचनात्मकेन शब्देन बोध्यते यश्च लक्ष्यभूतस्य तस्य पदार्थस्य समग्रान् भेदान् बोधयति सोऽर्थः कारिका कथ्यते, यतस्तेन लक्ष्यभेदानां सर्वेषां ज्ञप्तिः क्रियते । ज्ञप्तिः क्रियतेऽनेनेति

कारिकापदस्य निर्वचनम्। सेति विधेयानुसारेण स्त्रीत्वेन निर्देशः। यथा 'गन्धवती पृथिवी' इति स्वल्पेन शब्देन बोधितो मृत्पाषाणादिरूपस्य समग्रस्य पृथिवीभेदस्य ज्ञापकः पृथिवीलक्षणभूतो गन्धरूपोऽर्थः कारिकाशब्देन वाच्यः। स एव समग्रपृथिवीभेदसूचनेन सूत्रशब्देनापि कथ्यते।एवं लक्षणरूपस्यैवार्थस्यैव सूत्रं कारिका चेति संज्ञे। प्रतिपादके स्वल्पशब्दे सूत्रकारिकाशब्दौ लाक्षणिकौ। उक्तमभिनवभारत्याम्-

सूचनात्मकत्वात् सूत्राल्लब्धो योऽर्थो लक्षणात्मकः, स एव सम्यगतिश्रव्यतया वर्णनात्मनेतिवृत्तबन्धेनोच्यमानोऽल्पैश्च शब्दैर्निरूप्यमाणोऽर्थस्य लक्षणीयस्य प्रकर्षधर्मान्तराद्यवच्छेदं दर्शयन् धर्मः करिका। क्रियतेऽनेन ज्ञप्तिरिति कारिका। लक्षणमिति यावत्। सूत्रश्लोकावुपचारादिति। एवं कारिकायाः स्वरूपत्रयं प्रतिफलति- स्वल्पेन शब्देन बोधितत्वम्, सकललक्ष्यबोधकत्वम्, लक्ष्येतरभेदज्ञानसाधनत्वं च। एतत्त्रयं लक्षणे संभवतीति लक्षणं कारिका कथिता। अस्याः प्रतिपादकमपि गद्यात्मकं पद्यात्मकं वा स्वल्पपदं वाक्यं कारिकोच्यते। रसादीनामेषा कारिका भरतेन 'विभावानुभावव्यभिचारि' इत्यादिना सूत्रेण प्रतिपादयिष्यते।

क्रियते अनेन ज्ञप्तिरिति कारिका ।

## निरुक्तम्

पूर्वं प्रतिपादितस्य कारिकारूपस्यार्थस्य तद्बोधकवाक्यरूपायाः परीक्षा भवति कारिकायाश्चाक्षेपप्रतिसमाधानरूपा या परीक्षा भवति तद्रूपस्य निरुक्तस्य लक्षणं भरतेनैवमुच्यते-

**नानानामाश्रयोत्पन्नं निघण्टुनिगमान्वितम्।**
**धात्वर्थहेतुसंयुक्तं नानासिद्धान्तसाधितम्।।**
**स्थापितोऽर्थो भवेद् यत्र समासेनाऽर्थसूचकः ।**
**धात्वर्थवचनेनेह निरुक्तं तत् प्रचक्षते ।।**

निरुक्तस्य स्वरूपम्

यत्र समासेन संक्षेपेण, अर्थसूचकः अर्थानां व्यक्तिभेदेन भिन्नानां लक्ष्यभूतानां मृत्पाषाणादिरूपाणां पृथ्वीप्रभृतिपदार्थभेदानां सूचक इतरभेदेन बोधको गन्धादिरूपोऽर्थः, धात्वर्थवचनेन = मुख्यतो धात्वर्थस्य क्रियाया वचनेन बोधकेन शब्देन, स्थाप्यते = संक्षेपेण निर्धार्यते, तत् नानानामाश्रयोत्पन्नम् नाना अनेकानि

SGOU

यानि नामानि कारिकावाक्ये लक्षणवाक्ये वा प्रयुक्तानि सुबन्तपदानि, तेषामाश्रयेणोत्पन्नम्, निघण्टुनिगमान्वितम् - निघण्टुनिगमाभ्याम् निघण्टु रूढपदानामर्थस्य बोधकः शब्दकोशः, रूढपदेषु तेन निघण्टुना, निगमेन यौगिकपदेषु प्रकृतिप्रत्ययज्ञापनेन चाऽन्वितं सम्बद्धम्, धात्वर्थहेतुसंयुक्तम् लक्षणवाक्ये प्रयुक्तेषु तिङ्ङन्तवाक्येषु यो धात्वर्थः क्रियास्तस्या हेतवश्च कारकाणि च तैः संयुक्तम् तेषामन्वयस्य प्रदर्शनेन युक्तम्, नानासिद्धान्तसाधितम् नाना अनेकप्रकारा ये सिद्धान्ताः सर्वशास्त्रेषु समानशास्त्रेष च प्रसिद्धाः सिद्धान्ताः प्रमाणभूता अर्थाः सन्ति, तैः साधितम् आक्षेपसमाधानाभ्यां यत् साधनं तेन युक्तम्, निरुक्तम्-परीक्षाम्, प्रचक्षते विद्वांसः कथयन्तीति श्लोकयोः पदानामर्थो विद्यते। अस्यायमभिप्रायः- लक्षणभूतस्यार्थस्याक्षेपसमाधानाभ्यां परीक्षा निरुक्तमस्ति। 'रसः कस्मात् ? इत्याक्षेप उच्यते। 'यस्माद् रस्यते तस्माद् रसः' इति समाधानं भवति। आभ्यां या परीक्षा तद्रूपस्य निरुक्तस्य प्रयोजनं संक्षेपेणार्थावधारणं वर्तते। अत्र निरुक्ते तस्य गन्धादिरूपस्य लक्षणस्य तद्वाचकस्य वाक्यस्य च परीक्षा भवति येन व्यक्तिभेदेन भिन्ना मृत्पाषाणादयो लक्ष्यभूताः पदार्थाः समासेन सूच्यन्ते। लक्षणस्य स्थापना निरुक्ते मुख्यतः क्रियाया वचनेन भवति। सा द्विधा भवति शाब्दी आर्थी च। तत्र शाब्द्येवं भवति- लक्षणबोधकेषु 'गन्धवती पृथिवी भवति' इत्यादिरूपेषु वाक्येषु यानि सुबन्तानि तिङन्तानि च पदानि भवन्ति, तेषु सुबन्तपदेषु रूढानां सुबन्तपदानामर्थः शब्दकोशाधारेण यथासंभवं पर्यायप्रयोगेण वक्तव्यः, यौगिकानां सुबन्तानामर्थः प्रकृतिप्रत्यययोजनया च निरूपणीयो भवति, किन्तु तिङ्ङन्तपदानामर्थः क्रियाणां कारकाणां च संयोजनं विधायार्थो वक्तव्यः। आर्थी परीक्षा लक्षणरूपस्यार्थस्य भवति। अत्र शास्त्रेषु प्रसिद्धान् सिद्धान्तान् आश्रित्याक्षेपः समाधानं च विधीयते। एतादृशं निरुक्तं चतुर्धा भवतीत्यभिनवभारतीप्रतिपादयति। तत्र प्रथमं केवलेन नाम्ना निर्वचनम्। यथा 'उलूखलम्' इति पदस्य। उलूखलं कस्मात् ?- इत्याक्षेपः। ऊर्द्ध्वे खम्-आकाशो यस्य तद्

निरुक्तं चतुर्धा भवति इति अभिनवभारती

यस्मात् रस्यते तस्माद् रसः

उलूखलमिति समाधानम्। अत्रोर्द्धवनाम्ना खनाम्ना चोलूखलशब्दस्य निर्वचनम्। द्वितीयं निरुक्तं केवलेन धातुना निर्वचनम्। यथा 'रस्यते इति रसः' इति रसशब्दस्य केवलेन धातुना निर्वचनम्। तृतीयं निरुक्तं नाम्ना धातुना च भवति। यथा- 'पिशितम्-मांसमश्नाति इति पिशाचः' इति पिशाचशब्दस्य निर्वचनम्। चतुर्थं च निरुक्तं समयेन-संकेतेन संकेतितार्थबोधकाभ्यां धातुपाठाभिधानकोशाभ्यां भवति । इदं द्विधा यथा लौकिकं वैदिकं च। तत्राद्यं लौकिकम् यथा 'भू सत्तायाम्' इति लोके भूशब्दस्य सत्तारूपस्यार्थस्य वचनम्। वैदिकं द्वितीयम्। यथा 'दीधीङ् दीप्तिदेवनयोः' इत्यनेन दीधीधातोर्दीप्तिदेवनरूपस्याऽर्थस्य कथनम्। दीधीङ् धातुर्हि वेद एव प्रसिद्धः। प्रतिशास्त्रपार्षदं तृतीयं भवति। यश्शब्दः शास्त्रविशेष एवार्थविशेषे प्रसिद्धस्तस्य निरुक्तमिदं भवति। यथा गीतविशेष एव ओवेणकाशब्दस्य प्रयोगः संगीतशास्त्र एव, 'आ ऐ औ' इति वर्णत्रये व्याकरण एव वृद्धिशब्दस्य प्रयोगः, अलङ्कारशास्त्र एव विभावादिव्यक्ते स्थायिनि रसशब्दस्य प्रयोगः। एषां शब्दानां निरुक्तं प्रतिपार्षदमुच्यते। एवं निरुक्तं चतुर्धा-नाममात्राश्रयम्, धातुमात्राश्रयम्, धातुनामोभयाश्रयम्, सामयिकं च । तत्रान्त्यं त्रिधा- लौकिकम्, वैदकिम्, प्रतिशास्त्रपार्षदं च। एतत् सर्व 'नानानामाश्रयोत्पन्नम्' इत्यादिना प्रतिपादितम्। एवं भरतेन संग्रहस्य कारिकाया निरुक्तस्य च स्वरूपं प्रतिपादितम्। एतानि संग्रह-कारिका-निरुक्तानि उद्देश-लक्षण-परीक्षारूपा अर्थविशेषा एव भवन्ति, लक्षणया तेषां प्रतिपादका वाक्यविशेषा अपि संग्रह-कारिका-निरुक्तपदैरभिधीयन्ते ।

**नाट्यवस्तुसंग्रहविभागः**

पूर्वं भरतेन नाट्यवस्तुन एकादशधा संग्रहः संक्षेपेणोक्तः:। तस्येदानीं विस्ताररूपो विभाग उच्यते। विस्तारितः संग्रह एव विभाग उच्यते। अत उद्देशरूपात् संग्रहाद् विभागो वस्तुतो भिन्नो न भवति। रसादीनां संग्रहाणां विस्ताररूपो विभागो भरतेन यथाक्रममुच्यते। तत्र संग्रहस्य विस्तारस्य निरुक्तेन कारिकया च सह रसादिनिरूपणस्य च प्रतिज्ञावाक्यमिदमस्ति-

विस्तारितः संग्रह एव विभाग उच्यते।

**संग्रहो यो मया प्रोक्तः समासेन द्विजोत्तमाः।**
**विस्तरं तस्य वक्ष्यामि सनिरुक्तं सकारिकम् ।।**

**रससंग्रहविभागः**

द्रुहिणेन - ब्रह्मणा प्रोक्तो रसानां विभागो नाट्येऽष्टधा वर्तते शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतश्च। उक्तम्-

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**
**बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः।**
एते ह्यष्टौ रसाः प्रोक्ता द्रुहिणेन महात्मना ।।

शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतश्च

अत्रैकादशस्वङ्गेषु प्राधान्याद् रसानामेव विभागः सर्वप्रथमं प्रदर्शितः। रस एव हि नाट्यं नर्तते। काव्येन द्योतनीयोऽर्थो नाट्यमुच्यते। अयं दृश्यकाव्यानु-संधानकर्तुर्नटस्याभिनयस्य श्रव्यकाव्यपाठककौशलस्य च प्रभावेण निश्चलेन मनसा गृह्यमाणतया मानससाक्षात्कारस्य विषयो भवति। असौ काव्यद्योत्योऽथ विभावादिरूपेण यद्यप्यनन्तो भवति तथापि काव्यप्रधाननायकस्य स्थायिचित्तवृत्तिरेव मन्यते, यतो जडानां विभावादीनां संविदि, संविदो भोक्तृषु, भोक्तृवर्गस्य च प्रधाने नायकरूपे भोक्तरि पर्यवसानं भवति। यथा शाकुन्तले शकुन्तलाविषया प्रधाननायकदुष्यन्तगता शकुन्तलादुष्यन्तोभयगता वा रत्याख्या चित्तवृत्तिर्नाट्यं वर्तते। एषा दृश्यकाव्ये नृत्यगीतादियोगेन श्रव्ये च गुणालङ्कारादियोगेन शकुन्तलादुष्यन्तादिविशेषसम्बन्धेन रहिता सती साधारणीभूता सहृदयानपि स्वात्मनि समावेशयति। एषा साधारणी निर्विघ्नसंवेदनरूपा चित्तवृत्तिस्तथान्यां चित्तवृत्तिं न जनयति, यथा लौकिकी सा सुखदुःखमोहात्मिका अन्याश्चित्तवृत्तीर्जनयति। एषाऽत एव लौकिकप्रत्यक्षादिप्रमाणजन्याभ्योऽन्याभ्यश्चित्तवृत्तिभ्यो विल-क्षणा वर्तते। लोकप्रमाणजन्याश्चित्तवृत्तयो ह्यसाधारणत्वेन सुखदुःखमोहस्वभावा भवन्ति। एषा काव्येन प्रतीयमाना स्थायिचित्तवृत्तिः संवेदनस्य विषयान्तरसंक्रमणस्याभावेन स्वात्मनि विश्रान्तिरूपेण रसनपदवाच्येन व्यापारेण विषयीक्रियमाणा रसशब्देनोच्यते। एवं साधारण्येन प्रतीयमाना कथितरसनव्यापारविषयभूता प्रधानस्थायिचित्तवृत्तिरेव रसः, स एव च वस्तुतो नाट्यं वर्तते। अस्य फलं विनेयानां

प्रधानस्थायिचित्तवृत्तिरेव रसः, स एव च वस्तुतः नाट्यं वर्तते।

नाट्यमेव रसाः

व्युत्पत्तिरस्ति। असौ काव्यद्योत्यो रसो वस्तुत एक एव वर्तते। अत एव 'नहि रसादृते कश्चिदर्थः प्रवर्तते' इति वक्ष्यमाणे पद्ये 'रसात्' इत्यत्रैकवचनं प्रयुक्तम्। अयमखण्ड एक एव महारसः शृङ्गारादिरूपेणाऽष्टधा विभज्यते। इमे शृङ्गारादयो विभागा वाक्यस्फोटवादिनां वैयाकरणानां मते यथा पदपदार्था असत्यभूता मन्यन्ते तथाऽसत्यरूपा एव सन्ति, वस्तुतो महारस एव वाक्यस्फोटवत् सत्यभूतः। यद्यन्विताभिधान-वादिमतमाश्रीयते तदा श्रृङ्गारादयो विभागाः तथैव महारसस्योपायत्वेन सत्यरूपा मन्तुं शक्यन्ते यथा वाक्यवाक्यार्थयोरुपायभूताः पदपदार्थाः। यद्यभिहितान्वयवादमतमाश्रीयते तदेदं वक्तुं शक्यते यदिमे विभागास्तस्य महारसस्य तथावायवभूता भवन्ति यथा वाक्यवाक्यार्थयोरवयवाः पदपदार्था भवन्ति, यथाऽभिहितानां पदार्थानामन्वयेन समुल्लसितोऽपदार्थः पदार्थसमुदायरूपो वाक्याथों भवति तथा शृङ्गारादीनां समूहो मुख्यः स महारसो भवति। एवं विभागदृशा रसोऽष्टप्रकारः। विभागदृशैव रसानां बहुत्वेन 'काव्यार्थान् भावयन्ति' इत्यत्र 'काव्यार्थान्' इति बहुवचनं प्रयुक्तम्। काव्यार्थानां रसानाम् अनेन बहुत्वं सूचितम्। एवं रस एकत्वं बहुत्वं च दृष्टिभेदेन न विरुद्धम्। रस एव वस्तुतो नाट्यम्। यतो हि सर्वेषां नाट्याङ्गानां सार्थकता तस्य रसस्यैव निष्पत्तिः वर्तते। अत एव प्राधान्येन सर्वप्रथमं रसस्यैवोद्देशः कृतः। उक्ते रसविभागप्रतिपादके पद्य 'अष्टौ' इति पदस्य प्रयोगः तैः स्वीक्रियते यैः शान्तरसो न मन्यते। किन्तु शान्तरसवादिनां मतेऽष्टपदरहितः 'बीभत्साद्भुतशान्ताश्च नव नाट्यरसाःस्मृताः' इति पाठः स्वीकरणीयः। तेन शान्तेन सह रसस्य नव विभागा भवन्तीत्यर्थो मन्तव्यः। इदं 'ते च नव। शान्ता-पलापिनस्त्वष्टाविति तन्त्र पठन्ति' इत्यभिनवभारतीवचनेन स्पष्टम्। एवं 'नाट्यरसाः' इति समस्ते पाठे 'नाट्यमेव रसाः' इति व्याख्यानं समीचीनम्। 'नाट्ये रसाः' इति व्यस्ते पाठे तु स्फोटवादिमतेन नाट्यरसयोराधाराधेयभावः काल्पनिकः, अन्यमते तु वास्तवो मन्तव्यः।

अत्र प्रश्न उदेति यच्छृङ्गारादीनां क्रमेणोद्देशस्य प्रयोजनं किं वर्तत इति । अत्र समाधानमभिनवभारत्यामेवं प्रतिपादितम् चत्वारः पुरुषार्था मन्यन्ते- धर्मः, अर्थः, कामः, मोक्षश्च। तत्र कामः प्रतिप्राणि प्रसिद्धो वर्तते। कश्चनापि जायतः प्राणी कामेन हीनो न भवति। एवं कामप्रधानत्वेन काममूलस्य शृङ्गारस्य प्रथम उद्देशः कृतः। हास्यः शृङ्गारमनुगच्छति। अतः शृङ्गारात् पश्चाद्धास्यस्योपदेशः। ततो निरपेक्षभावेन स्थितत्वाद्धास्याद् विपरीतस्य करुणस्य, कारणत्वेन करुणात् परं रौद्रस्य चोपदेशः।

कामप्रधानत्वेन काममूलस्य शृङ्गारस्य प्रधमः उद्देशः कृतः

हास्ये हसनम्, करूणे तु क्रन्दनम्, इति करुणे हास्याद् वैपरीत्यं प्रसिद्धमेव। करुणः शोकमूलः । शोकस्तदा भवति यदा क्रुद्धः कश्चनेष्टं हन्ति। एवं क्रोधस्थायिके रौद्रे करुणस्य कारणता स्फुटा। अर्थकामयोर्मूलमुत्साहो भवति। तं विनाऽर्थः कामो वा साधयितुं न शक्यते। अतोऽर्थकाममूलस्य धर्मप्रधानस्योत्साहस्थायिकस्य वीरस्योपदेशः । रौद्रो वीरश्च भयस्य कारणं भवति। क्रुद्धस्योत्साहवतश्च बधबन्धादिदर्शनेन भीरुषु भयोत्पत्तिः प्रसिद्धैव। एवं रौद्रवीराभ्यामनन्तरं भयानकस्योद्देशः। वीरेण वीभत्स आक्षिप्यते। वीरेण पुरुषेण रणे नैके प्राणिनो हन्यन्ते। तेषां रक्तवसादिज्ञानेन जुगुप्साया जन्म प्रसिद्धम्। अतस्ततो बीभत्सस्योद्देशः। वीरस्य पुरुषस्य लोकोत्तरपराक्रमादिदर्शनेन विस्मयो जायते। अतस्ततो विस्मयस्थायिकस्याद्भुतस्योद्देशः। अत एव भरतेन नाटकान्तेऽद्भुतस्य 'पर्यन्ते कर्तव्यो नित्यं हि रसोऽद्भुतः' इति विधानमनुशिष्टम्। एवं त्रिवर्गात्मकप्रवृत्तिमूला अष्टौ रसा उद्दिष्टाः। निवृत्तिरूपो मोक्षफलः शान्तोऽन्तिमो रसः। अत्र स्वात्मावेशेन रसचर्वणा भवति।'वीभत्साद्भुतशान्ताः' इति पाठे शान्तस्यात एवान्त उपदेशः। इदमेव रहस्यं शृङ्गारादीनां क्रमेणोद्देशस्य।

**स्थायिभावसंग्रहविभागः**

एवं रससंग्रहस्य विभागमभिधाय भरतेन भावसंग्रहविभागस्य प्रतिज्ञा विधीयते भावेषु प्रथमं स्थायिविभाग उच्यते च-

**पुनश्च भावान् वक्ष्यामि स्थायिसंचारिसात्त्विकान्।**
**रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।**
**जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥**

रसानां विभावादिभिर्निष्पत्तिर्भवति।

तत्त्वस्यैव ज्ञानेन जन्यो निर्वेदः शान्तस्य स्थायी

रसानां विभावादिभिर्निष्पत्तिर्भवति । विभावादीनां कैः सह संयोगे रसानां निष्पत्तिरिति शङ्कायाः समाधानाय रत्यादयः स्थायिभावा उद्दिश्यन्ते। किञ्च लौकिकीनां रत्यादिचित्तवृत्तीनां ज्ञानं विना कविना नटेन च तत्समुचिता विभावादयो वर्णयितुमभिनेतुं च न शक्यन्त इति भावानामुद्देशो रसोद्देशादनन्तरं कृतो भरतेन। भावेषु रसीभवनयोग्यतया प्रथमं रत्यादीनां स्थायिनामुपदेशो वर्तते। 'रतिर्हासश्च' इत्यत्र श्लोके शृङ्गारादीनां रसानां क्रमेण रत्यादयोऽष्टौ स्थायिभावा उद्दिष्टाः। 'विमयश्चेति' इत्यस्य स्थाने क्वचित् 'विस्मयशम' इत्यपि पाठो विद्यते। तेन शान्तरसस्य स्थायी भावः शम इति केचन मन्यन्ते। अन्येषा मते यथाश्रुत एव पाठः समीचीनः। 'अष्टौ नाट्ये रसाः स्मृताः' इत्यत्र यथाऽष्टसंख्या समुल्लिखिता तथा स्थायिनामुपेशे सा न चर्चिता, एतेन शान्तरसस्यापि स्थायी समुच्चीयते । अपरे तूत्साहमेव शान्तस्य स्थायिनं स्वीकुर्वन्ति। अन्ये तु जुगुप्सामेव शान्तस्य स्थायिनं मन्यन्ते। परे तु रत्यादीन् सर्वानेव शान्तस्य स्थायिन आहुः। किन्तु सिद्धान्तोऽयं यत् तत्त्वस्यैव ज्ञानेन जन्यो निर्वेदः शान्तस्य स्थायी, गृहकलहादिजन्यस्तु स व्यभिचारी भावः। अत एवाऽमङ्गलप्रायस्यापि निर्वेदस्य व्यभिचारिषु सर्वप्रथममुद्देशः। एषां रत्यादीनां सर्वेषु प्राणिषु संस्कारात्मना वर्तमानत्वेन स्थायिता भवति, अन्ये भावाः सर्वसाधारणा न भवन्ति। अन्येषां जगन्नाथादीनां मते तु रत्यादीनां भावानां व्यक्तेर्भूयस्त्वमेव स्थायिपदार्थो वर्तते। स्थायिभावोद्देशे रसोद्देशवद् अष्टसंख्याया अनुल्लेखस्य रहस्यमिदमपि वर्तते यदेते सर्वदा स्थायिन एव न भवन्ति, अपितु क्वचिद् रसे स्थायिनः, अन्यस्मिंस्तु व्यभिचारिणः। यथा हासः हास्ये स्थायी भवति, शृङ्गारे तु व्यभिचारी, क्रोधो रौद्रे स्थायी, वीरे तु व्यभिचारी।

**व्यभिचारिभावसंग्रहविभागः**

स्थायिसंग्रहविभागाद् अनन्तरं त्रयस्त्रिंशतो व्यभिचारिभावानां संग्रहविभाग एवं भरतेन

**निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदश्रमाः।**
**आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः॥**
**व्रीडा चपलता हर्ष आवेगो जडता तथा।**

निर्वेदादयः त्रयस्त्रिंशत् व्यभिचारिभावाः उच्यन्ते

**गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥**
**सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।**
**मतिर्व्याधिरथोन्मादस्तथा मरणमेव च ।।**
**त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।**
**त्रयस्त्रिंशदमी भावा विख्यातास्तु नामतः ।।**

एते निर्वेदादयः त्रयस्त्रिंशद् व्यभिचारिभावा उच्यन्ते। 'त्रयस्त्रिंशत्' इति वचनेन द्योतितं यदेते त्रयस्त्रिंशदेव भवन्ति, न ततो न्यूना अधिका वा। किञ्चैते व्यभिचारिण एव भवन्ति, न तु कदाचनापि रत्यादिवत् स्थायिनोऽपि भवन्तीत्यपि संख्योपादानेन द्योत्यते। एवं त्रयस्त्रिंशतो व्यभिचारिणः संग्रह उक्तः।

**सात्त्विकभावसंग्रहविभागः**

अष्टौ सात्त्विकाः

व्यभिचारिणः संग्रहस्य विभागादनन्तरमष्टानां सात्त्विकानां संग्रह एवमुच्यते-

**स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरसादोऽथ वेपथुः।**
**वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ।।**

व्यभिचारिणोऽनन्तरमेषामुद्देशस्य कारणमिदं वर्तते यदिमे व्यभिचारिभ्यो जायन्ते। स्वेदरोमाञ्चादयः श्रमहर्षादिभ्यो जायन्ते। एतेषामुपयोगो नाट्यदृशाऽभिनये भवति । उक्तमभिनवभारत्याम्- **'सात्त्विका व्यभिचारिवृत्तम् अभिनयवृत्तं चोपजीवन्तीति पृथगभिनयादिभ्यो गणिताः'** इति। एवमेते भावा एकोनपञ्चाशद् भवन्ति- अष्टौ स्थायिनः, त्रयस्त्रिंशद् व्यभिचारिणः, अष्टौ सात्त्विकाश्च । एषां सर्वेषां भावानां लक्षणं सप्तमाध्याये भावादिनामनिर्वचनेन सह प्रदर्शितम्। अत्र केवलमेषां संग्रहो विहितः।

**अभिनयसंग्रहविभागः**

आङ्गिको वाचिक आहार्यः सात्त्विकश्च- अभिनयाः

करादिरूपेणाङ्गेन वाचा रामादिवेषभूषादिभिश्च क्रियमाणाः 'आङ्गिको वाचिक आहार्यः सात्त्विकश्चे 'ति क्रमेण चत्वारोऽभिनया भवन्ति। उक्तम्-

**आङ्गिको वाचिकश्चैव आहार्यः सात्त्विकस्तथा।**
**चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः ॥**

अत्र श्लोके 'चत्वार' इति प्रतीकमादायाभिनवगुप्तो वदति यद्धनुर्मुकुटादिरूपस्यानुकार्यगतस्य नटेन धारणं योऽभिनयो

भवति सोऽनुकार्यस्य नायकस्य प्रत्यक्षायमाणत्वेऽभिनयान्तराद् आधिक्येनोपयुज्यते। अत आहार्याभिनयोऽभिनयेष्वन्तरङ्ग भवति । 'नाट्यसंश्रया' इति कथनेन सूच्यते यदेतेऽभिनया नाट्येऽनिवार्यत्वेन भवन्ति। एभिर्विना नाट्ये रसभावाभिव्यक्तिः कथमपि न संभवति। अस्मादेव कारणादेषां रसभावसंग्रहादनन्तरं संग्रहो वर्तते। अत एवैते नाट्यस्य प्राणा भवन्ति। एतान् विना नाट्यं निष्प्राणम्। लोके तु कदाचिदेतेऽभिनया भवन्ति, कदाचिच्च न भवन्ति । लोक एषां न नियमेन स्थितिः, नाट्ये तु सा नियता।

**धर्मिसंग्रहविभागः**

धर्मी द्विविधः – लोकधर्मी नाट्यधर्मी च।

अभिनया अभिनेतव्यं विना न संभवन्ति। अभिनय इत्युक्तौ कस्याभिनय इति प्रश्नो हि भवति। अतोऽभिनेतव्यो वस्तुरूपो द्विविधो धर्मी कथिताभिनयचतुष्टयस्य संग्रहादनन्तरं संगृह्यते। स धर्मी द्विविधः लोके प्रसिद्धो धर्मी लोकधर्मी, तदुपजीवी नाट्य एवं प्रसिद्धो नाट्यधर्मी च। कविना वर्ण्यमानो नटेनाभिनीयमानश्च काव्यस्य स कथाभागो लोकधर्मी कथ्यते यो लोक एव प्रसिद्धेन स्वभावेनान्वितो भवति, यथा दशरथवचनेन रामस्य वनवासः पुत्रशोकेन मूर्च्छादि च। अत्र लोकमात्रप्रसिद्धधर्माश्रयत्वेनाऽयं लोकधर्मी कथ्यते। यस्तु कथाभागो लोकधर्माश्रयः सन्नपि उचितकल्पनाविशिष्टो नटेन नाट्योक्तस्वगतादिविधिनाऽभिनीयमानश्च भवति स नाट्यधर्मी कथ्यते। यथा राजशेखरेण कृता रामवनवासे दशरथवेशधारिणा राक्षसेन कृतत्वस्य कल्पना नाट्यधर्मो वर्तते, अतस्तेन विशिष्टये रामवनवासो नाट्यधर्मी विद्यते। रामस्य वनवासो दशरथकृत इति लोके प्रसिद्धम्। किन्तु तत्र दशरथरूपराक्षसकृतत्वमेव कल्पितम्। एवमत्र लोकधर्मस्य नाट्यधर्मस्य चानुसरणम्। एवं नटेन स्वगतादिभिः प्रकाश्यमानोऽनुकार्यात्मगतः पात्रान्तरेणाऽश्रूयमाणः सामाजिकैर्ज्ञायमानोऽर्थो नाट्यधर्मी कथ्यते। एवं स्वभावोक्तिवक्रोक्तिविषयोऽर्थो नाट्यधर्मी। काव्यस्य नाट्यस्य चोभयोर्लोकानुसारित्वं वक्रोक्तियुक्तत्वं च प्रसिद्धम्। लोकधर्मी तत्र नाट्यधर्मिण आधारभूतत्वेन प्राधान्यात् प्रथम उद्देशः। एतन्नाट्यशास्त्रस्य त्रयोदशेऽध्यायेऽभिनवभारत्यां च स्पष्टम्। इह भरतेन **'लोकधर्मी नाट्यधर्मी धर्मी तु द्विविधः स्मृतः'** इति

नटेन नाट्योक्तस्वगतादिविधिनाऽभिनीयमानश्च भवति स नाट्यधर्मी कथ्यते।

द्विविधधर्मिसंग्रह उक्तः। कविना नटेन चोभयो धर्मिणोर्वर्णनेऽभिनये चाध्यासो विधेय इति तयोरप्युद्देश आवश्यक इति भावः।

**वृत्तिसंग्रहविभागः**

वृत्तयो नाटकादिभिर्दशभी रूपकैः संम्बन्धेनाभिनयस्योपकारिण्यो भवन्ति। अतो धर्मिसंग्रहादनन्तरं भारती-सात्त्वती-कैशिक्यारभटीरूपाणां चतसृणां वृत्तीनां संग्रह उच्यते भरतेन-

**भारती सात्त्वती चैव कैशिक्यारभटी तथा। चतस्रो वृत्तयो ह्येता यासु नाट्यं प्रतिष्ठितम् ॥**

भारती सात्त्वती कैशिकी आरभटी च वृत्तयः

वाचिकी कायिकी मानसी च नानाप्रकारा चेष्टा सामान्येन वृत्तिरुच्यते । अनादिकालात् प्रवहन्त्येषा समस्तं जीवलोकं व्याप्नोति । एषा यदा विशेषरूपेण हृदयं प्रविशति तदा नाट्योपयोगिनी भवति। अस्या हृदये प्रवेशो द्विधा लौकिकोऽलौकिकश्च । तत्राद्ये सुखदुःखयोस्तारतम्येन तारतम्यं भवति । द्वितीयस्तु कविसहृदयहृदययोः साधारण्येन भवति। एषैव कविसहृदयहृदययोः साधारण्येन प्रविशन्ती (प्रतीयमाना) चमत्कारगोचरः कायिकवाचिकमानसचेष्टारूपो व्यापारो वृत्तिशब्देनात्रोच्यते। अयमेव रसोपयोगित्वेन नाट्ये उपयुज्यते। इदं विंशेऽध्यायेऽभिनवभारत्यां स्पष्टम्। यद्यपि वृत्तिरेषा नानाप्रकारा तथापि संकलनधिया चतुर्धा मन्यते। न्यूनाधिकसंख्यानिवारणार्थमत्र 'चतस्रः' इत्युक्तम्। तत्राद्या भरतशिष्यैर्भरतेन प्रयुज्यमानत्वाद् भारतीपदवाच्य-वचनरूपत्वाच्च संस्कृतभाषामयी पुरुषमात्रेण प्रयोज्या वाग् भारती, द्वितीया 'सत्त्वं प्रकाशो विद्यतेऽस्येति सत्त्ववत् सत्त्वगुणोपेतं मन उच्यते, तत्र सत्त्ववति मनसि भवा' इति सात्त्वतशब्दस्य व्युत्पत्त्या प्रधानमनोव्यापाररूपा सात्त्वती, शृङ्गारे केशबन्धनादिललितव्यापाररूपा कैशिकी, आरभटानां महाशूराणां शत्रुवधबन्धादिरूपव्यापारलक्षणाऽऽरभटीति चतस्रो वृत्तयो भवन्ति। एता वृत्तयो भगवतो विष्णोर्वाचिकशारीरमानसव्यापारेभ्यः मधुकैटभवधसमये समुत्पन्नाः। आसामृग्वेदादिभ्योऽप्युद्भवः 'ऋग्वेदाद् भारती क्षिप्ता यजुर्वेदाच्च सात्त्वती। कैशिकी सामवेदाच्च शेषा

ऋग्वेदाद् भारती क्षिप्ता यजुर्वेदाच्च सात्त्वती। कैशिकी सामवेदाच्च शेषा चाथर्वणादपि ।

चाथर्वणादपि ।।' इत्यादिना प्रतिपादितः स्वरूपमपि च विस्तरेण विंशेऽध्याये प्रतिपादितम्।

**प्रवृत्तिसंग्रहविभागः**

भारतीप्रभृतीनां चतसृणां वृत्तीनां देशभेदेन नाना भेदा भवितुमर्हन्तीति वृत्तिसंग्रहविभागाद् अनन्तरं प्रवृत्तिसंग्रहस्य विभाग उक्तः। 'अत्राह प्रवृत्तिरिति कस्मात्? उच्यते- नानादेशवेषभाषाचारवार्ताः प्रख्यापयतीति वृत्तिः। प्रवृत्तिश्च निवेदने' इति त्रयोदशेऽध्याये भरतस्य वचनेन स्पष्टं भवति यद् विविधानां देशानां वेषैर्भाषाभिराचारैर्व्यवहारैश्च सम्बद्ध नाट्यतत्त्वं प्रवृत्तिरस्ति। प्रवृत्तिर्नानादेशाचारादीन् बोधयति। यद्यपि देशास्तेषां वेषादयश्चानन्ताः सन्ति तथापि भारतवर्षदृशा देशाश्चतुर्धा विभज्यन्ते दक्षिणदेशः, पश्चिमदेशः, पूर्वदेशः, उत्तरदेशश्च । विन्ध्याद् दक्षिणस्यां दक्षिणसमुद्राद् उत्तरस्यां च वर्तमानो महेन्द्रादिपर्वतैरधिष्ठितो दक्षिणदेशः। अत्र शृङ्गारस्य प्राचुर्येण या प्रवृत्तिः सा कैशिकीप्रधाना भवति। इयमेव दाक्षिणात्या प्रवृत्तिः प्रथमा वर्तते। शृङ्गारप्रधानो दक्षिणदेश इति भावः। सैन्धव-सौराष्ट्रावन्ति-सौवीरादिरूपः पश्चिमदेशः। अत्रापि कैशिकी, धर्मप्राधान्ये च सात्त्वती वृत्तिः प्रधानतां भजतः। पश्चिमभागस्थमवन्तिदेशमेवानुसृत्य सैन्धवादौ प्रवृत्तेरनुसरणेन प्राधान्याद् अवन्तिदेशे भवा प्रवृत्तिरावन्ती द्वितीया वर्तते। उड्राऽङ्ग-वङ्ग-कलिङ्ग-मगधादयः पूर्वदेश आयान्ति। पूर्वदेशस्य दाक्षिणात्यः सीमा समुद्रनिकटे वर्तमान उड्देशः, औदिच्यः सीमा च मगधदेशो वर्तते। एवमुड्रमगधदेशयोः तदन्तराले वर्तमानेष्वङ्गकलिङ्गादिषु च विद्यमाना भाषाचारादिरूपा तृतीया प्रवृत्तिरौड्रमागधी कथ्यते। पूर्वदेशे घटाटोपवाक्याडम्बरस्य प्राधान्येन भारत्यारभंट्योवृत्त्योः प्राधान्येन सम्बन्धो भवति। कश्मीर-पञ्चाल-हस्तिनापुरप्रभृतयो हिमालये तत्समीपे च वर्तमाना गङ्गायाश्चोत्तरस्यां विद्यमाना देशा उत्तरदेश आयान्ति । एतेषु पञ्चालदेशो मध्यमः। अतः पञ्चालमध्यमेषु देशेषु वर्तमाना प्रवृत्तिश्चतुर्थी मध्यमा पाञ्चाली वर्तते। एषूत्तरदेशेषु प्राधान्येन भारत्या आरभट्याश्च सम्बन्धः, अल्पनृत्यगीतादिप्रयोगेणात्र कैशिक्यपि गुणरूपेण भवति। अत एवात्रत्या जनाः शृङ्गारमयं

अवन्ती, दाक्षिणात्यः,औड्रमागधी, पाञ्चाली च चतस्रः प्रवृत्तयः

विविधानां देशानां वेषैर्भाषाभिराचारैर्व्यवहारैश्च सम्बद्ध नाट्यतत्त्वं प्रवृत्तिः।

प्रयोगं सहन्ते। भारतवर्षस्यायं प्रदेशानां चतुर्धा विभागश्चित्तवृत्तिभेदेन कृतः। तदाधारेण चतस्रः प्रवृत्तयो विभक्ताः। एता एवाग्रे रीतिपदेनापि निगदिताः। इदं त्रयोदशेऽध्याये विस्तरेण द्रष्टुं शक्यते। इह चतुर्धा प्रवृत्तिसंग्रहविभाग एवं दर्शितो भरतेन-

**'आवन्ती दाक्षिणात्या च तथा चैवोड्रमागधी।**

**पाञ्चाली मध्यमा चैव ज्ञेया नाट्यप्रवृत्तयः ।।**

**सिद्धिसंग्रहविभागः**

एतेषामभिनयादीनां पर्यवसानं सिद्धावेव भवतीति सिद्धिसंग्रहविभागोऽत्रोच्यते। सा सिद्धिर्द्विधा भवति दैविकी मानुषी चेत्याह भरतः **'दैविकी मानुषी चैव सिद्धिः स्याद् द्विविधैव च।'** इति। **'साध्यप्रयोजनसम्पत्तिः सिद्धिः'** इत्यभिनवभारतीवचनेन साध्यस्य प्रयोजनस्य प्राप्तिरेव सिद्धिरिति फलितं भवति। एषा रसभावरूपा सिद्धिः सामाजिकगता, नटगता च सा नाट्यप्रयोगस्य सम्यङ्निष्पत्तिरूपा भवति। नटगतायाः सिद्धेः फलं सामाजिकगता रसभावसिद्धिः। तत्र मनुष्यप्रयत्नेन जाता सिद्धिर्मानुषी, अदृष्टरूपेण दैवेन साध्या सिद्धिस्तु दैवी दैविकी वा कथ्यते। सामाजिकाश्रया नटाश्रया चैषा सिद्धिरग्रे प्रतिपादिता। तत्र तत्र दैवी सिद्धिर्द्विविधा मानुषी च दशविधा विस्तरेण प्रतिपादिता । नान्द्यादिजन्यादृष्टसाध्यो रङ्गविघ्नाभावो दैवी सिद्धिरित्युदाहरणत्वेन वक्तुं शक्यते। नटदर्शकरूपस्य मनुष्यस्य वचनादिसाध्या तु मानसी। सप्तविंशेऽध्याये सिद्धेरुल्लेखो विशेषरूपेण वर्तते।

दैविकी मानुषी च सिद्धिः द्विविधः।

**स्वरसंग्रहविभागः**

स्वरो रङ्गे सामाजिकचित्तस्यैकाग्रतायामत्यन्तमुपयोगी सन् रङ्गविघ्नाभावसाधनेन सिद्धावुपयुज्यते। अतो स्वरसंग्रहस्य विभाग उच्यते। स्वरा द्विविधा भवन्ति शरीरे करमुखादी भावाः शारीराः, वंश्यादौ भावाः सुषिराश्च। एते पुनः प्रत्येकं सप्त सप्त भवन्ति षड्जः, ऋषभः, गान्धारः, मध्यमः, पञ्चमः, धैवतः, निषादश्च। उक्तम् - 'शारीरा वैणवाश्चैव सप्त षड्जादयः स्वराः' इति।

स्वराः द्विविधाः – शारीराः, सुषिराश्च

**आतोद्यसंग्रहविभागः**

यस्य लक्षणं नाट्यशास्त्रे विधीयते तद् आतोद्यम् आ समन्ताद् रसानुकूलत्वेन तुद्यते ताड्यते वाद्यत इत्यातोद्यं वाद्यमुच्यते। स्वरे वाद्यसंयोगेनाऽधिकरञ्जकता भवति। अत आतोद्यसंग्रहविभाग उच्यते-

**ततं चैवावनद्धं च घनं सुषिरमेव च।**
**चतुर्विधं च विज्ञेयमातोद्यं लक्षणान्वितम् ।।**

आतोद्यं चतुर्धा भवति ततम्, अवनद्धम्, घनम्, सुषिरं चेति। 'लक्षणान्वितम्' इति पदेन भरतः सूचयति यल्लौकिकं मल्लकपट-फलक ज्वालामुखप्रभृति वाद्यं वर्तते तन्नाट्ये बाधकत्वेनात्र न संगृह्यते लक्ष्यते च । एषां ततादीनां लक्षणं भरतेनाग्रे प्रतिपादयिष्यते। यद्यप्यग्रे लक्षणं कृतं तथापि सर्वमेव चर्मकारादिवाद्यं वक्ष्यमाणेन लक्षणेनानुगतं न वर्तते । तन्त्रीसम्बद्ध वीणादिरूपमातोद्यं ततं कथ्यते, चर्मावनद्धमुखं काष्ठादिनिर्मितं पुष्करावर्तकदेवताधिष्ठितत्वेन पुष्करपदवाच्यकमलपत्राकारयेगेन वा पौष्करशब्देन बोद्धयं ढोलादिरूपम् अवनद्धं कथ्यते, तालसाम्यार्थं हन्यमानं तालैकप्रमाणं कांस्यतालादि घनमुच्यते, वंशनिर्मितं वंशीप्रभृति सुषिरं गद्यते च। उक्तम्- **ततं तन्त्रीगतं ज्ञेयमवनद्धं च तु पौष्करम्। अत्रैवकारेण काहलाद्यातोद्यस्य निषेधः सूचितः। घनस्तु तालो विज्ञेयः सुषिरो वंश एव च।**

आतोद्यं चतुर्धा भवति ततम्, अवनद्धम्, घनम्, सुषिरं च।

**गानसंग्रहविभागः**

अथ स्वरस्य गानयोगे सत्यतीवोपरञ्जकत्वं भवतीति गानसंग्रहस्य विभाग उच्यते। अत्र प्रश्नो भवति यत् स्वरगानयोः को भेद इति । अस्योत्तरमभिनवभारत्यामेवं दत्तम्- 'स्वराः पाठ्य-गानसंगृहीता अपि पृथगुपात्ताः। केवलानामपि प्रयोगोपरञ्जकत्वं यल्लक्ष्ये दृश्यते यत्रान्तरालाप इति प्रसिद्धिः तदभ्युपगमार्थम्' इति । अस्य कथनस्याभिप्रायो वर्तते यत् स्वरगानयोर्भेदो भवति। स्वरो पाठ्यरहितोऽपि प्रयुज्यमानः रञ्जयति, गानं तु पाठ्यसहितमेव प्रयुज्यते। अन्तरालापे स्वरस्य रञ्जकत्वं प्रसिद्धमेव। गाने ध्रुवाया योगो भवति। 'ध्रुवा गीत्याधारो नियतः पदसमूहः' इत्यभिनवभारतीवचनेन प्रतीयते

गानं तु पाठ्यसहितमेव प्रयुज्यते।

यर्थप्राधान्येन अर्थपरत्वेन नियतो यो पदसमूहो यमाश्रित्य गानं क्रियते च स ध्रुवा कथ्यते। एवं गाने गेयपदसमूहस्य सार्थकताऽनिवार्या भवति, स्वरस्तु न सार्थकमेव शब्दमाश्रित्य प्रयुज्यते। ध्रुवायुक्तं गानं पञ्चविधं भवति। पात्रस्य प्रवेशे भावप्रकृत्यादिसूचकं यद् गीयते तद् गानं प्रवेशगानं प्रथमम्, अन्यस्य रसस्योपक्षेपार्थ यद् गानं गीयते तद् आक्षेपगानं द्वितीयम्, पात्रस्य निष्क्रमणे यद् गीयते तद् निष्क्रामगानं तृतीयम्, रङ्गमञ्चे प्रविष्टस्य पात्रस्य चित्तवृत्तिं सामाजिकान् प्रति प्रसादयितुम्-प्रथयितुं सञ्चारयितुं यद् गीयते तद् गानं प्रसादगानं चतुर्थम्, 'प्रसादः प्रयोजनमस्य' इति व्युत्पत्त्या गानमिदं प्रासादिकमपि कथ्यते, प्रयोजनेऽत्र प्रसादशब्दाट्ठन् प्रत्ययः, गतिपरिक्रमणाद्यवसरे यद् गीयते तद् आन्तरं गानं पञ्चमं च भवति। उक्तं भरतेन-

**प्रवेशाक्षेपनिष्क्रामप्रासादिकमथान्तरम्।**
**गानं पञ्चविधं ज्ञेयं ध्रुवायोगसमन्वितम्।।**

**प्रकृतिः उपचारः च**

**उत्तमाधममध्या च प्रकृतिस्त्रिविधा स्मृता।**
**बाह्याभ्यन्तरसंभूतमुपचारद्वयं भवेत्।।**

उत्तमप्रकृतिः मध्यमप्रकृतिः अधमप्रकृतिः इति प्रकृतिः त्रिविधा भवति। तथा बाह्योपचारः आभ्यन्तरोपचारः इति उपचारं द्विविधम् भवति।

**रङ्गसंग्रहविभागः**

अभिनयादयो रङ्गे रङ्गमण्डपे एव प्रदर्श्यन्ते ।

एतेऽभिनयादयो रङ्गे रङ्गमण्डपे एव प्रदर्श्यन्ते । अतो रङ्गस्याभिनयादिसर्वोपकारकत्वेन रङ्गसंग्रहस्य विभाग उच्यते। स त्रिधा भवति- चतुरस्रः- 'चतस्रोऽस्रयः कोणा अस्येति तेन चतुष्कोणो वर्गाकारः प्रथमः, विकृष्टः= **'विभागेन कृष्टो दीर्घः, न तु चतसृषु दिक्षु साम्येन'** इत्यभिनवभारतीवचनेन मध्ये दीर्घ आयताकार इति यावद् द्वितीयः, त्र्यस्रः- त्रिकोणस्तृतीयश्च। उक्तम्- **'चतुरस्रो विकृष्टश्च रङ्गस्त्र्यस्रश्च कीर्तितः'** इति। रङ्गसंग्रहेणैव कक्ष्याणामपि विभागः संगृह्यत इति पृथक् कक्ष्यासंग्रहस्तस्य विभागश्च नोक्तः ।

**रसादिनिरूपणस्य प्रतिज्ञा**

एवं भरतेन मुनीनां प्रश्नान् निशम्य संग्रहकारिकानिरुक्तानां स्वरूपं सोदाहरणं प्रतिपादितम्, रसभावादिरूपस्य नाट्यवस्तुनः संग्रहस्तस्य विभागश्च बोधितः। सम्प्रति तेनाऽनेन श्लोकेन रसभावादिनिरूपणस्य प्रतिज्ञा विधीयते-

**एवमेषोऽल्पसूत्रार्थो व्यादिष्टो नाट्यसंग्रहः।**
**अतः परं प्रवक्ष्यामि सूत्रग्रन्थविकल्पनम्।**

अस्याभिप्रायो वर्तते यन्मया भरतेन अल्पसूत्रार्थः अल्पः सूत्ररूपो लक्षणरूपोऽर्थो यत्र सूचितो वर्तते स नाट्यसंग्रहो व्यादिष्टः विशेषरूपेण संग्रहरूपेण आसमन्ताद् तद्विभागरूपेण चोक्तः। तदनन्तरमहं भरतः सूत्रग्रन्थविकल्पनम् रसादेः सूत्रं लक्षणम्, सूत्रशब्देनात्र कारिकाऽपि ग्राह्या, तेन तां कारिकामपि, ग्रन्थम् भाष्यम्, तेन कृतं विकल्पनम् आक्षेपप्रतिसमाधानरूपो विचार इति निरुक्तपदेन वाच्यां परीक्षां च प्रवक्ष्यामि प्रकर्षेण कथयिष्यामि। पूर्व रसादिरूपं नाट्यवस्तु उद्देशरूपेण सूचितम्, इदानीं तस्य लक्षणं परीक्षा चोच्यत इति भरतो लक्षणपरीक्षाभ्यां रसादिनिरूपणं प्रतिजानीते। रसादिनिरूपणे पूर्व सूत्रमुच्यते, ततो भाष्यनिरुक्तपदवाच्या परीक्षा भवति, तदनन्तरं तु कारिकोच्यते। कारिका सूत्रार्थमपि प्रकाशयति, आक्षेपसमाधानविचारेण क्लिष्टं परिश्रान्तं शिष्यजनं निर्णीतस्यार्थस्य निरूपणेनोपकरोति चेति परीक्षाप्रतिपादकाद् भाष्यात् पश्चात् कारिकायाः पाठोऽग्रे विहितो भरतेन। रसादीनां निरूपणं सूत्र-परीक्षा-कारिकावाक्येनाऽग्रे करिष्यते।

## Summarised Overview

मुनिभिर्भरतं प्रति रस-भाव-संग्रह-कारिका-निरुक्तविषये पञ्च प्रश्नाः, अथवा रसविषय एको भावविषयाश्च चत्वार इति पञ्च प्रश्नाः, संग्रहस्य, कारिकायाः, निरुक्तस्य च सोदाहरणं स्वरूपम्, कोहलमतेन रसादिरूपाणामेकादशानां नाट्यवस्तूनां संग्रहः, तस्य विभागः, रसादीनां संग्रहे क्रमस्य रहस्यम्, अन्ते भरतेन रसभावादिनिरूपणस्य प्रतिज्ञा चेत्येतत् प्राधान्येन प्रतिपादितम्। रसो नाट्ये प्रधानं तत्त्वम्। रस एव वस्तुतो नाट्यशब्देन वाच्यम् ।

असावखण्ड एव वस्तुतः, तथापि तस्य श्रृङ्गारादिरूपो विभागः सत्यभूतोऽसत्यभूतश्च मन्यते। रसार्थमेव समेषां नाट्याङ्गानां प्रवृत्तिः। सूत्रं कारिका संग्रहो निरुक्तं च वस्तुतोऽर्थस्यैव संज्ञाः सन्ति, एषां प्रतिपादके शब्दे सूत्रादिसंज्ञा त्वारोपिता लाक्षणिकी मन्यते। अभिनवगुप्तानुसारेण संग्रहः उद्देशः, सूत्रं कारिका च लक्षणम्, निरुक्तं च परीक्षा, कथ्यते।

## Assignments

1. नाट्यसंग्रहस्य विभागान् विशदयत।
2. स्थायीभावसंग्रहविभागं निरूपयत।
3. सात्विकभावसंग्रहविभागं निरूपयत।
4. धर्मीसंग्रहविभागं विशदयत।
5. प्रवृत्तिसंग्रहविभागं निरूपयत।

## Suggested Readings


1.Bharata Muni, Natyasastra, Edited by Manomohan GhoshChoukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

# References

1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice,MotilalBanarasidass Publishers, Delhi.1924

SGOU

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# रसचर्चा

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

भरतमुनेर्नाट्यशास्त्रं प्रसिद्धम्। अस्य षष्ठाध्याये मुख्यरूपेण रसः सभेदं निरूपितः। किन्तु सहैव नाट्यविषयाणामन्येषामपि तत्त्वानामत्रानुषङ्गिकरूपेण निर्देशो विहितः। अयं षष्ठ एवाभिनवभारतीसहितोऽध्यायः पाठ्यग्रन्थत्वेन निर्धारितो वर्तते। अस्मिन् षष्ठाध्याये मुनिभिरात्रेयप्रभृतिभिः रसभावादिविषये पृच्छ्यते। भरतमुनिना तेषां प्रश्नानामुत्तरं दातुं प्रतिज्ञायते । प्रसङ्गत उद्देश-लक्षण-परीक्षारूपाणां संग्रह-कारिका-निरुक्तानां सोदाहरणं लक्षणमपि विहितं भरतेन । मुनिभिः के कथं च प्रश्नाः कृता भरतेन कथं च तेषामुत्तराणि दातुं प्रतिज्ञा क्रियत इति पाठेऽस्मिन् भवन्तो ज्ञास्यन्ति। ततः पूर्व भरतमुनिविषये तदीयनाट्यशास्त्रविषये च ज्ञातव्यमिति तद्विषयेऽपि समासेनोच्यते।

नाट्यशास्त्रे 36 अध्यायाः सन्ति। अत एवाभिनवभारत्यां 'सप्तर्िंश' इत्यपि पाठान्तरं लभ्यते। नाट्यशास्त्रस्य प्रामाणिकी संस्कृतटीकाऽभिनवभारती मूलस्य रहस्यं सम्यक् प्रतिपादयति । यद्यभिनवभारती चाऽभविम्यत् तदाऽनेकत्र नाट्यशास्त्रस्य रहस्यमज्ञातमेवाऽभविष्यत्। नाट्यशास्त्रस्य षष्ठेऽध्याये नाट्यन्नागभूतो रसो मुख्यरूपेण विवेचितः । अत्रैवाध्याये 'विभावानुभावसंचारिसंयोगाद् रसनिष्पत्तिः' इति रससूत्रं रसस्य निरूपिता भेदाश्च लभ्यन्ते। तत्राऽस्मिन् पाठे षष्ठाध्याये मुनिकृतानां प्रश्नानाम् उत्तरदानार्थं भरतमुनिना कृतायाः प्रतिज्ञायाश्च मुख्यतो निरूपणं विधीयते।

## Keywords

रसभावादिविषये प्रश्नाः,आस्वाद्यते, शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतश्च।

## Discussion

**मुनीनां रसभावादिविषये प्रश्नाः**

प्रथमाध्यायम् आरभ्य पञ्चममध्यायं यावद् भरतेन नाट्यवेदस्योद्भवो नाट्यसम्बद्धस्य पूर्वरङ्गस्य च विधिर्वर्णितः। एवं पूर्वरङ्गविषयम् अवगत्यात्रेयप्रमुखा मुनयो भरतं प्रति पञ्च प्रश्नान् कुर्वन्ति। तत्र प्रथमः प्रश्नो रसविषयो वर्तते। प्रथमाध्याये नाट्यस्योद्भवो वर्णितः। तत्रर्ग्वेदात् पाठ्यस्य, सामवेदाद् गानस्य, यजुर्वेदादभिनयस्य, अथर्ववेदाद् रसस्य च ग्रहणं विधाय विधात्रा नाट्यनामकः पञ्चमः सार्ववार्णिको वेदो रचित इति चर्चा कृता। तत्र पाठ्य-गानाभिनयाः प्रसिद्धाः। किन्तु प्रकृते रसपदेन कः पदार्थो विवक्षित इति ज्ञातुं न शक्यते। लोके षाडवादयो मधुरादय एव वा रसपदेन बोध्यन्ते। किन्तु 'रसान् आथर्वणादपि' इत्यत्र प्रथमाध्यायेऽथर्ववेदाद् यस्य रसस्य ग्रहणस्य चर्चा वर्तते स 'रस्यते आस्वद्यते इति रसः' इति व्युत्पत्त्या रसनीयत्वेन रसपदवाच्यषाडवादिरूपो रसपदवाच्यमधुरादिरूपो वा न भवितुमर्हति। येऽपि शृङ्गाररससंभवः' इत्यत्र चतुर्थाध्याये, 'ततो रौद्ररसं श्लोकम्' इत्यत्र पञ्चमाध्याये चैवमादी ये शृङ्गारादयः प्रयुक्तास्ते रसपदेन कथं वाच्या भवितुमर्हन्ति ? रसशब्दो द्विधा निष्पद्यते। तन्त्र चुरादेः 'रस आस्वादनस्नेहनयोः' इति रसयतेर्निष्पन्नो रसशब्दो लौकिकं मधुरादिरसं बोधयति। यदि कर्मणि प्रत्ययस्तदा रसनीयेन्द्रियविषयोऽर्थः। यो रस्यते स रस इति। यदि भावे

रस्यते आस्वाद्यते इति रसः

प्रत्ययस्तदा रसनं रस इति व्युत्पत्तौ सत्यामास्वादोऽर्थः। यदि तु 'रस शब्दे' इति भौवादिकाद् रसते रसशब्दो मन्यते तदा कर्मणि प्रत्यये यो रस्यते शब्देन बोध्यते सः, भावे च रसनं शब्दनं शब्देन बोधनं शाब्दी प्रतीतिर्वा रस इत्यर्थः। एवं रसपदार्थविषये भवति जिज्ञासा यद् रसशब्देन के पदार्थाः स्वीकरणीयाः, रसानां रसत्वं रसपदवाच्यत्वं केन कारणेन, रसपदस्य प्रवृत्तिनिमित्तं किं वेति भवति प्रश्नः। रसो नाट्याङ्गेषु 'खिन्नां रसभावेषु (5/159)' इत्यत्र भरतेन रसं प्रत्यादरातिशयः प्रदर्शित इति प्रधानमिति रसविषयकः पूर्व सूचितोऽपि पुनः प्रश्नो युज्यते। एवं रसपदार्थविषये भरतं प्रति मुनीनां प्रथमः प्रश्नः। प्रश्नोपक्रम एवं कृतः षष्ठाध्यायारम्भे-

यो रस्यते स रसः

**पूर्वरङ्गविधिं श्रुत्वा पुनराहुर्महत्तमाः।**
**मुनयो भरतं सर्वे प्रश्नान् पञ्च ब्रूहि मे ॥** ये रसा इति पठ्यन्ते नाट्ये नाट्यविचक्षणैः। रसत्वं केन वा तेषामेतदाख्यातुमर्हति ।

अत्र 'पठ्यन्ते' इति प्रयोगेण रसशब्दस्य शब्दार्थकादपि रसधातोर्निष्पत्तिः सूचितेति 'अत एव शब्दप्रादुर्भाव इति शब्दो रसा इति पठ्यन्त इति' इत्यभिनवभारतीवचनेन प्रतीयते।

भावविषयो द्वितीयः प्रश्नो वर्तते। अत्रावान्तराश्चत्वारः प्रश्नाः सन्ति। यद्यपि नाट्योत्पत्तिकथनप्रसङ्गे भावा न चर्चितास्तथापि 'खिन्नाम्' इति पूर्वोक्ते पद्ये केचन भावा रससहभावेनाऽभिहिताः। ते च भावा रससहचारित्वेन कथमुक्ता इति प्रथमः प्रश्नः। किं पाठ्यगानादय एव भावा उताऽन्ये सन्तीति द्वितीयः प्रश्नः। भावशब्दस्य निर्वचनम् = व्युत्पत्तिः किं वर्तत इति तृतीयः प्रश्नः । तत्रापि 'किं भवन्ति उत्पद्यन्त इति भावाः' इति, भावयन्ति इति भावाः' इति वा व्युत्पत्तिः? 'भावयन्ति' पक्षे भावयन्तिपदस्य कोऽर्थः- उत्पादयन्ति इति, व्याप्नुवन्ति बोधयन्तीति वार्थः। भावाः कं पदार्थमुत्पादयन्ति व्याप्नुवन्ति बोधयन्ति वेत्युत्पादनस्य व्यापनस्य बोधनस्य वा कर्मविषये चतुर्थः प्रश्नः। एवं भावविषये चत्वारः प्रश्ना एवमभिहिता ध्वनिताश्च-

भावाश्चैव कथं प्रोक्ताः किं वा ते भावयन्ति हि।

अत्र चशब्देनापिशब्देन च भावविषयाश्चत्वारः प्रश्नाः कृता इत्यभिनवभारत्यां स्पष्टम्। एवं भावविषयाश्चत्वारो रसविषयश्चैक इति संकलय्य पञ्च प्रश्नाः सन्ति। तत्र भरतेन रसविषय एव प्रश्नः षष्ठाध्याये समाहितः, भावविषयास्ते सप्तमे समाहिताः। संग्रहः कः पदार्थ इति संग्रहविषये तृतीयः प्रश्नः, कारिका कः पदार्थ इति कारिकाविषयश्चतुर्थः, निरुक्तं कः पदार्थ इति निरुक्तविषये पञ्चमश्च प्रश्नो वर्तते। इमे संग्रहादिविषयास्त्रयः प्रश्नाः "संग्रहं कारिकां चैव निरुक्तं चैव तत्त्वतः' इति वचनेन सूचिताः। अथवैषा पञ्चप्रश्नी कथं समुत्तरणीयेति विधिरपि मुनिभिरुच्यते "संग्रहं कारिकां चैव निरुक्तं चैव तत्त्वतः' इति । रसभावानां तात्त्विकं निरूपणं भवता भरतेन संग्रहेण उद्देशेन, कारिकया = लक्षणेन, निरुक्तेन परीक्षया निर्वचनेन च कर्तव्यमिति मुनीनां प्रश्नस्याभिप्रायः ।यदि कश्चन पदार्थ उद्देशलक्षणपरीक्षाभिर्निरूप्यते तदा स सम्यम् ज्ञातो भवति। यद्येवं निरूपणं व भवति तदा पदार्थो यथार्थरूपेण ज्ञातुं न शक्यते। अतएव 'तत्त्वतः' इति पर प्रयुक्तम्। ततश्चास्मिन् पक्षे रसविषय एको भावविषयाश्च चत्वारः प्रश्ना इति पञ्च प्रश्ना भवन्ति। तत्र पूर्वपक्ष एवं समीचीनो भाति। अत एव भरतेनाग्रे संग्रहादीनामपि स्वरूपमुच्यते। एवं मुनिभिर्भरतमुनिं प्रति पञ्च प्रश्नाः कृताः। एते रसभावादिविषया वस्तुतः पूर्वमेवोक्तास्तथाप्यत्र तेषां विस्तर इत्याहाऽभिनवभारती।

**भरतेन रसभावादिनिरूपणस्य प्रतिज्ञा**

पञ्चानां प्रश्नानामुत्तराणि दातुं भरतेन प्रतिज्ञायते स संग्रहकारिकानिरुक्तपदार्था अपि सोदाहरणं निरूप्यते। तत्र बुद्धिवैशद्याय संग्रहस्य नैकान्युदाहरणानि दीयते। मुनीनां प्रश्नान् निशम्य भरतो वदति यद् यथा भवद्भिः रसभावविषये पञ्चप्रश्नाः कृतास्तथैवाहमुतराणि कथयामि। रसभावयोः तत्वतोनिरूपणं संग्रहकारकारिकानिरुक्तेरेव कर्तुं शक्यते। विस्तरेण तु तन्न संभवति,यतः शास्त्राणि शिल्पानि चानन्तानि सन्ति। एवं सर्वशास्त्रशिल्पमयत्वेन नाट्यमनन्तं विद्यते। नाट्यतत्त्वेषु कस्यचनैकस्यापि सीमा निर्धारयितुं न शक्यते। संग्रहादिरूपमुपायं विहाय रसभावयोरपि विवेचनमनन्तत्वेन न

संभवति। अतो निरूपणार्थं संग्रहादिरेवोपाय आश्रीयते। उक्तं नाट्यशास्त्रे

**तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः।**
**प्रत्युवाच पुनर्वाक्यं रसभावविकल्पनम् ।।**
**अहं वः कथयिष्यामि निखिलेन तपोधनाः।**
**संग्रहं कारिकां चैव निरुक्तं च यथाक्रमम्॥**
**न शक्यमिह नाट्यस्य गन्तुमन्तं कथञ्चन।**
**कस्माद् बहुत्वात् ज्ञानानां शिल्पानां चाप्यनन्ततः ।।**
**एकस्यापि न वै शक्यमन्तं ज्ञानार्णवस्य हि।**
**गन्तुं किमुत सर्वेषां ज्ञानानामर्थतन्वतः ।।**

इह 'रसभावविकल्पनम्' इति पदस्य 'रसभावा विकल्प्यन्ते निश्चीयन्तेऽनेनेति रसभावाविकल्पनं रसभावयोर्निश्चायकं वाक्यम्' इत्यर्थः, अन्तशब्दस्य निश्चयोऽर्थः, ज्ञानानामिति पदस्य व्याकरणादीनि शास्त्राण्यर्थः, शिल्पशब्देन चित्रपुस्तादिकर्मणां ग्रहणम्।

'कथञ्चन' इति पदेन सूच्यते यत् संग्रहादिरूपमुपायं विहाय रसभावादिनिरूपणं कर्तुं न शक्यते। 'यथाक्रमम्' इत्यनेन प्रतिपाद्यते यद् येन क्रमेणोद्देशः तेनैव क्रमेण विवेचनं भविष्यति।

**रससंग्रहविभागः**

द्रुहिणेन - ब्रह्मणा प्रोक्तो रसानां विभागो नाट्येऽष्टधा वर्तते शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतश्च। उक्तम्-

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**
**बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः।**
एते ह्यष्टौ रसाः प्रोक्ता द्रुहिणेन महात्मना ।।

काव्येन द्योतनीयः अर्थः नाट्यमुच्यते।

अत्रैकादशस्वङ्गेषु प्राधान्याद् रसानामेव विभागः सर्वप्रथमं प्रदर्शितः। रस एव हि नाट्यं नर्तते। काव्येन द्योतनीयोऽर्थो नाट्यमुच्यते। अयं दृश्यकाव्यानुसंधानकर्तु- नंटस्याभिनयस्य श्रव्यकाव्यपाठककौशलस्य च प्रभावेण निश्चलेन मनसा गृह्यमाणतया मानससाक्षात्कारस्य विषयो भवति। असौ काव्यद्योत्योऽर्थो विभावादिरूपेण यद्यप्यनन्तो भवति तथापि काव्यप्रधाननायकस्य स्थाचित्तवृत्तिरेव मन्यते, यतो जडानां विभावादीनां संविदि, संविदो भोक्तृषु, भोक्तृवर्गस्य च प्रधाने

नायकरूपे भोक्तरि पर्यवसानं भवति। यथा शाकुन्तले शकुन्तलाविषया प्रधाननायकदुष्यन्तगता शकुन्तलादुष्यन्तोभयगता वा रत्याख्या चित्तवृत्तिर्नाट्यं वर्तते। एषा दृश्यकाव्ये नृत्यगीतादियोगेन श्रव्ये च गुणालङ्कारादियोगेन शकुन्तलादुष्यन्तादिविशेषसम्बन्धेन रहिता सती साधारणीभूता सहृदयानपि स्वात्मनि समावेशयति। एषा साधारणी निर्विघ्नसंवेदनरूपा चित्तवृत्तिस्तथान्यां चित्तवृत्तिं न जनयति, यथा लौकिकी सा सुखदुःखमोहात्मिका अन्याश्चित्तवृत्तीर्जनयति। एषाऽत एव लौकिकप्रत्यक्षादिप्रमाणजन्याभ्योऽन्याभ्यश्चित्तवृत्तिभ्यो विलक्षणा वर्तते। लोकप्रमाणजन्याश्चित्तवृत्तयो ह्यसाधारणत्वेन सुखदुःखमोहस्वभावा भवन्ति। एषा काव्येन प्रतीयमाना स्थायिचित्तवृत्तिः संवेदनस्य विषयान्तरसंक्रमणस्याभावेन स्वात्मनि विश्रान्तिरूपेण रसनपदवाच्येन व्यापारेण विषयीक्रियमाणा रसशब्देनोच्यते। एवं साधारण्येन प्रतीयमाना कथितरसनव्यापारविषयभूता प्रधानस्थायिचित्तवृत्तिरेव रसः, स एव च वस्तुतो नाट्यं वर्तते। अस्य फलं विनेयानां व्युत्पत्तिरस्ति। असौ काव्यद्योत्यो रसो वस्तुत एक एव वर्तते। अत एव 'नहि रसादृते कश्चिदर्थः प्रवर्तते' इति वक्ष्यमाणे पद्ये 'रसात्' इत्यत्रैकवचनं प्रयुक्तम्। अयमखण्ड एक एव महारसः शृङ्गारादिरूपेणाऽष्टधा विभज्यते। इमे शृङ्गारादयो विभागा वाक्यस्फोटवादिनां वैयाकरणानां मते यथा पदपदार्था असत्यभूता मन्यन्ते तथाऽसत्यरूपा एव सन्ति, वस्तुतो महारस एव वाक्यस्फोटवत् सत्यभूतः। यद्यन्विताभिधानवादिमतमाश्रीयते तदा श्रृङ्गारादयो विभागाः तथैव महारसस्योपायत्वेन सत्यरूपा मन्तुं शक्यन्ते यथा वाक्यवाक्यार्थयोरुपायभूताः पदपदार्थाः। यद्यभिहितान्वयवादमतमाश्रीयते तदेदं वक्तुं शक्यते यदिमे विभागास्तस्य महारसस्य तथावायवभूता भवन्ति यथा वाक्यवाक्यार्थयोरवयवाः पदपदार्था भवन्ति, यथाऽभिहितानां पदार्थानामन्वयेन समुल्लसितोऽपदार्थः पदार्थसमुदायरूपो वाक्यार्थो भवति तथा शृङ्गारादीनां समूहो मुख्यः स महारसो भवति। एवं विभागदृशा रसोऽष्टप्रकारः। विभागदृशैव रसानां

बहुत्वेन 'काव्यार्थान् भावयन्ति' इत्यत्र 'काव्यार्थान्' इति बहुवचनं प्रयुक्तम्। काव्यार्थानां रसानाम् अनेन बहुत्वं सूचितम्। एवं रस एकत्वं बहुत्वं च दृष्टिभेदेन न विरुद्धम्। रस एव वस्तुतो नाट्यम्। यतो हि सर्वेषां नाट्याङ्गानां सार्थकता तस्य रसस्यैव निष्पत्ती वर्तते। अत एव प्राधान्येन सर्वप्रथमं रसस्यैवोद्देशः कृतः। उक्ते रसविभागप्रतिपादके पद्ये 'अष्टौ' इति पदस्य प्रयोगः तैः स्वीक्रियते यैः शान्तरसो न मन्यते। किन्तु शान्तरसवादिनां मतेऽष्टपदरहितः 'बीभत्साद्भुतशान्ताश्च नव नाट्यरसाः स्मृताः' इति पाठः स्वीकरणीयः। तेन शान्तेन सह रसस्य तव विभागा भवन्तीत्यर्थो मन्तव्यः। इदं 'ते च नव। शान्तापलापिनस्त्वष्टाविति तत्र पठन्ति' इत्यभिनवभारतीवचनेन स्पष्टम्। एवं 'नाट्यरसाः' इति समस्ते पाठे 'नाट्यमेव रसाः' इति व्याख्यानं समीचीनम्। 'नाट्ये रसाः' इति व्यस्ते पाठे तु स्फोटवादिमतेन नाट्यरसयोराधाराधेयभावः काल्पनिकः, अन्यमते तु वास्तवो मन्तव्यः।

अत्र प्रश्न उदेति यच्छृङ्गारादीनां क्रमेणोद्देशस्य प्रयोजनं किं वर्तत इति । अत्र समाधानमभिनवभारत्यामेवं प्रतिपादितम् चत्वारः पुरुषार्था मन्यन्ते- धर्मः, अर्थः, कामः, मोक्षश्च। तत्र कामः प्रतिप्राणि प्रसिद्धो वर्तते। कश्चनापि जाग्रतः प्राणी कामेन हीनो न भवति। एवं कामप्रधानत्वेन काममूलस्य शृङ्गारस्य प्रथम उद्देशः कृतः। हास्यः शृङ्गारमनुगच्छति। अतः शृङ्गारस्य पश्चाद्धास्यस्योपदेशः। ततो निरपेक्षभावेन स्थितत्वाद्धास्याद् विपरीतस्य करुणस्य, कारणत्वेन करुणात् परं रौद्रस्य चोपदेशः। हास्ये हसनम्, करुणे तु क्रन्दनम्, इति करुणे हास्याद् वैपरीत्यं प्रसिद्धमेव। करुणः शोकमूलः । शोकस्तदा भवति यदा क्रुद्धः कश्चनेष्टं हन्ति। एवं क्रोधस्थायिके रौद्रे करुणस्य कारणता स्फुटय। अर्थकामयोर्मूलमुत्साहो भवति। तं विनाऽर्थः कामो वा साधयितुं न शक्यते। अतोऽर्थकाममूलस्य धर्मप्रधानस्योत्साहस्थायिकस्य वीरस्योपदेशः । रौद्रो वीरश्च भयस्य कारणं भवति। क्रुद्धस्योत्साहवतश्च वधबन्धादिदर्शनेन भीरुषु भयोत्पत्तिः प्रसिद्धैव। एवं रौद्रवीराभ्यामनन्तरं भयानकस्योद्देशः। वीरेण वीभत्स आक्षिप्यते। वीरेण पुरुषेण रणे नैके प्राणिनो हन्यन्ते।

तेषां रक्तवसादिज्ञानेन जुगुप्साया जन्म प्रसिद्धम्। अतस्ततो बीभत्सस्योद्देशः। वीरस्य पुरुषस्य लोकोत्तरपराक्रमादिदर्शनेन विस्मयो जायते। अतस्ततो विस्मयस्थायिकस्याद्भुतस्योद्देशः। अत एव भरतेन नाटकान्तेऽद्भुतस्य 'पर्यन्ते कर्तव्यो नित्यं हि रसोऽद्भुतः' इति विधानमनुशिष्टम्। एवं त्रिवर्गात्मकप्रवृत्तिमूला अष्टौ रसा उद्दिष्टाः। निवृत्तिरूपो मोक्षफलः शान्तोऽन्तिमो रसः। अत्र स्वात्मावेशेन रसचर्वणा भवति।'वीभत्साद्भुतशान्ताः' इति पाठे शान्तस्यात एवान्त उपदेशः। इदमेव रहस्यं शृङ्गारादीनां क्रमेणोद्देशस्य।

शृङ्गारो नाम रतिस्थायिप्रभव उज्ज्वलवेषात्मकः

**श्रृङ्गाररसस्य स्वरूपम्**

पूर्वमुद्दिष्टेषु रसेषु शृङ्गारः प्रथमो वर्तते। अयं कामस्य फलं कामप्रधानः सकलहृदयसंवादी च भवतीति भरतेन स **'तत्र शृङ्गारो नाम रतिस्थायिप्रभव उज्ज्वलवेषात्मकः'** इति सर्वप्रथमं लक्ष्यते। उज्ज्वलवेषात्मकः उज्ज्वला उत्कृष्टा वेषाः- विभावानुभावव्यभिचारिणः आत्मा व्यञ्जकत्वेन प्राणा यस्य सः, रतिस्थायिप्रभवः लौकिको यो रतिनामकः स्थायिभावः स एव प्रभव उद्गमस्थानं यस्य स रसः तत्र रसेषु प्रथमः शृङ्गार उच्यत इति मूलपङ्क्तेरर्थो वर्तते। **'रतिरेवास्वाद्यमानो मुख्यः शृङ्गारः'** इत्यभिनवभारती शृङ्गारस्य रतिप्रभवत्वं प्राह। उक्तायां नाट्यशास्त्रस्य पङ्क्तौ वेषशब्दो विभावानुभावव्यभिचारिणां बोधको वर्तत इत्यभिवभारत्यां स्पष्टं वर्तते। वेषयतो रतिचित्तवृत्तिम् अनुकार्याद् अन्यत्र सामाजिके ज्ञापनेन संक्रामयत इति विभावानुभावपक्षे वेषशब्दस्य व्युत्पत्तिः, काव्यगतावेव हि विभावानुभावौ भवतो रतिं साधारण्येन ज्ञापयतश्च। वेषयन्ति - रतिरूपं स्थायिभावं व्याप्नुवन्ति व्यभिचारिण इति व्यभिचारिपक्षे वेषशब्दस्य व्युत्पत्तिः । लौकिकी रतिरेव कविनटाभ्यां प्रकाश्यमाना विभावादियोगेन साधारण्येन प्रतीयमानाऽत एव रसनीयतां नीता सती श्रृङ्गार उच्यते। अस्यात्मा विभावादियोगः, विभावादिजीवितावधिर्हि रसो भवति। लोके विभावादियोगस्याऽभावेन चिरम् अनास्वाद्यमाना रतिः शृङ्गारशब्देन वक्तुं न शक्यते। लोके कामिनो रतिः क्रीडारूपा भवति, तस्यामेव सुखस्य विश्रान्तिश्च

शृङ्गाररसस्य विचारः।

शृङ्गारहेतुः – स च स्त्रीपुंसहेतुक उत्तमयुवप्रकृतिः

भवति। काव्यनाट्ययोस्तु रमणीया माल्यादयो विषयाः कविना कल्पितत्वेन संकल्पमया भवन्ति, अतोऽत्र द्वयोः कामिसंवेदनयोरेव परस्परस्मिन् निमज्जनं भवति । इदमेव परमो भोग उच्यते। अत्र संविद एव प्राधान्यं भवति, संविदेव भोग्या भोक्त्री भोगश्च भवति, न तु जडं शरीरादि किञ्चिद्र भोग्यं भवति। एवं रतिसंविदेव वस्तुतः शृङ्गार रस उच्यते। अनेन तेषां विदुषां मतमिदं निरस्तं भवति यद् आधारभेदेन रतेरपि भेदात् शृङ्गारस्यैकत्वं नोपपद्यते, यतः संवित् सर्वेष्वाधारेष्वेकैव भवति । 'अवियुक्तसंवित्प्राणो हि शृङ्गारः' इत्यभिनवभारती प्राह। लोकदृशैव संविदो विभागः, न तु वस्तुतः। लोक एव वियोगस्य संभावना।

तस्य शृङ्गारस्य हेतुः क इति प्रश्ने सति भरतः 'स च स्त्रीपुंसहेतुक उत्तमयुवप्रकृतिः' इत्युत्तरं वदति। अत्रोत्तरवाक्ये स्त्रीपुंसेतिशब्दस्य प्रयोगेण सूच्यते यत् साधारण्येनैव प्रतीयमानौ स्त्रीपुंसौ (नायिका नायकश्च) साधारणरतिरूपस्य 'यस्य शृङ्गारस्य हेतू विभावौ भवतः, न तु शकुन्तलात्वरूपधर्मविशेषेण ज्ञायमाना शकुन्तलारूपा नायिका दुष्यन्तत्वशिष्टये दुष्यन्तरूपों नायकश्च। अत एव स्त्रीत्वपुंस्त्वसामान्ययोरेव ग्रहणं विहितम्। लोके रतिः 'शकुन्तलादुष्यन्तयोः रतिः' इत्यादिक्रमेण स्त्रीपुंसविशे-षसंवन्धेनैव भासते, न तु काव्यनाट्ययोः। 'उत्तमयुवप्रकृतिः' इत्यनेन सूच्यते यदुत्तमी साधारण्येण प्रतीयमानौ युवानावेव स्त्रीपुंसौ शृङ्गारस्य प्रकृती विभावी भवतः, न तु मध्यावस्थी वृद्धौ वा। अथवोत्तमयुवशब्देन उत्तमयोर्युनोः संविदेव कथ्यते, यतश्चैतन्यमेवोत्तमयुवानौ स्तः, तस्याः संविद उत्तमत्वं नाम दृढत्वमुच्यते । तेन दृढा संविदेव प्रकृतिः स्वभावो यस्येत्यप्यर्थो भवति। उक्तमग्रेऽभिनवभारत्याम् '**उत्तमश्चोत्तमा चोत्तमौ। एवं युवानौ।**

तत्रोत्तमयुवशब्देन तत्संविदुच्यते, न तु कायः। चैतन्यस्यैव हि परमार्थत उत्तमयुवत्वं विशेषः।...सा

संविदास्वादयोग्त्वात् शृङ्गाररसो भवति । अनुत्तमत्वे तु न तद्धर्मयुवत्वे चेति न सा रतिसंवित्।' इति । अथवोत्तमप्रकृतिशब्देन सूच्यते यद् इन्द्रिजयादिगुणविशिष्टावेव युवानौ शृङ्गारस्यालम्बनविभावौ भवतः । उत्तमा प्रकृतिर्भरतेनैवं चतुर्विंशेऽध्याये प्रतिपादिता-

**'जितेन्द्रियज्ञानवती नानाशिल्पविचक्षणा।**

**दक्षिणाऽथ महालक्ष्म्या भीतानां परिसान्त्वनी।**

**नानाशास्त्रार्थसम्पन्ना गाम्भीर्यौदार्यशालिनी।**

**स्थैर्यत्यागगुणोपेता ज्ञेया प्रकृतिरुत्तमा' इति।**

अत एव महाकविभिः स्वकाव्येषु राम-कृष्ण-युधिष्ठर-दुष्यन्तादायः आलम्बनविभावत्वेन स्वीकृताः। स्त्रीव्यसनी शृङ्गारस्य विभावो न भवितुमर्हतीति 'उत्तमप्रकृतिशब्देन भरतः सूचति। तेन विटादीनां रतेर्वर्णने शृङ्गाराभास एवेति ध्वन्यते। तदेवं फलति यत् साधारण्येन प्रतीयमानस्योत्तमस्य तरुणस्त्रीपुंसरूपस्य विभावस्य योगेन साधारण्येन प्रतीयमाना परिपूर्णसुखरूपा स्थायिनी काव्यनाट्ययोः आप्रारम्भात् फलप्राप्ति यावद्वर्तमानाशुद्धादृढसंविद्विशेषरूपारतिः शृङ्गार उच्यते ।

लोके तु शुचिमेध्यादिषु हारादिषु च लक्षणया शृङ्गारशब्दस्य प्रयोगो भवति।

तादृशी रतिरेव नाट्यशास्त्रे प्रयुक्तस्य शृङ्गारशब्दस्य मुख्योऽर्थो वर्तते। लोके तु शुचिमेध्यादिषु हारादिषु च लक्षणया शृङ्गारशब्दस्य प्रयोगो भवति। एतादृशा अनेके शब्दाः सन्ति ये शास्त्रविशेषेऽभिधया प्रयुज्यन्ते, लोके चार्थान्तरे लक्षणया। यथा सांख्यशास्त्रे प्रसिद्धस्य सांख्यपुरुषशब्दस्याऽभिधया पुरुषरूपे निःस्पृहे चैतन्ये प्रयोगो भवति, लोके तु कस्मिंश्चत् तटस्थे शत्रुमित्रयोः कस्यापि पक्षम् अनवलम्बमाने देवदत्तादौ लक्षणया 'सांख्यपुरुषोऽयं देवदत्तः' इति प्रयोगो भवति। अभिनवभारत्यां हि 'तद्ववदमी श्रृङ्गारादिशब्दा इहैव विषये मुख्याः। लोके तु सांख्यादिपुरुषवत्' इति कथितम्। अत एव भरतेन 'यथा यत्किञ्चित् लोके शुचि मेध्यं दर्शनीयं वा तच्छ्रङ्गारेण उपमीयते। यः तावद् उज्ज्वलवेषः स शृङ्गारवान् इत्युच्यते। यथा च गोत्र-कुल आचारोत्पन्नानि आप्तोपदेशसिद्धानि पुंसां नामानि भवन्ति तथैव एषां रसानां भावानां च नाट्याश्रितानां चार्थानाम्

आचारोत्पन्नानि आप्तोपदेशसिद्धानि नामानि, एवमेष आचारसिद्धो हृद्योज्ज्वलवेषात्मकत्वात् शृङ्गारो रसः।' इत्युक्तम्।

अभिनवभारत्यां शृङ्गारशब्दस्य सिद्धिर्द्विधा दर्शिता। तत्र प्रथमानुसारेण शृङ्गारशब्दः शृङ्गवृन्दाभ्यामारकन्' इति वार्त्तिकेन विहिते मत्वर्थीये आरकन्प्रत्यये निष्पद्यते। अतः 'शृङ्ग मन्मथस्य कामस्य वोद्भदो यस्मिन् भवति स रसः शृङ्गार' इत्यर्थो भवति। ततः शृङ्गारशब्दोऽयं रसविशेषे योगरूढो भवति । किन्तु तादृशसंविद्रूपे रसे कामोद्भेदो न संभवति। एवं योगार्थस्य रूढाऽर्थेऽन्वयस्याभावेन एष शब्दो योगरूढो वक्तुं न शक्यते। तेन शृङ्गाररसस्य कामपुरुषार्थमूलत्वाद् योगार्थः शृङ्गाररसे कथञ्चित् संगमनीयो भवति। द्वितीयानुसारेण ' शृङ्गारभृङ्गारौ' इत्युणादिसूत्रेण निपातनात् सिद्धयति। इयमेव द्वितीया शृङ्गारशब्दस्य सिद्धिः समीचीनेत्यभिनवगुप्तस्य मतं वर्तते। लोकोत्तरानन्दस्वरूपो हि शृङ्गाररसः कामोद्भदो नास्ति। एवं भवद्भिः शृङ्गारस्य स्वरूपं शृङ्गारशब्दस्य मुख्यलक्ष्यरूपौ अर्थौ च ज्ञातौ

अभिनवभारत्यां शृङ्गारशब्दस्य सिद्धिर्द्विधा दर्शिता।

इदानीं शृङ्गारस्य अवस्थाद्वयं ज्ञातव्यम्।

**शृङ्गारस्य द्वे अवस्थे**

भरतमुनिना **'विभावानुभावसंयोगाद् रसनिष्पत्तिः'** इति रससूत्रे विभावादि यद् उपात्तं तस्य विभागं दर्शयितुं शृङ्गारस्य द्वे अवस्थे 'तस्य द्वे अधिष्ठाने संभोगो विप्रलम्भश्च' इति वचनेन बोध्येते। 'अधिष्ठीयतेऽत्र शृङ्गारेण इत्यधिष्ठानम्' इति व्युत्पत्त्याऽधिष्ठानशब्दस्याथर्थोऽवस्था दशा वर्तते। तेन शृङ्गारस्य द्वयोरवस्थयोः प्रतिपादनेन द्वौ भेदौ सूचितौ। यथा गोत्वस्यैव अवस्थाः शाबलेय-कृष्ण रक्तत्वादयो भवन्ति तथा शृङ्गारस्यैव संभोगरूपा विप्रलम्भरूपा चावस्थे भवतः । यथा शाबलेयत्वादिगुणविशिष्टेषु गोषु गांत्व समानरूपेण भवति तथा संभोगावस्थाविशिष्टे विप्रलम्भावस्थाविशिष्टे च शृङ्गारे शृङ्गारत्वं (आस्वाद्यमानरतित्वं रत्यास्वादत्वं वा) समानरूपेण तिष्ठति। यथा गौः शाबलेयत्वाद्यवस्थया भिद्यते तथा शृङ्गारोऽपि संयोगविप्रलम्भावस्थया । एवमवस्थाभेदन

शृङ्गारस्य द्वे अवस्थे -संभोगः विप्रलम्भश्च

शृङ्गारस्य द्वौ भेदौ- संभोगः, विप्रलम्भश्च। आस्वाद्यमाना रतिरुभयत्र समानरूपेणाऽनुगच्छति ।रतेरास्वाद्यमानमेव रूपं शृङ्गार उच्यते। 'संयुक्तौ' इत्याकारा संवित् संभोगावस्था, 'नियुक्तौ ' इत्याकारा संविद् विप्रलम्भः। तत्र संभोगावस्थायां संयुक्तसविदः प्राधान्यम्, वियुक्तसंविदः स्थितिस्तु भवति, किन्तु गौणरूपेण, एवं विप्रलम्भावस्थायां वियुक्तसंविदः प्राधान्यम्, संयुक्तसविदस्तु गौणरूपेण स्थितिः। एतन्नास्ति यदेकस्याम् अवस्थायामपरस्या अवस्थायाः सर्वथाऽभावो भवति । अत एव संभोगे विप्रलम्भस्य संभावनया भीरुत्वम्, विप्रलम्भेऽभोगे सत्यपि संभोगस्य संभावनया धैर्य भवति। अभोगे सत्यपि संभोगासंबन्धेन रतिर्विप्रलम्भेऽपि भवत्येव । विप्रलम्भेऽपि रतेरुज्जीवनमतिशयश्च महाकविना कालिदासेन मेघदूतेऽनेन पद्येन सूचितम्-

**एतस्मान्मां कुशलिनभिज्ञानदानाद् विदित्वा**
**मा कौलीनादसितनयने मय्यविश्वासिनी भूः।**
**स्नेहानाहुः किमपि विरहे हासिनस्तेऽप्यभोगाद्**
**इष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ।।' इति।**

रतेरास्वाद्यमानमेव रुपं शृङ्गार उच्यते।

अत्र विरहिणा यक्षेण विरहिणीं यक्षिणीं प्रति कथ्यते यत् संयोगे ह्रासशीलं प्रेम विरहेऽतिशयेन वर्धते। नायकयोः परस्पराऽभोगे सत्यपि आशाबन्धरूपायां रतौ सत्यां क्वचित् संभोग शृङ्गारशब्दस्य यः प्रयोगो भवति स न मुख्यः अपितु लाक्षणिको मन्तव्यः। यत्र संभोग-विप्रलम्भावस्थयोरुभयोः संमेलनं तत्र चमत्कारस्यातिशयो भवति। यथाऽस्मिन् पद्ये-

यत्र संभोग-विप्रलम्भावस्थयोरुभयोः संमेलनं तत्र चमत्कारस्यातिशयो भवति।

**'एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-**
**रन्योन्यं हृदयस्थितेऽप्यनुनये संरक्षतोगौरवम्।**
**दम्पत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-**
**र्भग्नो मानकलिः सहासरभसव्यासक्तकण्ठग्रहम्।।' इति।**

अत्रैकस्मिन्नेव शयने शयानौ, पराङ्मुखौ, कुपितौ, अन्योन्यम् अनुनेतुमिच्छन्तावपि स्वस्वगौरवरक्षणे तत्परी, वियोगेन दूयमानी च नायको वर्णितो, अन्तेऽकस्मादेव तयोर्मानक्रीडा समाप्तिमेति, तौ परस्परालिङ्गनादि कुरुतश्च। एवमत्र

मानविप्रलम्भस्य संभोगस्य च मेलनं चमत्कारातिशयं जनयति। संभोगविप्रलम्भावत्रैकीभूतौ। अतः सातिशया रसानुभूतिर्भवति। इदं सर्वम्- **'अत एव संभोगे विप्रलम्भसंभावनाभीरुत्वं विप्रलम्भेऽपि संभोगमनोराज्यानुवेध इति इयच्छ्रृङ्गारस्य वपुः।..अभिलाषेर्ष्याप्रवासादिदशाः त्वत्रैवान्तर्भूताः। सत्या-माशाबन्धात्मिकायां रतौ तेन संभोग शृङ्गार इति व्यपदेशोऽभोगेऽप्युपचारात्। अत एतद्दशाद्वयमेलन एव सत्यतः सातिशयश्चमत्कारः।'** इत्यभिवभारत्यां प्रपिादितम्।

एवं संभोगविप्रलम्भरूपाभ्याम् अवस्थाभ्यां शृङ्गारस्य द्वौ भेदौ भवतः संभोग-शृङ्गारो विप्रलम्भ शृङ्गारश्च । य ईष्यादिरूपावान्तरदशाभेदेन विप्रलम्भस्य मान-अभिलाष-विरह शाप-प्रवासरूपा भेदाः काव्यप्रकाशादौ निरूपितास्ते सर्वेऽत्र विप्रलम्भपदेन भरतेन सूचिता एव। मानादिविप्रलम्भानां समेषां विप्रलम्भ एवान्तर्भाव इत्याद्यभिनवभारत्यां प्रतिपादितम्।

## संभोग शृङ्गारः

शृङ्गाररसस्यावस्थाद्वयं प्रतिपाद्य भरतः संभोग शृङ्गारं विभावानुभावव्यभिचारिभिर्निरूपयति । विभावादीनां निर्देशः क्रमेणैवं विहितः।

- **विभावः**

संभोगश्रृङ्गारं विभावानुभावव्यभिचारिभिः निरूपयति

विभावादेव रसचर्वणा प्रारभत इति तत्रादौ विभावनिर्देशः 'तत्र संभोगः तावद् ऋतु-माल्य-अनुलेपन- अलङ्कार- इष्टजन विषय-वरभवन उपभोग- उपवनगमनानुभवश्रवणदर्शन क्रीडा लीलादिभिः विभावैः उत्पद्यते' इति कृतः। अत्र वसन्तादय ऋतवः, कुसुमादि माल्यम्, चन्दनाद्यनुलेपनम्, कटककुण्डलादिरलङ्कारः, विदूषकादिरूप इष्टजनः, गीतादयो विषयाः, वराणि श्रेष्ठानि भवनानि च यानि सन्ति तेषाम् उपभोगः, उपवनस्य उद्यानस्य गमनम्, अनुभवः, श्रवणम्, दर्शनं च यदस्ति, जलावगाहनादिरूपा क्रीडा, नायकेन नायिकाया नायिकया नायकस्य च अनुकरणरूपा लीला चेत्यादयो हृद्यतमाः पदार्थाः संभोग शृङ्गारस्य विभावरूपेण निर्दिष्टाः सन्ति। उपवनगमनादीनि उपवनगमनादेः संकल्पादेरप्युपलक्षणानि

सन्ति। एवं 'लीलादिभिः' इत्यत्रादिपदेन हंसमिथुनादेः चित्रपुस्तकादेश्च दर्शनादीनि गृहीतानि सन्ति। एवमृतुप्रभृतिकथनस्याभिप्रायोऽयमेव ज्ञातव्यो यद् यद् वस्तु हृद्यं भवति तत् सर्व विभावो भवति। भरतेन निर्दिष्टानि ऋतुप्रभृतीनि वस्तुतो विभावा न सन्ति, अपितु स्त्रीपुंसरूपयोर्विभावयोः उत्तमतायाः कारणानि सन्ति। एषामुपभोगादि विना नायके नायिकायां चोत्तमता न सिद्ध्यति, उत्तमताया अभावे च तौ स्त्रीपुंसौ विभावौ भवितुं नार्हतः। एवमृतुप्रभृतीनाम् उपभोगादयः स्त्रीपुंसयोरुत्तमत्वसाधनद्वारा विभावतायाः साधकत्वेन 'विभावैः' इति विभावशब्देन कथिताः। एवमृत्वाद्युपभोगादिना विशिष्टावेव तौ स्त्रीपुंसौ विभावौ भवतः। कविना तदनुसारिणा नटेन च प्रकाशिताभ्यां ऋतुप्रभृतीनामुपभोगादिना विशिष्टाभ्याम् उत्तमाभ्यां स्त्रीपुंसरूपाभ्यां विभावाभ्यां निर्विघ्नभोगरूपस्य संभोग-शृङ्गाररसस्य उत्पत्तिः शीघ्रमेव भवति। रसनक्रिया विभावादेव प्रारभते। एषा विभावसाक्षात्काररूपा भवति। एषाऽनुभावादिनाग्रे नीयते। एवमिह नास्ति यत् पादप्रक्षेपादिनाऽन्ते यथा गमनक्रिया निष्पन्ना भवति तथा व्यभिचार्यन्ते रसना निष्पन्ना भवति। इह हि विभावादेव रसना प्रारभत इति विभावस्य निर्देशो मुनिना सर्वप्रथमं कृतः। इदम् 'एतैः कविनोपनिबद्धैः नटेन च साक्षात्कारतामानीतैः सम्यग् इत्यविघ्नभोगात्मकसंभोगो रस उत्पद्यते झटित्येव । नहि गमनक्रियावत् पर्यन्ते रसनक्रिया निष्पद्यते। अपितु प्रथम एवावसरे। स च विभावादिसाक्षात्कारात्मक एव'।

इत्यभिनवभारत्यां प्रतिपादितम्। 'स' इत्येनन न रसनाव्यापारो रसनाव्यापारो ग्रहण ग्रहणीयो भवति।

एवं नास्ति यदृत्वादीनाम् उपभोगादयः, स्त्रीपुंसौ च पृथग्विभावौ भवन्तीति। तदुपभोगादिविशिष्टयोरेव स्त्रीपुंसयोर्विभावता भरतस्याभीष्टा वर्तते। अत एव भरतेन विभावस्यालम्बनोद्दीपनरूपौ भेदौ न प्रतिपादितौ। ऋत्वादय उद्दीपनविभावा, स्त्रीपुंसौ चालम्बनविभावाविति भेदस्तु काल्पनिक एव वर्तते, न तु वास्तवः। अत एव 'तत्रेह वस्तुतः

स्त्रीपुंसौ परस्परं विभावौ। तयोरुत्तमत्वे चोपयोगीनि ऋत्वादीनि। उत्तमस्यानवसरे रत्यभावात्... एतच्चसमस्तमेव शृङ्गारविभावत्वेन मन्तव्यम्। यावान् कश्चिदयं विषयसंभारो हृद्यतमः तत्पूर्णतायां सत्यामुत्तमस्य रत्युदयः। अत एव रत्नावल्यां हर्म्यगमनम्, उद्यानगमनम्, कामदेवपूजा, वसन्त इत्यादि सर्वमेवात्र संगृहीतम् ।.... एतच्च सर्व एव समुदितो विभाव इति काल्पनिकमालम्बनविभाव इति। अत एव मुनिना नायं क्वचिद्विभाग उक्तः सूचितो वा।' इत्यभिनव-भारत्यामभिहितम्। ऋत्वादीनामपि न पृथक् पृथम् उक्तं विभावत्वं मतम्, अपितु समुदाय एव। अत एव रूपके सर्वेषामृतूद्यानादीनां दर्शनादेको रसो भवति । यत्र केवलायाः प्रमदाया एव दर्शनेनोत्तमे रसोदयो दृश्यते तत्रत्वांदीनामपि संस्कारवशेन सत्त्वं भवत्येव। यथा यत्र मुक्तकादौ काव्ये नायिकामात्रस्यापि वर्णने रसोदयो भवति तत्रर्वादीनामपि अनुसंधानं भवति। अनुत्तम नायके ऋत्वादीनामुद्दीपनानामभावे चमत्कारो न भवति। इदम् अभिनवभारत्यां 'ननु प्रथमदर्शने नोद्यानादिसंभवः। क एवमाह ? ऐश्वर्यपरिपूर्णस्य तावद् आत्मीयसमृद्धिसंभारसंस्कारावगमात् पूर्णतैव विभाववर्गस्य तत्प्रधानं हि रूपकं तत्र तत्रोदाहरणम्। तेन पृथक्पृथग् उदाहरणदानम् अनुपपन्नम्। या तु मुक्तकादौ पृथक्तया भावोऽपि रससंवित् तत्रोत्तमे तावतः तत्रानुसंधानाच्चमत्कार इति। इयान् तु अनुत्तमादिविषये अपरिपूर्णोद्दीपनत्वे न चमत्कारो दृश्यते।' इति वचनेन सूचितम्। एवमृत्वाद्युपभोगेन विशिष्टावुत्तमौ स्त्रीपुंसौ संभोग शृङ्गारस्य विभाव इति भरतस्याभिप्रायः फलति ।

**अनुभावः**

संभोगश्रृङ्गारस्य अनुभावाः

अनुभावो रतिं रसनाभिमुखीं करोतीति विभावं प्रतिपाद्य भरतः 'तस्य अनुभावैः नयनचातुर्यभ्रूविक्षेपकटाक्षसंचार-ललितमधुराङ्गहार-वाक्यादिभिः अभिनयः प्रयोक्तव्यः' इति वाक्येन संभोगस्यानुभावं प्रतिपादयति। 'नयनानाम् - कान्तासम्बन्धिनां नेत्राणाम्, चातुर्येण भ्रूमूलस्य समुत्क्षेपेण, सभ्रूक्षेपेण ध्रुविक्षेपसहितेन कटाक्षेण कनीनिकायाः चालनेन च ये

संचाराः प्रेरणानि भवन्ति, ये च ललिताः मन्थरा वा मधुराः दर्शने रमणीयाश्च अङ्गहाराः-अङ्गानां करचरणादीनां हारा :- हरणानि संचालनानि सन्ति, यानि च ललितानि सुकुमारार्थानि मधुराणि श्रवणसुखदानि च वाक्यानि सन्ति, तान्येव रसस्यानुभावकत्वेन अनुभावशब्देनोच्यन्ते, तैरेवानुभावैः तस्य संभोग शृङ्गारस्य अभिनयः अभिनयो रसनक्रियां प्रत्याभिमुख्येन नयनम्, प्रयोक्तव्यः करणीयः' इति भरतप्रयुक्तस्योक्तस्य वाक्यस्य शब्दार्थो वर्तते। एवं वक्तुं शक्यते यत् कान्तासम्बन्धिनां नेत्राणां चातुर्यादिना संचालनम्, अङ्गानां लालित्येन माधुर्येण चाहरणं सुकुमार्थानां श्रुतिसुखदानां न वाक्यानां च प्रयोगोऽनुभाव उच्यते । यत एते रसमनुभावन्ति, एषामभिनयो रसं रसनाभिमुखं नयतीत्यभिनय उच्यते। भरतवाक्ये आदिपदस्य ग्रहणेन सात्त्विका रोमाञ्चादयो मुखरागादयश्चापि ग्रहणीया भवन्ति। विभावाद् रसनक्रिया प्रारभते। विभावसाक्षात्कार एव विभावे कान्तादी नयनचातुर्यादयो रसनक्रियाया विषया भवन्ति । एतेऽभिनया अनुभावाश्च कथ्यन्ते। यत एते नयनचातुर्यादयः पदार्था विभावसाक्षात्कारेण प्रारब्धं रसं रसनक्रियाऽभिमुखं नयन्तीति अभिनयाः, रसमनुभावयन्तीति अनुभावाश्च कथ्यन्ते। अभितो नयनमनुभावनं वा रसास्वादे सामर्थ्याधानं वर्तते। नयनसंचारादिषु अनुभावशब्दस्य प्रयोगेण सूच्यते यद् रसस्य विश्रान्तिः तटस्थे न भवति, यतोऽनुभावने सामाजिकात्मन्येव भवति। एवमभिनयशब्दस्य प्रयोगेण रसस्य सामजिके आत्मगतत्वेन विश्रान्तिर्निराक्रियते, यतो रसो रसनक्रियाभिमुखीक्रियते, आत्मविशेषेण सम्बन्धो व्यवच्छिद्यते। अत एव 'तस्य तु प्रथमकक्ष्यायामेव रसनागोचरत्वाभिमतस्य नयनचातुर्यादिभिः रसो रसनाद्याभिमुख्यं नीयते। अत एव तेऽभिनया अनुभावाश्च। आभिमुख्यनयनम् अनुभावनं च। तद्रसास्वादे समर्थाचरणम् उद्दीपनम्। अनुभावकत्वेन ताटस्थ्यपरिहारः। आभिमुख्यनयनेन सत्वैक-विश्रान्तिशङ्कानिरासः।' इत्यभिनवभारत्याम् अभिहितम्।

अनुभावं विना रसानुभवो भवितुं नार्हति

अनुभावं विना रसानुभवो भवितुं नार्हति। यत्र केवलस्य विभावस्यैव स्थितिस्तन्त्र न चमत्कारः।

- **व्यभिचारी**

विभावसमये रसनीयस्याऽनुभावावसरे दशाविशेषस्यावेशेन विरसतामापन्नस्य रसस्य परिपोषका व्यभिचारिभावा भवन्ति। एते स्वीयां रसनां चित्रयन्तो रसमतिशयेन पुष्णन्ति ।

'व्यभिचारिणः त्रासालस्यौ-जस्यजुगुप्सावर्जाः'

अतोऽनुभावनिर्देशाद् अनन्तरं भरतेन संभोग शृङ्गारस्य व्यभिचारिणो भरतः 'व्यभिचारिणः त्रासालस्यौ-जस्यजुगुप्सावर्जाः' इति निर्दिशति। संभोग शृङ्गारस्य व्यभिचारिणः त्रासः, आलस्यम्, औजस्यम् उग्रता जुगुप्सा चैते चत्वारो भावा न भवन्ति, एभ्यो भिन्नाः सर्वेऽपि भावा भवन्तीति भरतोक्तस्य वाक्यस्याक्षरार्थो भवति। किन्त्वभिप्रायो वर्तते यत् संभोगे सुखमया एव धृतिहर्षादयो भावा व्यभिचारिणो भवन्ति। तेन दुःखप्रायाणां निर्वेदादीनां संभोगे न सत्ता। अत एव भरतेनाग्रे 'विप्रलम्भकृतस्तु' इत्यत्र तुशब्देन सूच्यते यत् संभोगे निर्वेदादयो न भवन्ति, अपितु ते विप्रलम्भ एव भवन्ति। भरतेन वस्तुतः स एव त्रासः तदेवालस्यं च निषिद्धं यच्छङ्गारस्य विभावेन न जनितं भवति, शृङ्गारस्य विभावेन जन्ये तु त्रासालस्ये भवत एव। अत एव मेघगर्जनजन्येन त्रासेन नायिकायाः त्रासो वर्ण्यते कविना। एवं रत्यादिप्रभवमालस्यं कालिदासादिभिर्विक्रमोर्वशीयादौ **'कतिचिदहानि वपुरभूत् केवलमलसेक्षणं तस्याः'** इत्यादिरूपेण संभोगेऽपि निबद्धमेव। त्रासादिनिषेधेन केवलमेतदेव ज्ञाप्यते यत् संभोगे सर्वे सुखमया एव व्यभिचारिणो भवन्ति, संभोगविभावजः त्रासादिरपि ग्रहणीयो भवति। यद्यपि जुगुप्सा व्यभिचारिषु न गणिता, अपितु बीभत्सरसस्य स्थायिभावरूपेण स्वीकृता, एवं संभोगे तस्या अभावस्य स्वयं सिद्धत्वेऽपि व्यभिचारिसङ्गे गहणेन ज्ञाप्यते यत् सर्वेऽपि रत्यादयः स्थायिभावा रसान्तरे व्यभिचारिणो भवन्ति । तेन संभोगे जुगुप्सायाः प्रतिकूलत्वेन निषेधः सार्थको भवति। न हि नायिकाशरीरे रक्तवसामांसादिभावनया जन्या जुगुप्सा रतिं

संभोगे सर्वे सुखमया एव व्यभिचारिणो भवन्ति।

पुष्णाति। तेन सर्वे सुखमया धृतिहर्षादयः संभोगे व्यभिचारिणो भवन्तीति भरतस्याभिप्रायः फलितो भवति।

एवमुक्तैर्विभावानुभावव्यभिचारिभिः संभोगशृङ्गारस्य निष्पत्तिर्भवति ।

**विप्रलम्भशृङ्गारः**

'विप्रलम्भश्रृङ्गारस्य विचारः।

भरतेन संभोगं निरूप्य विप्रलम्भ शृङ्गारो निरूप्यते। तत्र विभावो नोच्यते, यतः प्रायेण संभोगवदेवात्रापि विभावो भवति, ' आवां वियुक्ती' विति सविद् विशेषरूपेण भवति, अनुभावः मालिन्य-दीर्घनिःश्वासरोदनादिरूपो यथा करुणे प्रसिद्धः तथात्रापि। भरतेन 'विप्रलम्भकृतस्त्वस्य निर्वेद ग्लानि शङ्का असूया श्रम चिन्ता- औत्सुक्य निद्रा सुप्त स्वप्न विबोध व्याधि उन्माद अपस्मार- जाड्य- मोह- मरणादिभिः अनुभावैः अभिनेतव्यः' इति वचनेन व्यभिचारिणो निरूपिता आदिपदनानुभावाः सूचिताश्च । अत्र 'अस्य' इत्येकवचनेन शृङ्गारस्याऽवस्थाभेदेऽपि अभेदः सूच्यते, विप्रलम्भसंभोगावस्थयोः परस्परोपकारकत्वं ध्वन्यते च ।

संभोगेन विप्रलम्भः, विप्रलम्भेन संभोगश्चोपजीवति।

संभोगेन विप्रलम्भः, विप्रलम्भेन संभोगश्चोपजीवति। अत एव भगवदनुग्रहेण यस्य वाणी पवित्रा जाता तेन कालिदासेन संभोगविप्रलम्भाभ्यां मिश्रिताया रसनाया निष्पत्तये रघुवंशस्य त्रयोदशे सर्गे लङ्काविजयाद् अनन्तरं सीतया संयुक्तस्य रामस्य वियुक्तावस्थाया वर्णनं कृतम्। अत्र सहृदयं संभोगस्य विप्रलम्भस्य च मिश्रा रसनोदेति। एते निर्वेदादयः स्वानुभावद्वारा विप्रलम्भम् अनुभावयन्ति, अतः त एवाऽत्रानुभावशब्देन कथिताः। इदम् 'एते व्यभिचारिणोऽपि स्वानुभावैरनुभाविता विप्रलम्भम् अनुभावयन्ति। तस्मादनुभावैरित्युक्तम्।' इत्यभिनवभारत्यां स्पष्टम्। ततो भरतोक्तस्य वाक्यस्यार्थो भवति निर्वेदादिभिः स्वजन्यानुभावेनानुभावितैः व्यभिचारिभिर्विप्रलम्भावस्थाविशिष्टः यद् शृङ्गारोऽभिनेतव्यः- रसो रसनाक्रियाया आभिमुख्यमभिनयैः प्रापयितव्यः। व्यभिचारिभावेषु सुप्तस्य स्वप्नस्य च ग्रहणं वर्तते। सुप्तं निद्रा भवति। स्वप्नो निद्रां विना न भवति। अतः

विप्रलम्भे मरणव्यभिचारिविषये द्वे मते लभ्येते।

सुप्तान्तर्गतोऽपि स्वप्नो यत् पृथगुपात्तः तस्य कारणं सुप्तापेक्षया महाकविभिः प्राधान्येन वर्णनं वर्तते। सुप्ते विषयाणां विशेषेण ज्ञानं न भवति, किन्तु स्वप्ने भवति। अतः सुप्ताद् विशेषोऽपि वर्तते। अत एव 'क्व नीलकण्ठ व्रजसीत्यलक्ष्यवाक्' इति कुमारसंभवे शिवं पतिरूपेणाभिलषन्त्याः पार्वत्याः, 'आहूतोऽपि सहायैः' इत्यादी ध्वन्यालोकस्थे पद्ये च स्वप्नः प्राधान्येन महाकविना निबद्धः । यद्यपि संभोगेऽपि रतिश्रमेण निद्रादि संभवति तथा तत् तस्यां रती वैचित्र्यं न करोति। किन्तु विप्रलम्भे तद् रतिभावनया तथा करोति। अतः सुप्तादि संभोगे व्यभिचारित्वेन गणितम्। केषाञ्चन वृद्धानां मतं वर्तते यद् उन्मादादीनां याऽत्यन्तं कुत्सिता दशा भवति सा काव्ये नाट्ये च नोपादेया। किन्तु स्वजीवितनिन्दारूपायां तस्यां दशायां देहोपभोगसाराया रतेरास्थाऽपि विच्छद्यते, अत उन्मादादीनाम् अत्यन्तकुत्सिताऽपि दशा संभवति।

विप्रलम्भे मरणव्यभिचारिविषये द्वे मते लभ्येते। प्रथममतानुसारेण मरणपदेनात्र पूर्वदेहस्य त्यागे झटिति देहान्तरलाभेन जीवनस्य प्राप्तिर्विवक्षिता। यथा अजो लिखितं पद्ये गङ्गासरयूसंगमे देह परित्यक्तवत्याः पुण्यातिशयेनाधिकसौन्दर्यया देवीशरीरं प्राप्तवत्या नायिकया सह नायकस्य रतेरभिव्यञ्जने प्राणत्यागरूपे मरणे सत्यपि शीघ्रजीवनलाभरूपं मरणं कविना वर्णितम्-

रसः रसनाक्रियया आभिमुख्यमभिनयैः प्रापयितव्यः

**तीर्थे तोयव्यतिकरभवे जहुकन्यासरय्वोः**
**देहत्यागादमरगणनालेख्यमासाद्य सद्यः।**
**पूर्वावस्थाधिकचतुरया सङ्गतः कान्तयाऽसा**
**लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु॥**

अत्र पूर्वार्धे करुण एव चर्वणाविश्रान्तेर्वारणाय तृतीयपादेन शृङ्गारस्य विभावो दर्शितः कविना। तेन शृङ्गार एव विश्रान्तिस्थानमत्र। द्वितीये मते तु मरणशब्देनात्र प्राणत्यागकर्तृतारूपा चैतन्यावस्थैव विवक्षिता। तेन मरणपदेनाऽत्र प्राणत्यागस्य निश्चय एवार्थो मन्तव्यः।

भरतस्य वाक्ये 'मरणादिभिः' इत्यन्त्रादिपदेन दैन्यमोहादयोऽपि विप्रलम्भे व्यभिचारित्वेन विवक्षिताः सन्ति। अन्येषां मतं वर्तते यदादिपदमत्र मरणोत्तरभाविनं करुणं

प्रकटयति। तेन करुणे येऽनुभावाः सन्ति तेऽत्रापि विप्रलम्भे भवन्तीत्यादिपदेन विप्रलम्भस्यानुभावा अत्र सूच्यन्ते। तत्राभिनवगुप्तस्य मतं वर्तते यद् 'आदिश्च आदिश्च' इत्येकशेषेणोभयमत्र ग्रहणीयम्। इदम् 'आदिशब्देन दैन्यमोहादयः ।.. अन्ये त्वादिशब्देन करुणमाश्रित्य तदीयान् अनुभावान् प्राधान्येन दर्शयन्ति। एकशेषेण द्वयमप्यन्ये।' इत्यभिनवभारत्यां स्पष्टम्। तेन विप्रलम्भस्यानुभावास्ते प्रधानरूपेण रोदनादयो भवन्ति ये करुणस्यापि भवन्ति, व्यभिचारिणश्च निर्वेदादयो भवन्तीति भावः फलति।

दैन्यमोहादयोऽपि विप्रलम्भे व्यभिचारित्वेन विवक्षिताः सन्ति।

एते निर्वेदादयो व्यभिचारिणो रतिरूपेऽत्र स्थायिभावसूत्रे, एवमन्यत्रापि रसे स्थायिनि विद्युदुन्मेषवद् अकस्मादेव प्रकटीभवन्तः तिरोदधतश्च स्थायिनि वैचित्र्यं जनयन्ति। यद्यपि स्थाय्यपि न स्थिरः, तथापि संस्काररूपेण धारावाहिसजातीयज्ञानप्रवाहरूपेण वा स्थिरो भवत्येव। व्यभिचारिणश्च क्षणमपि न तिष्ठन्ति। एते स्वकीयं संस्कारमपि स्थायिन एव संस्कारे प्रौढं कुर्वन्ति । व्यभिचारिणां बहुत्वमावश्यकम्। अत एव 'व्यभिचारिण इति, मरणादिभिः' इति बहुवचनस्य प्रयोगः। एकेन व्यभिचारिणा स्थायिनि वैचित्र्यम् आधातुं न शक्यते। अत एव यत् कैश्चिदेकशो व्यभिचारिण उदाह्रियन्ते तन्न समीचीनम्। अत एवमहाकविना कालिदासेन 'अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः' इत्यादि विक्रमोर्वशीयपद्ये विस्मयधृतिस्मृतिहर्षादयो व्यभिचारिणो निबद्धाः। एवमादि सर्वम् अभिनवभारत्यां स्पष्टं वर्तते।

व्यभिचारिणां बहुत्वमावश्यकम्।

### विप्रलम्भस्य महत्त्वम्

विप्रलम्भशब्दस्य मुख्यार्थो विडम्बनम् वञ्चनं भवति।

विप्रलम्भशब्दस्य मुख्यार्थो विडम्बनम् वञ्चनं भवति। 'वयं धूर्तेन तेन विप्रलब्धाः' इत्यादौ वञ्चनारूपोऽर्थः प्रसिद्धः। स इह प्रकृते न संभवति, यतो रतिमन्तौ परस्परं न वञ्चयतः। अतो लक्षणया विप्रलम्भशब्देनाऽत्र विरह एव विवक्षितः। यत्र वञ्चना तत्र विरहो हि ध्रुवो भवति। विरहेण रतिरतिशयेन पुष्टा भवति, अतो मुनिरत्र दर्शयति यद् नायकयोर्विरहं विना शृङ्गारो हृद्यतमो न

भवति। अतः केवलस्य संभोगस्य काव्ये व्यञ्जनं नाट्येऽभिनयेन प्रकाशनं च न विधेयम्। अत एव संभोगेऽपि कविभिर्विप्रलम्भस्य व्यञ्जनाय गोत्रस्खलितादीनि वर्ण्यन्ते। यथा शर्करादिमधुररसस्यास्वादातिशयेन तृप्तस्य वैरस्यं निवारयितुं तिक्तादिरसस्यापेक्षा भवति तथा संभोगचर्वणातिशयेन तृप्तस्य विप्रलम्भस्य। संभोगो विप्रलम्भेनातिशयेन मधुरः सन् स्वदते। 'वामो कामः' इति वात्स्यायनेन 'यद्वामाभिनिवेशित्वम्' इति वदता भरतेन च 'विप्रलम्भं विना संभोगस्यातिशयेन चर्वणा न रमणीये 'ति ध्वनितमेव। महाकविना कालिदासेनापि मेघदूते 'स्नेहानाहुः' इत्यादिना विरहे प्रेम्णः परा काष्ठा सूचितैव। एवं विप्रलम्भावस्थाया महत्त्वं स्पष्टमेव।

**शृङ्गारनिरूपणस्योपसंहारः-**

एवं संभोगविप्रलम्भरूपाभ्याम् अवस्थाभ्यां विशिष्टं शृङ्गारं निरूप्य भरत एभिः श्लोकैः तदेवम् उपसंहरति-

**'सुखप्रायेष्टसम्पन्न ऋतुमाल्यादिसेवकः।**
**पुरुषः प्रमदायुक्तः शृङ्गार इति संज्ञितः ।।**

अपि चात्र सूत्रानुबद्धे आर्ये भवतः-

**'ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वकाव्यसेवाभिः।**
**उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ।।**
**नयनवदनप्रसादैः स्मितमधुरवचोधृतिप्रमोदैश्च ।**
**मधुरैश्चाङ्गविकारैस्तस्याभिनयः प्रयोक्तव्यः ।।' इति ।**

आनन्दरपः
इष्टवस्तुसम्पन्नः
ऋतुमाल्यादिसेवकः
नायिका युक्तः पुरुषः
शृङ्गाररसः।

भरतेन शृङ्गारो नाम' इत्यादिना सूत्रेण करुणेऽतिव्याप्तः शङ्कासमाधानरूपया परीक्षया च शृङ्गाररसो निरूपितः। इदानीं सूत्रार्थस्य सुखेन ग्रहणार्थ सूत्रार्थविवरणरूपां कारिकां 'सुखप्रायेष्ट' इत्यादिना कारिकां कुर्वन् शृङ्गारस्य निरूपणम् उपसंहरति । सुखप्रायः- आनन्दरूपः, इष्टेन वस्तुना सम्पन्न ऋतुमाल्यादीनां सेवकः प्रमदाद्या= नायिकया युक्तः पुरुषः शृङ्गाररस उच्यत इति कारिकापदार्थो वर्तते। अत्र पुरुषशब्देन प्रमदाशब्देन च स्थायिसंविद्रूपो भोक्ता गृह्यते। संवेदनमेव भोक्तरि वर्तते। पुरुषादिरूपा संविदेव रतिरस्ति। रतिरेव पुरुषादिरिति 'श्रद्धामयोऽयं पुरुषः' इति वचनेनापि सिद्धम्।

स्थायिरूपा रतिर्भोक्त्र्येव भवति, व्यभिचारिणस्तु भोग्या एव भवन्ति। प्रधानस्य भोक्तृत्वम्, अप्रधानस्य तु भोक्तृपारतन्त्र्येण भोग्यत्वं भवति। पुरुषस्य प्राधान्ये तद्गता रतिसविद् भोक्त्री, प्रमदासवित्तु भोग्या भवति। प्राधान्यादेव भोक्तृसंविद् भोग्यसंविदा न परतन्त्रीक्रियते। भोग्यायाः संविदो भेदेऽपि भोक्तृरूपा रतिस्थायिसंविद् वस्तुतो न भिद्यते। अत एव नायिकान्तरस्यापि योगे सा रतिरूपा भोक्तृसविद् भिन्ना न भवति। एवमुक्तकारिकाया अर्थो भवति यत् प्रमदापदवाच्यया भोग्यया संविदा विशिष्टा सुखमयी ऋतुकुसुमादिगोचरा भोक्तृरूपा संविच्छृङ्गाररसो वर्तते। सुखप्रायेष्टसम्पन्न इति पुरुषविशेषणेन पुरुषप्रमदयोरुभयोः विशिष्टयोरेव विभावत्वं सूच्यत इत्याद्यभिनवभारत्यां स्पष्टम्।

श्रद्धामयोऽयं पुरुषः

'अपि चात्र' इति भरतोक्तौ वर्तमानः चशब्दः 'आर्ये' इत्यनन्तरं योजनीयो भवति, अपिना च 'सुखप्रायेष्ट' इति श्लोकस्यापि कारिकात्वस्य समुच्चयो द्योत्यते। एवमर्थो भवति यच्छृङ्गाररसस्य पूर्वोक्तसूत्रार्थेन सम्बद्धा कारिका केवला 'सुखप्रायेष्टसम्पन्न ' इत्यनुष्टुब्रूपैव नास्ति, अपित्वार्याद्वयरूपापि विद्यत इत्यभिप्रायो भवति 'अपि चात्र' इत्यादिकथनस्य। शृङ्गारस्य स्वरूपं सुखतरं ग्राहयितुं सूत्रेण सम्बद्धमभिनयार्थमपि भरत आर्याद्वयेन प्रतिपादयति। ऋतुभिः, कुसुमैः, अलङ्कारैः, विदूषकादिरूपस्य प्रियजनस्य गान्धर्वस्य गीतादिमधुरविषयस्य काव्यस्य च सेवाभिश्च शृङ्गाररसो निष्पद्यते, तस्याभिनयश्च नेत्रमुखप्रसादादिभिः, स्मितेन मन्दहासेन, मधुरेण अनुद्वेजकेन वचनेन, धैर्येण, प्रमोदेन चैवमादिना व्यभिचारिणा, रमणीयैः कटाक्षरोमाञ्चादिभिः अङ्गविकारैश्च कर्तव्यः। काव्यसेवाशब्देन सूच्यते यद् नायकादिविषयाणां संकल्पो विभावो वर्तते। केचन काव्यसेवापदस्याभिप्रायं प्रकटयन्ति यत् काव्यस्य काव्यस्य विषयभूतो योऽर्थो भवति तस्मात् काव्यार्थज्ञे भावान्तराणामुदयो भवति, अतः सुखजनकत्वेन काव्यस्य

विषयभूतोऽर्थो रस उच्यते। किन्तु कथनमिदं समीचीनं न विद्यते, यतो रसो विषयो न भवति, अपितु रसः संवेदनरूपः ज्ञानरूपो भवति। एवमनुष्टुभा आर्याद्वयेन च भरतमुनिः परमार्थत एकस्यैव उपलक्षणभूताभ्यां संभोगविप्रलम्भरूपाभ्यां शृङ्गाररसस्य निरूपणमुपसंहरति ।

एवमिह रसेषु प्रथमस्य शृङ्गाररसस्य विभावादिभिः स्वरूपं संभोगविप्रलम्भरूपम् अवस्थाद्वयम्, विप्रलम्भस्य महत्त्वम्, शृङ्गारस्य वस्तुत एकत्वं च भरतदिशा सूत्र-परीक्षा-कारिकाभिः प्रदर्शितम्। उत्तमयुवप्रकृतिप्रमदापदवाच्यया भोग्यया संविदा विशिष्टा सुखमयी ऋतुकुसुमादिविभावादिगोचरा भोक्तृरूपा उत्तमयुवपुरुषपदवाच्या रतिस्वरूपा संविद्, उत्तमयुवप्रकृतिपुरुषपदवाच्यया भोग्यया संविदा विशिष्टा सुखमयी ऋतुकुसुमादिविभावादिगोचरा भोक्तृरूपा उत्तमयुवप्रमदापदवाच्या रतिरूपा संविच्छङ्गाररसो वर्तते। नटेनास्याभिनयो नेत्रादिप्रसादादिभिः कर्तव्यः। एवमुक्तरूपा रतिरूपा संविदेव शृङ्गारः। एष शृङ्गारो वस्तुत एक एव सन् संभोगविप्रलम्भरूपाभ्याम् अवस्थाभ्याम् उपलक्ष्यते च।

शृङ्गारस्य वस्तुत एकत्वं च भरतदिशा सूत्र-परीक्षा-कारिकाभिः प्रदर्शितम्।

## हास्यस्य स्वरूपम्

मुनिना शृङ्गारवद् हास्यस्य स्वरूपं स्थायिभाव-विभावादिनिर्देशेन प्रदर्शितम्। हास्यस्य स्वरूपं प्रदर्शयन् भरतः 'अथ हास्यो नाम हासस्थायिभावात्मकः' इत्याह। अनेन भरतः कथयति यद् हास्यरसो विकृतचेष्टादिदर्शनादिना जन्या या हासाभिधाना चित्तवृत्तिर्भवति सैव हास्यरसो वर्तते। हासः स्थायी भावः आत्मा स्वरूपं यस्य स रसो हास्य उच्यत इति भरतकथनस्याभिप्रायो वर्तते। भरतेन 'स्थायिभावात्मकः' इत्यत्रात्मशब्दं प्रयुक्तवान्। एवं भवद्भिर्शास्यते यद् वीरादीनां प्रायेण सर्वेषां रसानां निरूपणे भरतेनात्मशब्दः प्रयुक्तो वीरादीनाम् उत्साहादिस्थायिभावरूपता प्रतिपादिता च, किन्तु केवलस्य शृङ्गाररसस्य करुणरसस्य च निरूपणे आत्मशब्दो न प्रयुक्तः, अपितु शृङ्गारो नाम रतिस्थायिभावप्रभवः' इत्यत्र 'करुणो नाम शोकस्थायिभावप्रभवः' इत्यत्र च प्रभवशब्दः

हास्यरसो विकृतचेष्टादिदर्शनादिना जन्या या हासाभिधाना चित्तवृत्तिर्भवति सैव हास्यरसो वर्तते।

प्रयुक्तः। अत्र प्रश्नो भवति यत् सर्वत्रात्मशब्दस्य, शृङ्गारकरुणयोस्तु प्रभवशब्दस्य प्रयोगस्य मूलं किं विद्यते ? अस्योत्तरं ददत्यभिनवभारती वदति यत् सुखदुःखरूपौ रतिशोकौ शृङ्गारकरुणयोः स्थायिभावौ स्तः, एतयोः कारणानि प्रमदादीनि इष्टनाशादीनि च यानि भवन्ति तानि तदैव कस्मिंश्चिद् रतिं शोकं वा जनयन्ति यदात्मसम्बन्धेनैव ज्ञातानि भवन्ति। लोके हि कश्चित् स्वीयत्वेनैव ज्ञातायां प्रमदायां सुखम्, स्वकीयस्यैवेष्टस्य नाशे दुःखं चानुभवति। लोके 'इयं नायिका मम' इति ज्ञाने सति सुखं भवति, 'इदं मम धनं नष्टम्' इति ज्ञाने सति दुःखं च भवति । एवं रतिशोकयोः कारणेषु साधारण्यस्य संभावना लोके कदाचिदपि न भवति। अतः 'स्वकारणेन जाता रतिरेव शृङ्गारः, शोक एव स्वकारणेन जन्यः करुणः' इति स्वीकर्तुं न शक्यते । अतः शृङ्गारकरुणौ रतिशोकाभ्यां प्रभवौ निष्पन्नौ कथितौ, न तु रतिशोकात्मानौ-रतिशोकरूपौ। रतिशोकाभ्यां प्रतीती रतिशोकरूपा न भवति, अपितु साधारणीकृतैर्विभावादिभिर्जन्या आत्मीयत्वादिसम्बन्धेन रहिता साधारणी भवति। एवं रतिशोकयोः शृङ्गारकरुणयोश्च भेदो वर्तते, रतिशोकौ सुखदुःखरूपौ भवतः, शृङ्गारकरुणौ त्वानन्दरूपौ। अत एव मुनिना शृङ्गारकरुणयोः रतिशोकप्रभवत्वं कथितम्, न तु रतिशोकरूपत्वम्। एवं लोके रतिशोकयोः कारणेषु कदाचिदपि साधारण्यं न संभवति, अत एव रतिशोकावात्मसम्बन्धेनैव लोके प्रतीयेते। किन्तु हासोत्साहभयादीनां कारणेषु लोकेऽपि साधारण्यं कदाचन संभवति। यथा कश्चनापि कञ्चनापि विकृतवेषं विलोक्य हसति । विकृतवेशादी आत्सम्बन्धज्ञानस्याभावेऽपि हासो लोके दृश्यते। एवं साधारण्येनापि प्रतीताद् व्याघ्रादेर्भयादि भवति। न हि कश्चनात्मीयमेव परकीयमेव वा विकृतवेषं दृष्ट्वा हसति । हासादीनां कारणानि लोकेऽपि साधरणानि संभवन्ति। अतो विकृतवेषादिजन्यो हासादिस्तदास्वादश्चैकरूप एव भवति। हासास्वादयोर्भेदो नास्ति। अत एव भरतेन हासस्थायिरूप एव हास्यरसोऽभिहितः। एवं वीरादयोऽपि

विकृतवेशादी आत्सम्बन्धज्ञानस्याभावेऽपि हासो लोके दृश्यते।

उत्साहादिस्थायिभावरूपा उक्ताः, केवलौ शृङ्गारकरुणौ रतिशोकस्थायिरूपौ न स्तः, अपितु रतिशोकप्रभवौ स्तः। लोकेऽपि साधारण्येनापि संभाव्यमानानि नयविनयादीनि उत्साहस्य, अन्यायकारिणः क्रोधस्य, दुर्गन्धिमांसादीनि जुगुप्सायाः, लोकोत्तरवस्तूनि विस्मयस्य च कारणानि भवन्ति कालादीनां च साधारण्येनैव सर्वं प्रति कारणत्वं लोके वैशेषिकादिशास्त्रे च प्रसिद्धमेव। हासादिरसनिरूपणे आत्मशब्दप्रयोगस्य रहस्यमिदमेव वर्तते। उक्तमभिनवभारत्याम्-

**'आत्मशब्देन इदम् आह रतिः आस्वादनाख्यां प्रतीतिं विदधाना न तां रतिरूपाम् एव विधत्ते। प्रमुखे विभावादि असाधारण्यात्। हासे तु य आस्वादः सोऽपि विकृतवेषादीनां सामाजिकान् प्रति लोकवृत्तेन हासहेतुता इति विभावसाधारण्यद्वारेण तदेकस्वभाव एवेति हासात्मकरसनात्मकचर्वणीयत्वात् च अस्येति। रतिशोकौ परम् अतज्जातीयौ संविदास्वादी धारारूढसुखदुःखरूपत्वेन निस्साधारणात्मीयत्वग्रहगृहीतहेतुबलादेव उत्पद्येते यतः, अतोऽनयोर्मुनिना प्रभवग्रहणं प्रति कृतम्। अन्येषु तु विभावे साधारण्यसंभावनात् तदात्मकग्रहणम्। नयविनयादेः अन्यायकारिणः समानं कालादेः अपूर्ववस्तुनश्च सर्वान् उत्साह-क्रोध-जुगुप्सा-विस्मयहेतुत्वेन साधारण्यविभावत्वाद'** इति।

हासरूपः स्थायी भावो रसो हास्य उच्यते।

एवमुक्तविवेचनेन स्पष्टं यद् हासरूपः स्थायी भावो रसो हास्य उच्यते। अस्य निष्पत्तिः कथं भवतीति प्रतिपादनार्थं तस्य विभावादयोऽग्रे भरतेन प्रतिपाद्यन्ते।

**विभावः-**

तत्र विभावः **'स च विकृतवेषालङ्कार-धाष्र्य-लौल्य-कुहकाऽसत्प्रलाप- व्यङ्गदर्शनदोषोदाहरणादिभिः विभावैः उत्पद्यते'** इति वाक्येन निर्दिश्यते। विकृतवेषदर्शनादयो हास्यस्य विभावाः सन्ति। अस्याः पङ्क्तेरक्षरार्थ एवं विद्यते स च-हास्यरसश्च विकृतवेषालङ्कारधाष्र्यलौल्यकुहकासत्प्रला-पव्यङ्गदर्शनदोषोदाहरणादिभिः विकृती देश-काल-प्रकृत्ति-वयोऽवस्थाभ्यां विपरीती विरुद्धौ यौ वेषालङ्कारौ केशादिविन्यासरूपो वेषः कटकादिरूपोऽलङ्कारश्च तौ विकृतौ

वेषविन्यासौ, धार्ष्ट्यं-निर्लज्जता, लौल्य विषयेषु अनियतता कस्मिश्चिदपि विषये मनसः स्थिरताया अभावः, कुहकम् बालानां कृतं विस्मयजनक कक्ष-ग्रीवादीनां स्पर्शनम्, असत्प्रलापाः-असद्वचनानि, व्यङ्गम्-विकृतम् अङ्ग व्यङ्गम् अङ्गं विकारश्चेत्येतेषां दर्शनम्, दोषोदाहरणं च दोषाणां शूरादिषु भयादिरूपाणां दोषाणाम् उदाहरण वर्णनं चादि येषां तैः विभावैः उत्पद्यते। केशादीनाम् अनेकाकारेण रचना वेष उच्यते। अलङ्कारश्च कटककुण्डलादि कथ्यते। अत्र विकारो देशेन कालेन प्रकृत्या स्वभावेन वयसा अवस्थया च वैपरीत्यं भवति। यथा कटकस्य चरणे धारणं देशेन स्थानेन, ग्रीष्मे ऊर्णावस्त्रधारणं कालेन, शूरेण शस्त्रादिस्थाने रुद्राक्षमालायाः करेण धारणं स्वभावेन, यौवने जटादिधारण वयसा, दरिद्रेण महर्घाणां भूषणानां धारणमवस्थया च विपरीतं भवति। वेषेऽलङ्कारे च देशकालादिवैपरीत्यं तदनौचित्यं वा विकारो वर्तते। यत्र यस्य कस्यचिदपि रसस्य विभावे वेषालङ्कारयोर्देशादिवैपरीत्यं भवति तत्र हास्य उत्पद्यते। अयमेवाभिप्रायोऽभिनवभारत्याम् **'तत्र वेषः केशादिरचना। अलङ्कारः कटकादिः। स चोभयोऽपि देश काल- प्रकृत्ति- वयोऽवस्थाविपरीतो हास्यस्य विभावः। एतेन सर्वे रसा हास्येऽन्तर्भूता इति दर्शितम्'** इति वचनेन प्रकटितः। देशादिवैपरीत्यरूपेण विकारेण युक्तयोः वेषालङ्कारयोः धार्ष्ट्यादेश्च दर्शनं शूरादिषु भयादिदोषवर्णनेन च हासस्थायिभावरूपो हास्यरस उत्पद्यते। भरतस्य वाक्ये 'आदि 'पदेन संकल्पस्मृत्यादयो गृह्यन्ते । तेन विकृतवेषादिदर्शनमेव विभावो नास्ति, अपितु विकृतवेषादेः संकल्पस्मरणादिरपि।

वेषेऽलङ्कारे च देशकालादिवैपरीत्यं तदनौचित्यं वा विकारो वर्तते।

विकृतवेषदर्शनादयो हास्यस्य विभावाः सन्ति।

**अनुभावः-**

विभावं प्रतिपाद्य भरतेन हास्यस्यानुभावः **'तस्य ओष्ठदशननासाकपोलस्पन्दनदृष्टिव्याकोशाकुञ्चनस्वेदास्यरागपार्श्वग्रहणादिभिः अनुभावैः प्रयोक्तव्यः'** इति वाक्येन प्रतिपादितः। अस्याक्षरार्थं एवं वर्तते तस्य हास्यरसस्य, अभिनयः ओष्ठयोः, ओष्ठदशननासाकपोलस्पन्दनदृष्टिव्याकोशाकुञ्चनस्वेदास्यरागपा

हास्यस्य अनुभावं विचारयति।

श्रवग्रहणादिभिः दशनानाम्-दन्तानाम्, नासायाः, नासिकायाः, कपोलयोश्च यत् स्पन्दनम् ईषच्चलनम्, दृष्ट्योः नेत्रयोः व्याकोशः विकासः आकुञ्चनम् ईषत्संकोचश्च, स्वेदश्च, आस्यरागश्च मुखरागश्च, पार्श्वग्रहणं च पार्श्वयोः ग्रहणं पीडनं चादीनि येषां तैः, अनुभावैः अभिनयः प्रयोक्तव्यः। ओष्ठयोः, दन्तानाम्, नासिकायाः, कपोलयोश्च स्पन्दनम्, नेत्रयोः संकोचविकासौ, स्वेदः, मुखलौहित्यम्, पार्श्वपीडनं चेत्यादयो हास्यरसस्यानुभावा भवन्ति। एभिरेव हास्यरसो साक्षात्कारतां नेयः।

**व्यभिचारिभावः-**

हास्यरसस्य आलस्यम्, अवहित्था, मोहः, निद्रा, स्वप्नः, प्रबोधः, असूया चेति मुख्या व्यभिचारिणः सन्ति।

अस्य भरतेन हास्यस्य व्यभिचारिभावाः **'व्यभिचारिणः च आलस्य-अवहित्था-तन्द्रा निद्रा-स्वप्न-प्रबोध असूयादयः'** इति वाक्येन निदर्दिष्टाः। अत्राऽवहित्थाशब्देन लज्जादिजन्यम् आकारप्रच्छादनम्, तन्द्राशब्देन च मोहो गृह्यते। एवं हास्यरसस्य आलस्यम्, अवहित्था, मोहः, निद्रा, स्वप्नः, प्रबोधः, असूया चेति मुख्या व्यभिचारिणः सन्ति।

एवं निष्कर्षरूपेण वक्तुं शक्यते यद् विकृतवेषादिदर्शनादिरूपाणां विभावानाम् ओष्ठादिस्पन्दनादीनाम् अनुभावानाम् आलस्यादिरूपाणां व्यभिचारिणां च संयोगेन हासस्थायिभावरूपो हास्यरसो निष्पद्यते। तादृशविभावादिसंयोगविशिब्टो हासो हास्यरस इति हास्यरसस्य स्वरूपं सिद्धयति ।

हास्यरसस्य स्वरूपं हास्यशब्दस्य योगार्थश्च भरतेनाऽऽभ्याम् आनुवंश्याभ्याम्-शिष्याचारपरम्परासु प्रसिद्धाभ्याम् आर्याभ्यां (आर्याच्छन्दसि रचिताभ्यां श्लोकाभ्याम्) सूच्यते-

विकृतैः अङ्गविकारैः हसतीति रसः स्मृतः हास्यः।

अत्रानुवंश्ये आर्ये भवतः-

**विपरीतालङ्कारैः विकृताचाराभिधानवेषैश्च ।**

विकृतैः अङ्गविकारैः हसतीति रसः स्मृतः हास्यः। विकृताकारैः वाक्यैः अङ्गविकारैः विकृतवेषैश्च। हासयति जनं यस्मात् तस्माद् ज्ञेयो रसो हास्यः ।।' इति।

अत्र हास्यस्य विभावे विकृतम् अभिधानम् वचनम् अपि कथितम्। विकृतवचनश्रवणेन हासो भवत्येव । वचने विकाराश्च उच्चारणादिजन्या नाना भवितुमर्हन्ति । यथा कस्यचिद् विदुषः 'रावण' इत्यस्य स्थाने 'राभण' इत्युच्चारणेन 'विप्राय ददाति' इत्यस्य स्थाने 'विप्रं ददाति' इति वचनेन च हासो जन्यमानो दृश्यत एव। एवमिह हास्यस्य स्वरूपमुक्तम्, इदानीं तस्य भेदः प्रकाश्यते।

**हास्यस्य भेदः**

अस्य रसस्य भेदस्य निरूपणं द्विधा वर्तते। सर्वप्रथमम् आत्मस्थत्वपरस्थत्वाभ्यां हास्यस्य द्वौ भेदौ प्रतिपादिती, ततश्च प्रकृत्याश्रयेण षड् भेदा उक्ताः। हास्यरसः पूर्वं द्विधा भवति आत्मस्थः परस्थश्च । 'द्विविधश्चायम् आत्मस्थः परस्थश्च। यदा स्वयं हसति तदा आत्मस्थः। यदाऽपरं हासयति तदा परस्थः।' इति हि भरतेनोक्तम्।

**करुणरसः**

करुणो नाम शोकस्थायिभाव-प्रभवः

एवं हास्यरसं सभेदं निरूप्य भरतेन विभावादिनिर्देशेन करुणरसो निरूप्यते। 'अथ करुणो नाम शोकस्थायिभावप्रभवः' इति करुणरसस्य स्वरूपं प्रतिपादितम्। शोकः- इष्टनाशादिजन्यश्चित्तवृत्तिविशेषः प्रभवो उद्गमस्थलं यस्य स रसः करुण इत्यक्षरार्थः। यथा विभावादिभिः रस्यमाना साधारणी रतिः शृङ्गार उच्यते तथा विभावादिभिः रस्यमानः साधारणः शोकः करुणः कथ्यते। रतेरास्वादो यथा शृङ्गारस्तथा शोकस्यास्वादः करुण इति भावः। आस्वाद्यमानस्य सर्वसाधारणस्य शोकस्य नाम करुण इति वर्तते। आस्वादे प्रारम्भे शोकस्योपयोगेन व्याख्यानप्रक्रिया सर्वा करुणस्य शोकप्रभवत्वम्। अत्रशृङ्गारस्वरूपबंधिकसूत्रवद् एव करणीया भवति। अत एव 'तत्प्रभवत्वं शृङ्गारवद् व्याख्येयम्' इत्यभिनवभारत्यां प्रतिपादितम्।

करुणरसस्य विभावं विचारयति।

भरतेन करुणरसस्य विभावः **'स च शापक्लेशविनिपात इष्ट जनविप्रयोग- विभवनाश- वध बन्ध-विद्रव-उपघात-व्यसन-संयोगादिभिः विभावैः समुपजायते।'** इति वाक्येन कथितः। अस्य वाक्यस्याऽयम् अक्षरार्थः स च करुणश्च शापक्लेशे-शापेन जन्ये

क्लेशे विनिपातः विशेषेण पतनम्, अथवा शापक्लेशे निपतितस्य इष्टजनस्य विप्रयोगः विनाशः कदाचिदपि समागमस्याभावो वा, विभवनाशः धनस्य ध्वंसः, वधः इष्टजनस्य हत्या, बन्धः कारागारादौ बन्धनम्, विद्रवः देशाद् उच्चाटनं पलायनं निष्कासनं वा, उपघातः अग्न्यादिकृतं मरणम्, व्यसनसंयोगश्च मृगयाद्यूतादिना सम्बन्धश्च आदिर्येषां तैर्विभावैः समुपजायते निष्पद्यते। शापक्लेशादिहेतुक इष्टनाशः करुणस्य विभाव इति तात्पर्य विद्यते। शापग्रहणेन ज्ञाप्यते यत् तेन कारणेन जन्य इष्टविप्रयोगः करुणस्य विभावो भवति यस्य प्रतिकारो न भवति। एवम् अशक्यप्रतिकारेण कारणेन जन्य इष्टविप्रयोगो विभाव इति ध्वन्यते। तेन यत्रेष्टस्य नायकस्य नायिकाया वा सन्नपि विप्रयोगः पुनः कारणान्तरेण निवर्तते तत्र स करुणं न जनयति, यथा विप्रलम्भे शृङ्गारे। रामायणे चरमः सीतावियोगो नोपायान्तरेण निवृत्त इति स करुणस्य जनकत्वेन विभावो भवति। अत एव **'अशक्यप्रतिकारहेतूपलक्षणं शापग्रहणम्'** इत्यभिनवभरत्याम् अभिहितम्। भरतेन विभावबोधकवाक्ये 'आदि' इति शब्दस्य प्रयोगेण ज्ञाप्यते यदुत्तमप्रकृतौ स्वविभवनाशादिना शोको यद्यपि न भवति तथापि मध्यमाधमप्रकृत्योर्भवत्येव। इदम् 'विभवनाशादयोऽपि स्वात्मगता नोत्तमप्रकृतेः शोकं कुर्युः। मध्यमाधमप्रकृतीनां तु कुर्युरेवेत्यादिग्रहणम्' इत्यभिनवभारत्यां स्पष्टम्।

अनुभावो भरतेनानेन वाक्येन निर्दिश्यते- 'तस्य च अनुपात- परिदेवन- मुखशोषण- वैवर्ण्य- स्रस्तगात्रता-निश्वास- स्मृतिविलोपादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः' इति। अश्रुपातः, परिदेवनम् स्वस्य परस्य दैवस्य चोपालम्भः, मुखशोषणम्, वैवर्ण्यम् मुखस्य स्वाभविकवर्णस्य परिवर्तनं मुखमालिन्यम् इति यावत्, सस्तगात्रता गात्राणां हस्तचरणादीनाम् अङ्गानां शैथिल्यम्, निश्वासः दीर्घस्य प्राणवायोर्बहिर्निःसारणम्, एतदनन्तरभावी ऊद्ध्र्वश्वसनरूप उच्छवासश्च, स्मृतिविलोपश्च स्मृतेर्विनाशश्च आदिर्येषां ते

करुणस्यानुभावा भवन्ति । अत्र निश्वासशब्द उच्छवासस्यापि स्मृतिविलोपशब्दश्च स्तम्भप्रलययोरपि उपलक्षणमिति अभिनवभारत्यां स्पष्टम्। एवम् अनुपातादिभिः करुणस्याभिनयः प्रयोज्य इति भरतस्य वचनम्।

व्यभिचारिणो भरतेन **'व्यभिचारिणः च अस्य निर्वेद ग्लानि चिन्ता- औत्सुक्य- आवेग मोह श्रम भय विषाद दैन्य व्याधि जडता- उन्माद- अपस्मार- त्रास आलस्य मरण स्तम्भ वेपथु वैवर्ण्य अश्रु स्वरभेदादयः'** इति निर्वेदादिरूपा निर्दिष्टाः।

निर्वेदादिरूपा निर्दिष्टाः।

यद्यपि वेपथुः, वैवर्ण्यम्, अनु, स्वरभेदश्चानुभावरूपा भवन्ति, ततो व्यभिचारिषु ग्रहणं विरुद्धयते च तथापीह तैः शब्दैस्ताः चित्तवृत्तयो गृह्यन्ते यासां स्वभावो वेपनवैवर्ण्यादिकार्यदर्शनेन बहिरुद्भिन्नो भवति। अनुवेपथुप्रभृतय एते सात्त्विका भावा भरतेन पूर्व त्रिंशतो व्यभिचारिणां चतुर्णाम् अभिनयानां च मध्ये पठिताः। एतेन बहिरुद्भिन्नकार्याणाम् एषां व्यभिचारित्वम् अभिनेयत्वं च सूच्यते। अत एते व्यभिचारिणोऽनुभावाश्च मन्तुं शक्यन्ते । अभिनेयता ह्यभिनये भवति । एवं व्यभिचारिप्रसङ्गे ये वैवर्ण्यादयो भावा गृहीतास्ते व्यभिचारित्वेन, पूर्वमनुभावमध्ये त्वनुभावत्वेन। अतः पुनरुक्तिर्विसंगतिर्वा न वर्तते। उक्तमेतद् अभिनवभारत्याम्- **"वैवर्ण्यश्रुस्वरभेदा अत्र वहिरुद्भिन्नस्वभावाः चित्तवृत्त्यात्मानो गृह्यन्ते। तथाहि वक्तारो भवन्ति- 'अश्रुणा पूर्णोऽस्य कण्ठः, न च नयनजलं दृष्टम्'** इति । एते ह्यश्रुप्रभृतयो व्यभिचारित्वाभिनेयत्वोपजीवनाच्चैव मध्ये निर्दिष्टा इत्यवोचं वक्ष्यामश्च । तेन न पौनरुक्त्यम्।' इति। इह वैवर्ण्यादि वेपथोरपि उपलक्षणं वर्तते। भरत एवं सूत्रैर्विभावादिना करुणस्य स्वरूपं निरूप्याऽत्र प्रमाणरूपेणार्याद्वयं कारिकारूपेण प्रस्तौति-

अत्र भावशब्दो विभावस्य बोधको भवति।

**इष्टवधसंदर्शनाद् वा विप्रियवचनस्य संश्रवाद् वापि ।**
**एभिर्भावविशेषैः करुणरसो नाम भवति ॥**
**सस्वनरुदितैमर्मोहागमैश्च परिदेवितैर्विलपितैश्च।**
**अभिनेयः करुणरसो देहायासाभिघातैश्च ॥**

अस्यायम् अक्षरार्थः- इष्टस्य प्रियस्य वधस्य हत्याया वधशब्दस्य उपलक्षणत्वेन बन्धादेश्च दर्शनात्, विप्रियवचनस्य इष्टस्य वधादेः बोधकस्य वचनस्य वाक्यस्य सश्रवात्

भावविशेषैः- सम्यक् श्रवणाद्वापि, एभिः प्रकारैः, इष्टवधादिदर्शनश्रवणादिरूपैः विभावविशेषैः करुणरसः संभवति सम्यग् निष्पद्यते। अत्र भावशब्दो विभावस्य बोधको भवति। **'भावशब्दोऽत्र आर्यायां विभाववाची'** इत्यभिनवभारती वदति। प्रथमाया आर्याया अभिप्रायो वर्तते यत् कविभिः स्वयं दृष्टाः श्रुता वा इष्टजनवधादयः करुणरसस्य विभावत्वेन विभावरूपेण निबन्धनीयाः। उक्तम् **'तेन चेष्टजनस्य दृश्यमानं विभवनाशादि दृश्यमानं श्रूयमाणं वा कविभिः करुणविभावत्वेन निबन्धनीयमिति तात्पर्यम्'** इति। प्रथमाया आर्याया यथाश्रुतार्थो ग्रहीतुं न शक्यते, यतोहि सामाजिकैरिष्टजनस्य वधादि न दृश्यते, न च दृष्टं तत् सुखरूपं करुणरसं सूते। द्वितीययाऽऽर्यया करुणस्यानुभावा व्यभिचारिणश्च सूच्यन्ते। सस्वनरुदितैः= सस्वनैः स्वनेन शोकसूचकशब्देन सहितै रुदितैः रोदनैः, मोहागमैः मोहस्य जडताया आगमैरागमनैः, परिदेवितैः दैवादिनिन्दनैः, विलपितैः- विलापैः, देहायासाभिधातैः च देहस्य आयासैः पातनवेष्टयनादिभिः अभिघातैः उरः शिरस्ताडनादिभिश्च करुणरसोऽभिनेयः। अत्रार्यायां मोहशब्दो व्यभिचारिण उपलक्षयति। तेन निर्वेदादयो व्यभिचारिणो ग्राह्या भवन्ति। 'सस्वनरुदितै' इत्यादौ बहुवचेन रोदनादीनां प्रकृत्या देशेन कालेन अवस्थया कारणादिना च कृता नाना भेदाः सूच्यन्ते। रोदनादीन्येवं नानाविधानि भवन्ति। एवं वक्तुं शक्यते यद् इष्टवधादिभिर्विभावैः, रोदानादिभिरनुभावैः, निर्वेदादिभिव्यभिचारिभिश्च साधारण्येन रस्यमानः शोकः करुणरस उच्यते।

अइष्टवधादिभिर्विभावैः,रोदनादिभिरनुभावैः,निर्वेदादिभिव्यभिचारिभिश्च साधारण्येन रम्यमानः शोकः करुणरसः

### रौद्ररसः

करुणस्य जनको हि रौद्रो भवति

एवं करुणरसस्य निरूपणा अनन्तरं रौद्ररसो निरूप्यते। करुणस्य जनको हि रौद्रो भवतीति मुनिना **'रौद्रात् करुणो रसः'** इति वचने पूर्व प्रतिपादितम्। करुणस्य स्वरूपं विभावादयश्चैवं निर्दिश्यन्ते- **अथ रौदो नाम क्रोधस्थायिभावात्मकः रक्षोदानवोद्धतमनुष्यप्रभवः संग्रामहेतुकः'** इति करुणस्य स्वरूपं निर्दिष्टम्। क्रोधः आयोभाव आत्मा स्वरूपं यस्य स क्रोधस्थाविभावरूपः,

रक्षांसि रावणादिरूपा राक्षसाः, अनुपुत्रामयप्रभृतयः उद्धताः उद् उद्रिक्तं हतं शत्रो रक्तपानादिना हननं येषां ते सेनादिरूपा मनुष्याश्च प्रभव उद्गमस्य हेतवो यस्य स संग्रामहेतुकः संग्रामः कविना न च प्रदश्यमाने युद्ध हेतुर्यस्य स रसो रौद्र उच्यत इत्यक्षरार्थों वर्तते। प्रभव इत्यस्य राक्षसादयो प्रकृतिश्चर्वणोदयस्य हेतुर्यस्य स रौद्ररसो भवतीत्यस्मिन्त्रपि पाठेऽर्थो भवति। केचन 'युद्धहेतुक' इति पदस्याभिप्रायं वर्णयन्तो वदन्ति यद् उद्धतमनुष्येषु भीमसेनादिषु दुर्योधनरक्तपानादिरूपोऽर्थो युद्धहेतुको वर्तते, रक्तपानादिनैव मनुष्येषु उद्धतत्वम् आयाति, रक्षोदानवास्तु स्वभावत एव क्रोधेन उद्धताश्च भवन्ति। अत्राऽभिनवभारत्यां कथ्यते यद् भीमसेनकृतं रक्तपानं युद्धहेतुकं नास्ति, अपितु युद्धस्य फलं वर्तते। अतो भीमसेनादि रक्तपानस्य युद्धहेतुकतायाः कथनं समीचीनं नास्ति । 'क्रोधस्थायिभावात्मक' इत्यत्रात्मग्रहणेन ज्ञाप्यते यद् अन्यायकारिता क्रोधस्य प्राधान्येन विषयो भवति । अन्यायकारिणी रक्तस्यापि पानेन तृप्तेरभावो लोके शास्त्रे च प्रसिद्धो वर्तते। साधारणोऽपि जनो वदति यद् यदि सोऽन्यायाकारी लभ्येत तदा तस्य रक्तमपि पीत्वा नाहं तृप्यामीति । भासेनापि कथितम्-

**त्रेतायुगं तद्धि न मैथिली**
**सा रामस्य रागपदवी मृदु तस्य चेतः।**
**लब्धा जनस्तु रावणमस्य कार्यं**
**प्रोत्कृत्य तन्त्र तिलशो न वितृप्तिगामी**

रौद्ररसस्याऽपि विभावो हास्यवदेव लोकेऽपि साधारणो भवति, न तु शृङ्गारकरुणवत् काव्य एव। आत्मग्रहणस्य रहस्यमिदमेव वर्तते। स्वभावतः क्रोधना अपि रक्षोदानवादयो क्रुद्धा न भवन्ति, अपितु क्रोधस्योद्दीपनम् अपेक्षन्ते। अतो रक्षोदानवादिषु क्रोधात्पत्तेर्विभावं भरतः 'क्रोध- आघर्षण अधिक्षेप अवमानन अनृतवचन- वाक्पारुष्य- अभिद्रोह- मात्सर्यादिभिः विभावैः उत्पद्यते' इति वाक्येनाऽऽह। रक्षः प्रभृतिषु क्रोधः तदा भवति यदा कश्चित् तेभ्यः क्रुद्धयति। एवं परकृतः क्रोधः, दारादीनां केशादिकर्षणादिरूपम् आघर्षणम्,

क्रोध- आघर्षण अधिक्षेप अवमानन अनृतवचन- वाक्पारुष्य- अभिद्रोह- मात्सर्यादिभिः विभावैः उत्पद्यते

देश-जाति-कुल-विद्यादीनां निन्दारूपोऽधिक्षेपः, अवमाननम्, अनृतस्य-असत्यस्य वचनम्, गृह-भृत्यादीनाम् उपमर्दनरूप उपघातः, 'अहं तव वधं करिष्यामि' इत्यादिरूपं कठोरं वचनम्, वर्धच्छारूपोऽभिद्रोहः, गुणेषु असूयारूपं मात्सर्यम्, आदिग्रहणेन राज्यापहरणादीनि च रक्षः प्रभृतिषु क्रोधं जनयन्ति। एतानि परक्तक्रोधादीनि रौद्रस्य विभावाः सन्ति।

अस्य परकृतक्रोधादिना रक्षः प्रभृतिषु उत्पन्नस्यानुभावरूपाणि कार्याणि भरतेन 'तस्य च ताडन पाटन पीडन च्छेदन भेदन प्रहरणाहरण शस्त्रसंपात- संप्रहार- रुधिराकर्षणाद्यानि कर्माणि' इति निर्दिष्टयनि। रक्षः प्रभृतिषु विभावेन जनितस्य क्रोधस्य कर्माणि कार्याणि ताडनम्- करपादतलेन आघातः, पाटनम्- द्विधाकरणम्-विदारणम्, अङ्गानां मर्दनरूपं पीडनम्, करादीनां कर्तनरूपं छेदनम्, भेदनम्-शत्रुपक्षस्य मित्रेषु भेदस्य जननम्, प्रहरणानाम्- शस्त्रास्त्राणाम् आहरणम्-आ समन्ताद् हरणम्, विदारणम् अकुर्वतोऽपि शस्त्रस्य संपातः संपातनम्, विदारणं कुर्वतः शस्त्रस्य सम्प्रहारेण रुधिरजनकेनाघातेन रुधिरस्य रक्तस्याकर्षणम् आद्यपदेन पानलेपनादि च सन्ति। स्वभावतः क्रोधना रक्षः प्रभृतयो हि सुरतारभगोष्ठ्यादौ अपि यत् सामान्येन चेष्टन्ते तत्रापि ताडनादि प्रधानं भवति। किन्तु यदा ते केनचित् कोपिता भवन्ति तदा तेषां नयनादौ रक्तवर्णादीन्यपि प्रादुर्भवन्ति। नाटके ताडनादिप्रदर्शनं निषिद्धमिति ताडनादीनि नटेन प्रदर्शयितुं न शक्यन्ते। अतः कथं तेषामभिनयो भवेदिति शङ्का भवति। अस्याः समाधानं कुर्वन् भरतो वदति यन्त्रयनरक्तादिभिरभिनयः कार्यः। यद्यपि ताडनादि नेत्ररक्तादि च क्रोधस्य कार्यत्वेन समानरूपेणानुभावपदेन वक्तुं शक्यन्ते, किन्त्वभिनयस्तु नेत्रादिरागादिनैव प्रदर्शनीयः। अत एव ताडनादिरूपाणि कार्याणि पूर्व निर्दिश्य नेत्रादिरागादिनाऽभिनयम् **'पुनश्च रक्तनयन- भ्रूकुटीकरण अवष्टम्भ दन्तौष्ठपीडन- गण्डस्फुरण- हस्ताग्रनिष्पेषादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः'** इति वाक्येन निर्दिशति।

तस्य च ताडन पाटन पीडन च्छेदन भेदन प्रहरणाहरण रुधिराकर्षणाद्यानि कर्माणि

रक्ताभ्यां नयनाभ्याम्, भ्रूकुटीकरणेन भ्रुकुट्याः- भ्रुवोः भ्रुमूलमध्ये समुत्क्षेपस्य करणेन, अवस्टम्भेन, दन्तैरोष्ठस्य निष्पीडनेन, गण्डयोः कपोलयोः स्फुरणेन, हस्ताग्रयोः परस्परनिष्पेषरूपेण संघर्षणेन एवमादिभिश्चानुभावैरभिनयः प्रयोक्तव्यः। रक्तनयनादयोऽभिनेया अनुभावाः सन्ति। ताडनादीनां रक्तनयनादीनां चानुभावत्वे समानेऽपि रक्तनयनादीनां पृथङ् निरूपणम् अभिनयस्याभिप्रायेण कृतम्। इदमभिनवभारत्याम्- 'अस्य ताडनादीनि कर्माणि रक्तनयनादयोऽनुभावा इति पृथङ् निरूपणं तुल्येऽप्यनुभावत्वे विशेषख्यापनार्थम्। विशेषस्तु पूर्वेषां वचनमात्रेण व्यावर्णनम्, रङ्गे प्रत्यक्षतोऽप्रदर्शनीयत्वात्। यद्वक्ष्यते-

युद्धं राज्यभ्रंशो मरणं नगरोपरोधनं चैव।
अप्रत्यक्षकृतानि प्रवेशकैः संविधेयानि ॥ इति।

रक्तनयनादि प्रत्यक्षेण कृतम्।' इत्यनेन वचनेन स्पष्टं विद्यते। सारमिदं वर्तते यद् भरतेन प्रदर्शितानि ताडनादीनि नयनरागादीनि चोभयानि रौद्रस्यानुभावाः सन्ति, किन्तु तत्र ताडनादीनि वर्णनीयान्येव भवन्ति, अभिनेयानि न भवन्ति, नयनरागादीनि तु अभिनेयान्यपि भवन्ति। अयमेवोभयोविशेषो विद्यते। एवं ताडनादीनि नयनरागादीनि च रौद्रस्यानुभावाः सन्तीति फलितं भवति।

भावाश्चास्य असम्मोह- उत्साह आवेग- अमर्ष- चपलता- औग्र्य- स्वेद- वेपथु- रोमाञ्च गद्गदादयः

रौद्रस्य व्यभिचारिणः 'भावाश्चास्य असम्मोह-उत्साह आवेग अमर्ष- चपलता- औग्र्य- स्वेद- वेपथु- रोमाञ्च गद्गदादयः' इति वाक्येन निरूपिताः। अत्र भावपदेन व्यभिचारिणो गृह्यन्ते। तेन असम्मोहादयो रौद्रस्य व्यभिचारिभावाः सन्तीति फलितं भवति। असंमोहः- संमोहविपरीतः सम्यग्बोधो वर्तते। उत्साहो यद्यपि वीरस्य स्थायी भावस्तथापीह स क्रोधस्यैव प्राधान्येन रस्यतया व्यभिचारी भवति। स्वेदादयो बाह्या भवन्तीति यद्यपि ते व्यभिचारित्वेन गणयितुं न शक्यन्ते तथापि स्वेदादिभिः शब्दैरत्र स्वेदादिकारणभूता स्वेदादिरूपैः कायैरभिव्यक्ता आन्तयः श्रमादय एवं ग्राह्या भवन्ति। तेन श्रमाद्योऽपि व्यभिचारिणो भवन्तीति फलितं भवति । इदमभिनवभारत्याः

'बाह्यः स्वेदादिभिरभिव्यक्ता व्यभिचारिरूपाः पठिताः' इति वचनेन स्पष्टं भवति।

एवं वक्तुं शक्यते यत् परकृतक्रोधादिना क्रोधितेभ्यो राक्षसदानावादिभ्यो जनितः, नयनरागादिभिरनुभावितः सम्मोहादिव्यभिचारिभावैः विशिष्टः साधारण्येनास्वाद्यमानः क्रोधो रौद्ररस उच्यते।

अत्र हास्यस्य करुणस्य रौद्रस्य च स्वरूपं प्रदर्शितम्

एवमिह पाठे हास्यस्य करुणस्य रौद्रस्य च स्वरूपं प्रदर्शितम्। हास्यरसो साधारणहास्यस्थायिभावरूपो भवति। अस्य विभावा विकृतवेषादिधारिणः, अनुभावा नेत्रकपोलविकासादयः, व्यभिचारिणश्चालस्यादयो भवन्ति । अयमात्मस्थः परस्थश्चेति प्रथमं द्विविधः, ततश्च स्मितादिप्रकारेण षड्विधो भवति। साधारणः शोकस्थायिभावः करुणरस उच्यते। अस्य विभावाः शापक्लेशादयः, अनुभावा अश्रुपातादयः, व्यभिचारिणश्च निर्वेदादयो भवन्ति। साधारणः क्रोधो रौद्ररस उच्यते। अस्य विभावा महापराधकारिणः, अनुभावा महापराधिनां ताडनवधबन्धादयः, व्यभिचारिणश्चासंमोहादयो भवन्ति। अयं राक्षसदानवेषु स्वभावतो भवति, तथा राक्षसाद्यनुकारिणि उद्धते भीमादिसदृशे मनुष्येऽपि भवति। रौद्रस्याधिकारिणो वस्तुतो राक्षसदानावा एव भवन्ति । तामसप्रकृतयः सामाजिका रौद्ररसमास्वादयन्ति। एवमिर्हते त्रयो रसा विवेचिताः।

### वीररसः

साधारण्येन आस्वाद्यमानः उत्साह आत्मा स्वरूपं यस्य स रसो वीरः

'अष्टौ नाट्ये रसाः स्मृताः' इति पद्येन ये नाट्येऽष्टौ रसा उक्ताः तेषां क्रमेण निरूपणं भरतेन विहितम्। षष्ठे पाठेऽन्ते रौद्ररसो निरूपितः। रौद्रनिरूपणाद् अनन्तरं सम्प्रति वीररसनिरूपणस्य क्रमो वर्तते। भरतेन सर्वप्रथमं तत्र 'अथ वीरो नाम उत्तमप्रकृतिः उत्साहात्मकः' इति कथनेन वीररसस्य स्वरूपमुक्तम्। अत्र 'अथ' इति शब्देन रौद्राद् अनन्तरं वीरस्य क्रमे औचित्यं सूच्यते। रौद्रे यथा संग्रामे सम्प्रहारादीनां योगो भवति तथा युद्धवीरेऽपि। अतो वीरस्य रौद्रेण सह सादृश्यं वर्तते। अतो रौद्रस्य निरूपणाद् अनन्तरं वीरस्य निरूपणस्य क्रम उचितो भवति। इदम् 'क्रमप्राप्तं वीरं लक्षयति अथ वीरेति। युद्धवीरे हि संग्रामसंप्रहारयोगो

रौद्रेऽपीति वीरे जिघांसेति । आनन्तर्यम् अथशब्देनाह' इत्यभिनवभारतीवचनेन स्पष्टं भवति । उत्तमप्रकृतिः काव्ये नाट्ये च प्रयुज्यमाना उत्तमा प्रकृतिहेतुर्यस्य सः, अथवोत्तमानां प्रकृतिः स्वभावः, उत्साहात्मकः- **साधारण्येन आस्वाद्यमानः उत्साह आत्मा स्वरूपं यस्य स रसो वीर उच्यते** । नामशब्देन वीरस्य तथास्वरूपत्वे प्रसिद्धिः सूच्यते। उत्साह उत्तमानां प्रकृत्तिः स्वभावो भवति, अतस्तदात्मको वीरोऽपि रस उत्तमप्रकृत्तिरस्ति। काव्ये नाट्ये च प्रयुज्यमानाया उत्तमाया एव प्रकृते रसोऽयं निष्पद्यते। तस्मादपि कारणाद् वीररसोऽत्रोत्तमप्रकृतिरुच्यते । उत्तमानामेव वर्णानाम् उत्साहः सर्वत्राऽऽस्वाद्यो भवति। अत एव धीरोदात्त-धीरोद्धत-धीरललित-धीरप्रशान्तेषु उत्तमेषु चतुर्ष्वपि नायकेषु वीररसोऽनुगतो भवति । उत्तमानामेव चरितस्य ज्ञानेनोपदेशो लभ्यते। अत उत्तमगत एवोत्साहो वीरत्वेन मन्यते। यद्यपि सर्वेऽपि जना उत्साहवन्तो भवन्ति, किन्तु तेषाम् उत्साहः सर्वैर्जातो न भवति, सर्वेषां चरितं विनेयान् नोपदिशति च, अतस्तद्गत उत्साहो वीररसो न भवति। असंमोहादिना गुणेन सम्पन्ना उत्तमा एव भवन्तीति त एव।

अथ वीरो नाम उत्तमप्रकृतिः उत्साहात्मकः।

अस्य वीररसस्य विभावा भरतेनैवं निर्दिष्टाः **'स च असंमोहाध्यवसाय – नय- विनय-बल- पराक्रम-शक्ति-प्रताप-प्रभावादिभिः विभावैः उत्पद्यते'** इति। स च = वीररसश्च, असंमोहाध्यवसाय-नय-विनय-बल-पराक्रम-शक्ति-प्रताप-प्रभावादिभिः- असंमोहाध्यवसायेन-असंमोहेन विवेकेन अध्यवसायेन वस्तुस्वभावस्य निश्चयेन नयेन सन्धिविग्रहादीनां षण्णां राजनीतिगुणानां सम्यक्प्रयोगेण, विनयेन- इन्द्रियजयेन, बलेन सैन्येन, पराक्रमेण शत्रुराज्यानाम् आक्रमणादिना स्वायत्तीकरणेन अवस्कन्दनेन वा, शक्त्या युद्धादौ सामर्थ्यन, प्रतापेण-शत्रुविषये संतापकारिण्याः प्रसिद्ध्या, प्रभावेण = अभिजन-मन्त्रिधनादिसिद्ध्या, आदिग्रहणेन यशः प्रभृतिभिश्च विभावैः उत्पद्यते। यस्मिन् असंमोहेन निश्चयो नयविनयादयश्च भवन्ति स वीरस्य विभावो भवतीति तात्पर्य विद्यते। असंमोहः

इन्द्रियाणां वशीकरणं विनय उच्यते।

स च असंमोहाध्यवसाय – नय- विनय-बल- पराक्रम-शक्ति-प्रताप- प्रभावादिभिः विभावैः उत्पद्यते

सदसतोर्विवेक उच्यते। तेन 'इदम् एवम्, इदं तु न' इत्यादिरूपो वस्तुतत्त्वस्य निश्चयोऽध्यवसायः कथ्यते। ततोऽसंमोहाध्यवसायस्यार्थो भवति विवेकेन यथार्थनिश्चयः। अथवा असंमोहरूपो विवेकरूपो योऽध्यवसायः निश्चयो वर्तते तेनेत्यर्थः। केचन वदन्ति यद् सम्मोहशब्दस्यार्थो भवति असत्सु वस्तुषु अभिनिवेशः, यथा रावणादौ वर्तमानोऽयं परदारादि-हरणादौ तस्य रावणादौ उत्साहं जनयति। किन्तु असंमोहशब्देन असत्सु वस्तुषु अभिनिवेशरूपोऽर्थो बोधयितुं न शक्यते। एष तस्य नञ्विशिष्टस्य संमोहशब्दस्यार्थो भवितुं नार्हति। तस्माद् विवेकेन निश्चय एव तस्यार्थः स्वीकरणीयः। इदम् अभिनवभारत्याः 'असद्वस्त्वभिनिवेशः असंमोहो रावणादिगत उत्साहकारीत्यसत्, अशब्दार्थत्वात्' इति । असंम्मोहा-ध्यसायरूपेण गुणेन विभावे नायके मन्त्रशक्तिः सूच्यते। यः सद्सद्विवेकिन्या बुद्ध्या वस्तुतत्त्वस्य निश्चये क्षमो भवति स एव मन्त्रणायां समर्थो भवति। सन्धिविग्रहादीनां सम्यक् प्रयोगो नय उच्यते। इन्द्रियाणां वशीकरणं विनय उच्यते। बलं सेनोच्यते। पराक्रमो परराज्यस्याक्रमणादिना स्वायत्तीकरणं भवति। युद्धादौ सामर्थ्यं शक्तिरुच्यते। प्रतापः शत्रूणां सन्तापस्य जनिका प्रसिद्धिरस्ति। प्रभावः कुलस्य मन्त्रिणां धनस्य च प्राप्तिरस्ति। एतेऽसंमोहादयो यस्मिन् भवन्ति स एवोत्तमः पुरुषो वीररसस्य विभावो भवति। उत्तमेषु उत्साहस्तदा भवति यदाऽसंमोहनिश्चयादयः प्रादुर्भवन्ति । एवमुत्साह-स्याऽव्यभि-चरितकारणत्वेन भरतमुनिनाऽसंमोहनिश्चयादय एव विभावा उक्ताः। इदमभिनवभारत्यां स्पष्टं वर्तते। फलितरूपेण वक्तुं शक्यते यद् असंमोहाध्यवसायादिभिः सर्वैरेव सम्पन्ना उत्तमा वीरस्य विभावा भवन्ति। उत्तमे असंमोहाध्यवसायादिषु कदाचित् कश्चिद् अधिको भवति, कश्चित्तु न्यूनः, न तु युगपदेव सर्वे समानरूपेणोत्तमे उत्पद्यन्ते। एवमुत्तमे सर्वे भवन्ति, किन्तु कदाचित् कस्यचिदाधिक्यं भवतीति ध्वनितुं भरतेनाऽसंमोहाध्यवसायादयः पृथक् पृथग् विभावत्वे-नाभिहिताः। वस्तुतस्तु असंमोहाध्यवसायादीनां समूहे एव विभावत्वं भरतस्याभिमतम्। एवमन्ते वक्तुं शक्यते यद् असंमोहाध्यवसायादिसमूहेन विशिष्ट एवोत्तमे पुरुषे वीरस्य

विभावता भवति। एते उत्साहस्य व्यञ्जका असंमोहाध्यवसायादयो रामादौ सचिवायत्तसिद्धौ वत्सराजादौ च नायके, यथायोगं यौगन्धरायणादौ सचिवे चोदाहरणरूपेण द्रष्टुं शक्यन्ते। प्रतिनायकेऽपि एते उत्साहं व्यञ्जन्ति । कविना प्रतिनायकगतस्योत्साहस्य व्यञ्जनाय व्यस्तरूपेण समस्तरूपेण वा यथायोगं प्रयोगः कर्तव्यः। असंम्मोहाध्यवसायादीनां समग्राणाम् उदाहरणं रामादिचरितं वर्तते। इदं सर्वमभिनवभारत्यां विशषेण द्रष्टुं शक्यते।

स्थैर्य-शौर्य-त्याग-वैशारद्यादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः

वीररसस्य अनुभावाः निर्दिष्टाः- 'तस्य अनुभावा भरतेनैवं स्थैर्य-शौर्य-त्याग-वैशारद्यादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः' इति । स्थैर्यं निश्चिताद् विषयाद् अचलनं कथ्यते। धैर्यं गाम्भीर्येण मन्त्रादीनां संवरणम्-गोपनम् उच्यते। शौर्यं युद्धादिकरणं निगद्यते। त्यागो दानं भाष्यते। वैशारद्यं चतुर्णा साम-दान-भेद-दण्डानां तेषु त्रयाणां द्वयोरेकस्य वा यथावसरं प्रयोग उच्यते। एते स्थैर्यादयो वीररसस्यानुभावा भवन्ति । रसाभिव्यक्तये कविनैते वर्णनीया नटैरेषमभिनयः प्रयोक्तव्यश्च ।।

वीरस्य व्यभिचारिणो धृतिः, मतिः, गर्वः, आवेगः, उग्रता, अमर्षः, स्मृतिः,रोमञ्चनामा आन्तरः सात्त्विकभावश्चैवामादयो भवन्ति। उक्तम् 'संचारिभावाः च अस्य धृति-मति-गर्व-आवेग-औग्रय-अमर्ष-स्मृति-रोमाञ्चादयः' इति ।

एवं फलितं भवति यद् असंमोहजन्येन निश्चयेन नयविनयादिना च विभावेन, स्थैर्यादिनाऽनुभावेन, धृतिमत्यादिना व्यभिचारिणा च प्रतीयमानः साधारण उत्तमगत उत्साहो वीररस उच्यते।

एवं वीररसं निरूप्य भरतो भयानक निरूपयति- 'अथ भयानको नाम

**भयानकरसः**

साधारणं भयं भयानको रसः

'भवस्थायिभावात्मकः' इति । भयम्-साधारणीभूतं भयम् आत्मा स्वरूपं यस्य स रसो भयानक उच्यत इत्यक्षरार्थो वर्तते। साधारणं भयं भयानको रस इति तात्पर्यं भवति । अयं विकृतस्वरेण = अट्टहासादिना, सत्त्वानाम्-पिशाचानां दर्शनेन,

शिवानाम् - शृगालीनाम् उलूकानां च शब्देन, अन्यस्मिन् वर्तमानेन त्रासेनोवेगेन, शून्यागारे निर्जने गृहेऽरण्ये च प्रवेशेन गमनेन, विकृतरवादीनां स्मरणेन, स्वजनानां वधस्य बन्धस्य च दर्शनेन प्रत्यक्षेण श्रुत्या श्रवणेन कथया अतीतयोरपि वधबन्धयोर्वर्णनेन चैवमादिभिर्विभावैर्भयानकरस उत्पद्यते। विकृतरवादयो भयानकस्य विभावा इत्यर्थो भवति । तस्य भयानकरसस्याऽनुभावा इमे सन्ति-करचरणस्य प्रकर्षेण वेपनम्, नयनयोश्चाञ्चल्यम्, पुलकः- रोमाञ्चोऽर्थाद् रोमकूपस्योन्नतिः, मुखस्य वैवर्ण्यम्, स्वरस्य भेदः स्वरस्य स्वभावस्य वैपरीत्यम्, एवूमन्येऽपि पलायनादयः। करचरणादिकम्पादिभिरस्य भयानकस्याभिनयो भवति। भयानकस्य व्यभिचारिण इमे भवन्ति स्तम्भः, स्वेदः, गद्गदः, रोमाञ्चः, वेपथुः, कम्पः, स्वरभेदः, वैवर्ण्यम्, शङ्का, मोहः, दैन्यम्, आवेगः, चपलता, जडता, त्रासः, अपस्मारः, मरणादयश्च। अत्रेदं ज्ञेयं यदनुभावे ये स्वरभेदरोमञ्चादयोऽनुभावत्वेनोक्ताः ते आन्तराणां भावानां कार्याणि सन्ति, व्यभिचारिषु निर्दिष्टास्ते तु आन्तराः सात्त्विका भावाः सन्ति ।

सात्त्विकेष्वपि व्यभिचारित्वं संभवतीति पूर्व प्रतिपादितमेव। विभावादिनिर्देशो भरतेनैवं कृतः-'स च विकृतरव- सत्त्वदर्शन- शिवा- उलूक- त्रास- उद्वेग- शून्यागार- अरण्य- प्रवेश- स्मरण- स्वजन-वध-बन्ध-दर्शन- श्रुति- कथादिभिः विभावैः उत्पद्यते। तस्य प्रवेपित कर- चरण- नयनचलन- पुलक- मुखवैवर्ण्य- स्वरभेदादिभिः अभिनयः प्रयोक्तव्यः। व्यभिचारिभावाः च अस्य स्तम्भ- स्वेद- गद्गद्- रोमाञ्च वेपथु- स्वरभेद- वैवर्ण्य- शङ्का मोह- दैन्य आवेग- चापल- जडता त्रास अपस्मार- मरणादयः।' इति ।

बीभत्सो नाम जुगुप्सास्थायिभावात्मकः।

**बीभत्सरसः**

एवं भयानक निरूप्य भरतो बीभत्सरसं निरूपयति 'अथ बीभत्सो नाम जुगुप्सास्थायिभावात्मकः' इति। साधारण्येन प्रतीयमानः जुगुप्सारूपः स्थायी भाव आत्मा स्वरूपं यस्य स रसो बीभत्स उच्यते। अस्य विभावा अहृद्यस्य कस्यचिद्

ब्राह्मणादीना हृदयस्य अप्रियस्य लशुनादेः, अप्रियस्य स्वभावेन प्रियस्यापि व्याध्यादिदोषेण कफादिपीडितस्य कृते अप्रियस्य दुग्धादेः, अचोक्षस्य स्वरूपेण निर्दुष्टस्यापि मलादिसंयोगेन दूषितस्यान्नादेः, अनिष्टस्य च-भुक्तत्वेन तृप्ततया यस्य विषये बुभुक्षादिर्निवृत्तः तस्यौदनादेश्च श्रवणम् दर्शनम्, परिकीर्तनादीनि च सन्ति। एभिरयं रस उत्पद्यते। अस्य बीभत्सरसस्यानुभावाः सर्वेषाम् करचरणादिरूपाणाम् अङ्गानां संहारः-पिण्डीकरणं अर्थाद् निश्चेष्टीकरणम्, मुखनेत्रास्यावयवानां कूणनम् संकोचनम्, उल्लेखनम्, निष्ठीवनम् मुखात् कफस्य निःसारणम् अर्थात् थूत्कारः, उद्वेजनम् अङ्गानाम् उद्धननम् उत्कर्षेण कम्पनं चेत्यादीनि सन्ति। व्यभिचारिणश्चास्य रसस्य अपस्मारः, आवेगः, मोहः, व्याधिः, मरणादयश्च सन्ति। भरतेन गद्येनास्य रसस्य विभावा अनुभावा व्यभिचारिणश्चैवं निर्दिष्टाः **'स च अहृद्य अप्रिय अचोक्ष अनिष्ट-श्रवण- दर्शनपरिकीर्तनादिभिः विभावैः उत्पद्यते। तस्य सर्वाङ्गसंहार- मुखनेत्रकूणन- उल्लेखन- निष्ठीवन- उद्वेजननादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः। व्यभिचारिभावाः च अस्य अपस्मार आवेग मोह व्याधि मरणादयः। इति।**

भरतेन बीभत्सरसस्य विभावा अनुभावा व्यभिचारिणश्चैवं निर्दिष्टाः

## अद्भुतरसः

बीभत्सस्य निरूपणाद् अनन्तरं क्रमप्राप्तस्य अद्भुतस्य स्वरूपम् 'अथ अदभुतो नाम विस्मयस्थायिभावात्मकः' इति कथितम्। साधारणो विस्मयरूपः स्थायी भावोऽद्भुतरस इति कथनस्यास्य तात्पर्य विद्यते। दिव्यानाम् गन्धर्वादीनां दर्शनम्, ईप्सितस्य प्राप्तुं शक्यस्य मनोरथस्य प्राप्तुम् अशक्यस्य च वस्तुनः अवाप्तिः प्राप्तिः, उत्तमे भवने देवकुले देवालये चाऽभिगमनम् उत्तमभवनादि गत्या तत्रत्योत्तमशिल्पादिदर्शनम्, सभा=मयदानवादिरचितो युधिष्ठिरादिसम्बन्धी गृहविशेषः, विमानम् दिव्यरथः, अर्थाद् देवादिसम्बन्धि आकाशयानम्, माया स्वं रूपं परित्यज्य रूपान्तरस्य धारणम् अर्थाद् रूपपरिवर्तनम्,

इन्द्रजालम् मन्त्रेण द्रव्यवस्तूनां संयोगविशेषेण च असंभवतो रात्री सूर्यदिः प्रदर्शनं चैतानि यानि सन्ति तेषां साधनादीनि एवमादीनि लोकोत्तराणि वस्तूनि अद्भुतस्य विभावाः सन्ति। दिव्यगन्धर्वादिदर्शनादिरूपैर्विभावैः अद्भुतरस उत्पद्यते। नयनयोर्विस्तारः, अनिमेषं प्रेक्षणम्-विलोकनम्, रोमाञ्चः, अश्रु, स्वेदः, हर्षः हर्षस्य मुखविकासादिरूपं कार्यम्, साधुवादः 'साधु साधु' इत्युच्चारणम्, प्रदानप्रबन्धः प्रदानस्य प्रकर्षेण दानस्य प्रबन्धः सातत्यं निरन्तरता वा, हाहाकारः 'हा हा' इति शब्दस्योच्चारणम्, बाह्वोः भुजयोः,वदनस्य मुखस्य, अङ्गुलेः, चेलस्य वस्त्रस्य च भ्रमणादीनि एवमादयः पदार्था अद्भुतस्यानुभावा भवन्ति। अत एते कविनाऽद्भुतस्य व्यक्तये वर्णनीया नटेनाभिनेयाश्च। अद्भुतस्य व्यभिचारिणः अनु-स्तम्भ-स्वेद-गद्गद -रोमाञ्चरूपाः सात्त्विकभावाः, आवेगः, संभ्रमः मोहः, जडता, प्रलयश्चैवमादयः भवन्ति। एते विभावादयो भरतेनैवं निर्दिष्टाः 'स च दिव्यदर्शन-ईप्सितमनोरथावाप्ति-उत्तमभवनदेवकुलाभिगन-सभा-विमान-माया-इन्द्रजालसाधनादिभिः विभावैः उत्पद्यते। तस्य नयनविस्तार अनिमिषप्रेक्षण-रोमाञ्च- अश्रु – स्वेद – हर्ष – साधुवाद-प्रदानप्रबन्ध- हाहाकार- बाहु - वदन- चेल-अङ्गुलिभ्रमणादिभिः अनुभावैः अभिनयः प्रयोक्तव्यः। व्यभिचारिभावाः च अस्य अश्रु-स्तम्भ-स्वेद-गद्गद-रोमाञ्च-आवेग-संभ्रम-जडता-प्रलयादयः।' इति।

अदभुतो नाम विस्मयस्थायिभावा-त्मकः

अत्रानुभावे गणितौ अश्रु-स्वेदौ नयनादिजलरूपौ विस्मयस्य कार्यभूतौ स्तः। व्यभिचारिषु गणितास्तु अश्रुप्रभृतय आन्तरा नयनजलादेः कारणभूताः सात्त्विकभावाः सन्ति । सात्त्विकेषु व्यभिचारित्वमपि भवतीति पूर्व प्रतिपादितमेव। अनुभावगणने गृहीतेन हर्षेण हर्षस्य मुखविकासादयः कार्यरूपा अनुभावा एव गृह्णन्ति। अन्यथा हर्षस्य व्यभिचारित्वेनानुभावे गणनं विरुद्ध भवेत्।

## Summarised Overview

एवमिह भवद्भिः श्रृङ्गार- वीर-करुण- भयानक- बीभत्साऽद्भुत विषये ज्ञातम् । साधारण्येन प्रतीयमान उत्साहो वीररसः, साधारण्येन प्रतीयमानं भयं भयानकरसः, साधारण्येन प्रतीयमाना जुगुप्सा वीभत्सरसः, साधारण्येन प्रतीयमानो विस्मयोऽद्भुतरसः, एवमेषां रसानां विभावादयोऽपि विचारिताः।

## Assignments

1. श्रृङ्गाररसस्वरूपं निरूपयत।
2. श्रृङ्गाररसस्य भेदान् विचारयत।
3. करुणरसस्वरूपं विचारयत।
4. वीररसं निरूपयत।
5. भयानकरसं निरूपयत।
6. बीभत्सरसं विशदयत।
7. अद्भुतरसं विशदीकुरुत।

## Suggested Readings

1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

## References

1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith.The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice,Motilal Banarasidas Publishers, Delhi.1924

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# UNIT 3

# शान्तरसनिरूपणम्

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

भरतेन ' शृङ्गारहास्य' इत्यादिरूपायां कारिकायां येऽष्टौ रसाः संगृहीतास्ते निरूपिताः। अष्टानामेव रसानां निरूपणं नाट्यशास्त्रस्य चौखम्बासंस्करणे लभ्यते । किन्तु ' शृङ्गारहास्य' इति कारिकायां क्वचित् शान्तरसस्यापि पाठो वर्तते, नाट्यशास्त्रस्य बडौदासंस्करणं शान्तमपि निरूपयति, अभिनवगुप्तेनाभिनवभारत्यां शान्तस्य रसत्वं विस्तरेण प्रतिष्ठापितं वर्तते च। अत एतदाधारेण शान्तस्य स्वरूपं प्रदर्श्यते।

## Keywords

शान्तरसः, स्थायीभावः, शमः, मोक्षप्रवर्तकः, शान्तस्य , विभवाः, अनुभावाः, सर्वं अनित्यं ब्रह्मैव सत्यम्।

# Discussion

**शान्तरसः**

शान्तस्य स्थायिभावः शमो वर्तते। साधारणः शमरूपः स्थायिभावो मोक्षस्य प्रवर्तकः शान्तरस उच्यते- 'अथ शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः' इति । यथा शृङ्गारादिरसचतुष्टयं कामादिरूपेण पुरुषार्थेन सम्बद्ध भवति तथा शान्तो मोक्षेण। शान्तस्सः शमरूपस्थायिभावस्वरूपो भवति । निरीहावस्थायाम् आत्मनि चित्तस्य विश्रामेन जन्यं सुखमुच्यते। अस्य शमरूपस्य स्थायिभावस्य लक्षणं साहित्यदर्पण एवं लभ्यते 'शमो निरीहावस्थायामात्मविश्रामजं सुखम्' इति ।

शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः

'सर्वमनित्यम्, ब्रह्मैव नित्यम्' इत्याकारं तत्त्वज्ञानं वैराग्यं आशयशुद्धिः-चित्तशुद्धिश्चैवमादयोऽस्य विभावाः सन्ति। एभिरेव स रसरूपः शमो जन्यते। यमः, नियमः, अध्यात्मध्यानम् आत्मविषयकं ध्यानम्, धारणा, उपासना, सर्वान् प्राणिनः प्रति दया, लिङ्गग्रहणम्-लिङ्गस्य भस्मादिरचितस्य तिलकस्य दण्डस्य काषायवस्त्रादेश्च धारणम्- एवमादीनि वस्तूनि शान्तस्य अनुभावाः सन्ति। एभिरस्य रसस्याभिनयो भवति । व्यभिचारिणस्तु निर्वेदः, स्मृतिः, सर्वेषु ब्रह्मचर्यादिषु आश्रमेषु शौचम्, पवित्रता, स्तम्भो रोमाञ्चश्चेत्यादयः सन्ति। एवं तत्त्वज्ञानादिना विभावेन, यमनियमाद्यनु'भावेन, निर्वेदादिनाऽनुभावेन च प्रतीयमानः साधारणः शमः शान्तरस उच्यते। अस्य विभावादयो नाट्यशास्त्र एवं निरूपिताः **'स तु तत्त्वज्ञान वैराग्य- आशयशुद्ध्यादिभिः अनुभावैः समुत्पद्यते। तस्य यम- नियम अध्यात्मध्यान- धारणा उपासन- सर्वभूतदया- लिङ्गग्रहणादिभिः अभिनयः प्रयोक्तव्यः। व्यभिचारिणः च अस्य निर्वेद- स्मृति- धृति- सर्वाश्रमशौच - स्तम्भ रोमाञ्चादयः।'** इति।

सर्वमनित्यम् ब्रह्मैव नित्यम्

शान्तस्य विषये नाट्यशास्त्रे द्वे आर्ये तिस्रोऽनुष्टुभश्चापि लभ्यन्ते-
**मोक्षाध्यात्मसमुत्थः तत्त्वज्ञानार्थहेतुसंयुक्तः ।**

नैः श्रेयसोपदिष्टः शान्तरसो नाम संभवति ।।
बुद्धीन्द्रियकर्मेन्द्रियसंरोधाध्यात्मसंस्थितोपेतः ।
सर्वप्राणिसुखहितः शान्तरसो नामविज्ञेयः ।।
न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः ।।
भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।
विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते ।।
स्वं स्वं निमत्तमासाद्य शान्ताद् भावः प्रवर्तते।
पुनर्निमित्तापाये च शान्त एवोपलीयते।।

अत्रैषां पद्यानामक्षरार्थोऽभिप्रायश्चैवं वर्तते- तत्त्वज्ञानस्योपयोगिनो वेदान्तादिशात्रादिरूपा येऽर्था भवन्ति तै शान्तरसः सम्बद्धो भवति। एभिरयमुत्पद्यते इति भावार्थो वर्तते। मोक्षस्य साधकं यद् अध्यात्मध्यानं भवति तेनाप्ययं समुत्तिष्ठति (उत्पद्यते) । अयं रसो मुनिना नैःश्रेयसाय (मोक्षरूपस्य) पुरुषार्थस्य साधनायोपदिष्टः। अयं रसो मोक्षरूपेण पुरुषार्थेन सम्बद्धो वर्तत इति भावो वर्तते। एवं प्रथमयाऽऽर्यया शान्तस्य विभाव उक्तः । द्वितीययाऽनुभावा उच्यन्ते। ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च तत्तद्विषयेभ्यः संरोधरूपं व्यावर्तनम्, अध्यात्मस्थितिः- चित्तस्यात्मनि स्थापनम् अर्थाद् आत्मविषयं ध्यानम्, सर्वेषां प्राणिनां सुखस्य कामना तदर्थं चेष्टा चार्थात् सर्वभूतेषु दया चेत्यादयोऽनुभावाः सन्ति ।

शान्तरसः मोक्षरूपेण पुरुषार्थेन सम्बद्धो वर्तत।

शेषैः पद्यैः शान्तस्य स्वरूपमुच्यते। शान्ते इष्टस्य भौतिकवस्तुनो लाभेन सुखं न भवति, अनिष्टस्य लाभेन दुःखमपि न भवति, प्रतिकूलं प्रति न द्वेषो भवति, नापि चानुकूलं प्रति रागः। यतोऽयं शमरूपो भवति। रत्यादयो भावाः शमरूपस्य शान्तस्य विकाराः सन्ति, शान्तस्तु तेषां भावानां प्रकृतिस्तथा वर्तते यथा कटक-कुण्डलादीनां प्रकृतिः स्वर्णं भवति। यथा स्वप्रकृतिभूतात् स्वर्णाद् उत्पन्नाः कटकादयो विकारा अन्ते स्वर्णे विलीयन्ते तथा रत्यादयः शान्तादेव जायन्ते तत्रैवान्ते विलीयन्ते। रत्यादयः स्वं स्वं नायकादिरूपं निमित्तं प्राप्योत्पद्यन्ते नायकादिरूपस्य निमित्तस्य अपाये अभावे सति तत्रैव लीयन्ते च। एवं रत्यादेः पूर्वं मध्येऽन्ते च वर्तमानत्वेन

शान्तस्य स्वरूपं उच्यते।

शान्तरसः प्रकृतिर्भवति, शेषाः शृङ्गारादयो रसास्तु शान्तस्य विकृतयो भवन्ति। आदौ अन्ते मध्ये च शान्त एव भवति।

**अभिनवभारत्यां शान्तरसस्य स्थापना-**

अभिनवगुप्तः शान्तं नवमरसत्वेन स्थापयति।

अभिनवगुप्तः पूर्वोत्तरपक्षाभ्यां शान्तं नवमरसरूपेण स्थापयति । शान्तः शमस्थायिभावरूपो भवति। अस्य तपस्या योगिसम्पर्कादयो विभावाः सन्ति। कामक्रोधादीनाम् अभावोऽनुभावो वर्तते। धृतिः, स्मृतिः, मतिप्रभृतयश्चानुभावाः सन्ति। एष शमस्थायिरूपः शान्तरस इति केषाञ्चन मतं वर्तते।

शान्तद्वारा विनेया व्युत्पादयितुं न शक्यन्ते।

शान्तरसविषये पूर्वपक्षः किन्तु शान्तविरोधिनः प्रतिपादयन्ति यत् तादृशः शमः शान्तरस इति कथनं न संगच्छते। शमशान्तशब्दाभ्यां ह्येक एवार्थो बोध्यते। यथा रति शृङ्गारपदार्थयोर्भेदो भवति तथा शमशान्तयोरपि भेद न भाव्यम् । किन्तु शमशब्देन शान्तशब्देन चैक एवार्थ उच्यते। यदि शमोऽपि शान्तस्य स्थायिरूपेण कश्चनान्यो भावः स्वीक्रियते तदा भावानां संख्या पञ्चाशद् भवेत्। ततश्च 'भावा एकपञ्चाशद् भवन्ति' इति भरतसिद्धान्तस्य विरोधो भवेत्। किञ्च शृङ्गारादौ ऋतुमाल्यादयो विभावा भवितुमर्हन्ति, किन्तु तपोऽध्ययनादयः शान्तस्य विभावा इति वक्तुं न शक्यते। तपोऽध्ययनादयो हि तत्त्वज्ञानस्याऽव्यवहिता हेतवो भवन्ति, न तु तत्त्वज्ञानाज्जायमानस्य शमस्य। यदि तु तत्त्वज्ञानमेव विभाव उच्यते तदा तपोऽध्ययनादीनां शमं शान्तं वा प्रति विभावतायाः कथनं त्यक्तं स्यात्। कामाद्यभावस्य अनुभावताऽपि वक्तुं न शक्यते, यतः कामाद्यभाव एव शमः शान्तो वोच्यते, न तु स ततः पृथग् भवति । किञ्च कामाद्यभावोऽभिनयो न भवति शमं न गमयति च। यस्याभिनयो भवति येन भावो गम्यते च स एवानुभाव उच्यते । कामादिप्रयोज्यायाः चेष्टाया अभावोऽभिनययोग्यो न भवति। एवं सुप्तमोहादयो व्यभिचारिणोऽपि न संभवन्ति । एते हि निःश्वास-पतन नेत्रनिमीलनादिभिरेव अनुभवस्य विषया भवन्ति । धृत्यादयोऽपि प्राप्तस्य विषयस्योपभोगरूपा एव भवन्ति। ततश्चैते शमरूपे शान्ते कथं भवितुमर्हन्ति ? काव्यं नाट्यं वा विषयोपभोगप्रवृत्तानां विनेयानां राजकुमारादीनां रसास्वादद्वारा सदुपदेशायैव प्रवर्तते। विषयोन्मुखेषु विनेयेषु

शमस्यास्वादो न संभवति । विनेयाः सम्यग्दर्शनं न प्राप्ताः। एते संसारे वर्तन्ते। अतः शान्तद्वारा विनेया व्युत्पादयितुं न शक्यन्ते। तस्मान्नवमः शान्तरसो न संभवति ।

**पूर्वपक्षस्य निराकरणम्-**

धर्मादयश्चत्वारः पुरुषार्थाः प्रसिद्धाः सन्ति। धर्माद्यपेक्षया मोक्षस्य प्रधानपुरुषार्थता शास्त्रेषु प्रतिपादिता वर्तते। लोके यथा कामादिपुरुषार्थविषया रत्यादयश्चित्तवृत्तयः स्वीक्रियन्ते तथा मोक्षविषयाऽपि काचन चित्तवृत्तिः स्वीकार्या। सा चित्तवृत्तिः तत्त्वज्ञानजन्यो निर्वेदो वर्तते । यद्यपि निर्वेदोऽमङ्गलरूपः तथापि भरतेन व्यभिचारिषु तस्य सर्वप्रथमं गणनं यत् कृतं तस्याभिप्रायो वर्तते यन्निर्वेदेऽन्येभ्यो व्यभिचारिभ्यो विशेषो वर्तते। अयं कस्यचन रसस्य स्थाय्यपि भवति व्यभिचार्यपि। तत्त्वज्ञानजो निर्वेदः शान्तरसस्य स्थायी भावो वर्तते। यस्तु दारिद्र्यादिजन्यो निर्वेदो भवति। स तु व्यभिचारी भवति । भरतेन शृङ्गारे जुगुप्साया व्यभिचारित्वं निषिद्धम्। जुगुप्सा बीभत्सस्य स्थायी भावो वर्तते। ततस्तत्र यदि व्यभिचारित्वमेव न वर्तते तदा व्यभिचारित्वं कथं निषिद्धमिति प्रश्नो भवति। अस्योत्तरं वर्तते यद् भरतेन शृङ्गारे जुगुप्साया व्यभिचारित्वस्य वारणेन क्वचित् स्थायिषु स्थायित्वस्य व्यभिचारिषु व्यभिचारित्वस्य च व्यभिचारं सूच्यते। यथा हास्यस्य हासरूपः स्थायी भावः शृङ्गारे व्यभिचारी मन्यते। एवं निर्वेदस्य व्यभिचारित्वेऽपि शान्तस्य स्थायित्वं मुनिसम्मतमेव वर्तते। यथा लौकिकी रत्यादिरूपा चित्तवृत्तिः कवेर्नटस्य च व्यापारेण हृदयसंवादवतः सामाजिकान् प्रति रसत्वं नीयते तथा तत्त्वज्ञानजन्या निर्वेदनामिकाऽपि चित्तवृत्तिः। यथा तादृशी रत्यादिचित्तवृत्तिः शृङ्गारादिरस उच्यते तथैषाऽपि तत्त्वज्ञानेन जन्या चित्तवृत्तिः शान्तरसः । तत्त्वज्ञानेन जातोऽयं निर्वेदो वस्तुतो रत्यादीनां स्थायिनामपि स्थायी वर्तते। एष निर्वेदः सर्वेषां स्थायिनाम् उपमर्दको भवति। इदं **'तत्त्वज्ञानजश्च निर्वेदः स्थाय्यन्तरोपमर्दकः। भाववैचित्र्यसहिष्णुभ्यो रत्यादिभ्यो यः परमः स्थायिशीलः स एव हि स्थाय्यन्तराणाम् उपमर्दकः।'** इत्यभिनवभारत्यां स्पष्टम्। एवं कविनटव्यापारेण आस्वाद्यतां नियमानः तत्त्वज्ञानजो निर्वेदः शान्तरस उच्यत इति सिद्धम्।

तत्त्वज्ञानजो निर्वेदः शान्तरसस्य स्थायी भावो वर्तते।

चित्तवृत्तिर्जनक एव हि विभावः उच्यते।

तत्त्वज्ञानजस्य निर्वेदस्य स्थायिताया निराकरणं तत्त्वज्ञानस्य स्थायितायाः साधनं च- तत्त्वज्ञानेन जन्यो निर्वेदः शान्तस्य स्थायी भाव इति कथनं न समीचीनम्। एवं हि तत्त्वज्ञानस्यैव विभावता सिद्ध्यति, न तु निर्वेदपदवाच्यस्य वैराग्यस्य । चित्तवृत्तेर्जनक एव हि विभाव उच्यते। एवं तादृशनिर्वेदस्य कारणं यत् तत्त्वज्ञानं भवति तस्य कारणे तपःप्रभृतौ विभावपदेन व्यवहारो न संगच्छते। चित्तवृत्तेः कारणस्य कारणे विभावतायाः स्वीकारेऽतिप्रसङ्गो भवेत्। किञ्च 'ब्रह्मातिरिक्तं सर्वम् अनुपादेयम्' इति ज्ञानमेव निर्वेद उच्यते। स एवं वैराग्यपदेनापि कथ्यते। एतेन वैराग्यरूपेण निर्वेदेन तत्त्वज्ञानं जन्यते, तत्त्वज्ञानेन च मोक्षो भवतीति क्रमो वर्तते। एष क्रमो नास्ति यत् पूर्वं तत्त्वज्ञानं भवति, ततश्च वैराग्यरूपो निर्वेदो भवति ततश्च मोक्षो भवति। 'वैराग्यात् प्रकृतिलयः' इति सांख्यकारिकाऽपि तमेव क्रम प्रतिपादयति। वैराग्यात् तत्त्वज्ञानं भवति, न तु तत्वज्ञानाद् वैराग्यम्। एवं वैराग्यरूपस्य निर्वेदस्य तत्त्वज्ञानेन जन्यतायाः कथनं समीचीनं नास्ति।

प्रकृतिपुरुषविवेकेन गुणवैतृष्ण्यम्-दृढतरं वैराग्यं भवति।

निर्वेदस्य स्थायितायाः समर्थने कश्चिदेवं वदेद् यद् वैराग्यं द्विधा भवति-दृढम्, अदृढं च, तत्राद्यं न तत्त्वज्ञानजन्यम्, अपितु तपः प्रभृतिजन्यम्, द्वितीयं तु तत्त्वज्ञानेन जन्यं तदेव च निर्वेदपदेन वाच्यं शान्तस्य स्थायी भावो भवति, अस्य दृढतरस्य तत्त्वज्ञानेन जन्यस्य वैराग्यस्य सद्भावः 'तत्परं पुरुषख्यातेः गुणवैतृष्ण्यम्' **(1/16)** इति योगसूत्रेणापि सिद्ध्यति, प्रकृतिपुरुषविवेकेन गुणवैतृष्ण्यम्-दृढतरं वैराग्यं भवतीति तदर्थो वर्तते।

शान्तरसस्य स्थायिभावः तत्त्वज्ञानमेव स्वीकर्तव्यम्

किन्तु कस्यचिद् एतदपि कथनं समीचीनं नास्ति । यतस्तत्त्वज्ञानेन जातं दृढतरं वैराग्यं ज्ञानस्य परा काष्ठा विद्यते । 'वैराग्यं ज्ञानस्यैव पराकाष्ठा' इति तस्य योगसूत्रस्य व्यासभाष्ये प्रतिपादितम्। तत्त्वज्ञानमेव तत्त्वज्ञानमालया परिपोष्यमाणं सत् तादृशं सुदृढं वैराग्यं कथ्यते। अर्थात् तादृशं वैराग्यं परां काष्ठां प्राप्तं तत्त्वज्ञानमेव विद्यते, न तु तन्निर्वेद उच्यते। एवं निर्वेदस्य स्थायिता न संभवति। अतः शान्तरसस्य स्थायिभावः तत्त्वज्ञानमेव स्वीकर्तव्यम्। इदं सर्वत्र जगति अनुपादेयत्वस्य

ज्ञानरूपेण निर्वेदेन जन्यत इति तादृशस्य निर्वेदस्यैव विभावता वाच्या। व्यभिचारिनिरूपणे सम्यग्ज्ञानं यस्य निर्वेदस्य कारणमुच्यते स निर्वेदः खेदरूपो वर्तते। यथाऽस्मिन् पद्ये खेदरूपस्य निर्वेदस्य कारणं सम्यग्ज्ञानं वर्तते-

**वृथा दुग्धोऽनड्वान् स्तनभरनता गौरिति परं**
**परिष्वक्तः षण्डो युवतिरिति लावण्यरहितः।**
**कृता वैदूर्याशा विकचकिरणे काचशकले**
**मया मूढेन त्वां कृपणमगुणज्ञं प्रणमता ।।**

अत्र 'अगुणज्ञस्य कृपणस्य प्रभोः सेवनं निष्फलम्' इति सम्यग्ज्ञानं वक्तरि विद्यमानस्य खेदरूपस्य निर्वेदस्य कारणं वर्तते। अगुणज्ञं कृपणं सेवितवति वक्तरि खेदोऽत्र व्यज्यते। वक्तुर्याऽगुणज्ञे कृपणे 'अस्य सेवा सफला' इति भ्रमेण या प्रभावुपादेयता बुद्धिरासीत् तस्या निवर्तकम् 'एतादृशस्य प्रभोः सेवनं वृथा' इति यथार्थज्ञानं वर्तते । तादृशस्य प्रभोश्चिरं निष्फलं सेवनं कष्टं जातम्। एवमेतादृशं लौकिकं ज्ञानं व्यभिचारिणो निर्वेदस्य कारणं भवति। पुनः प्रश्नो भवति यद् गौतमेन न्यायदर्शने 'दुःखजन्म' इत्यादिसूत्रेण मिथ्याज्ञानस्य विध्वंसस्य कारणं तत्त्वज्ञानं तत्त्वज्ञानं च रागादिदोषापायरूपम्स्य वैराग्यस्य कारण कथितम्, ततो वैराग्यरूपस्य निर्वेदस्य कारण तत्त्वज्ञानं नास्तीति कथन गौतमस्य सिद्धान्तेन विरुद्धयति, अत्र किमुत्तरं स्यात् ? अत्रोत्तरं भवति यद् वैराग्यनिर्वेदद्योरैक्यमनेन न लभ्यते । निर्वेदो हि शोकप्रवाहरूपः चित्तवृत्तिविशेष उच्यते, वैराग्यं तु रागादीनां प्रध्वंसो भवति । गौतमवचनेन निर्वेदवैराग्ययोरैक्यं न लभ्यते। अतो विषयवासनारूपस्य मिथ्याज्ञानस्य निवर्तकं तत्त्वज्ञानं भवतु नाम वैराग्यस्य कारणम्। इदमभीष्टमेव। किन्तु तत्त्वज्ञानं निर्वेदस्य कारणं भवितुं नार्हति, अपितु निर्वेदादेव तत्त्वज्ञानं जायते। अतो न विरोधः ।

अगुणज्ञस्य कृपणस्य प्रभोः सेवनं निष्फलम्

अथवा भवतु नाम वैराग्यमेव निर्वेदः। एवं सत्यपि वैराग्यरूपो निर्वेदः शान्तस्य स्थायी भवितुं नार्हति। यः स्रजि सूत्रवद् अनुवर्ततं स एव स्थायी भवतीति पूर्वमुक्तम् । स्वकारणवशेन जनितं वैराग्यं सूत्रवद् मोक्षे नानुवर्तते। किञ्च 'तत्त्वज्ञानजनितो निर्वेदः शान्तस्य स्थायी भावः' इति यदुच्यते

यन्निर्वेदः शान्तस्य स्थायिभावो नास्ति, अपितु तत्त्वज्ञानरूपः शम एव।

तत्र निर्वेदशब्देन शम एव गृह्यते, न त्वनुपादेयताया ज्ञानरूपो निर्वेदः। यच्च पूर्व शमशान्तयोः पर्यायत्वं कथितं तदपि समीचीनं नास्ति, यतोऽसाधारणो लौकिकः सिद्धश्च शमः स्थायी भावः, साधारणोऽलौकिकः साध्यश्च शमः शान्तरस उच्यते। एष नियमोऽन्यत्रापि रसेषु स्वीकृतः। असाधारणो लौकिको वासनारूपेण सिद्धश्च रत्यादिर्हि स्थायी भाव उच्यते, कविनटव्यापारस्य माहात्म्येन साध्यः साधारणोऽलौकिकस्तु रत्यादिः शृङ्गारादिरस उच्यते। हासहास्ययो भेदस्य प्रसङ्गे स्थायिरसयोभेदस्य सिद्धान्तोऽयं सूचित एव । इदं **'किञ्च तत्त्वज्ञानोत्थितो निर्वेद इति शमस्यैव निर्वेद इति नाम कृतं स्यात्। शमशान्तयोः पर्यायत्वं तु हासहास्याभ्यां व्याख्यातम्। सिद्धसाध्यते तथा। लौकिकालौकिकत्वेन साधरणासाधारणत्वेन च वैलक्षण्यं शमशान्तयोरपि सिद्धमेव'** इत्यभिनवभारतीवचनेन स्पष्टम्। एवं सिद्धयति यन्निर्वेदः शान्तस्य स्थायी भावो नास्ति, अपितु तत्त्वज्ञानरूपः शम एव।

स्वात्मविषया रतिरेव शान्तस्य स्थायिभावः अन्ये मन्यन्ते

स्वात्मविषया रतिरेव शान्तस्य स्थायी भावः अन्ये मन्यन्ते यत् स्वात्मविषया रतिरेव शान्तस्य स्थायी भावो वर्तते। एषेव मोक्षस्य साधिका भवति। भरतेन रत्यादयोऽष्टौ स्थायिन उक्ताः। तेषु रतिरेवात्मविषया शान्तस्य स्थायी भाव इति मुनेरभिप्रायो वर्तते। यः समस्तं जगद् अनित्यत्वेन शोच्यं पश्यति, सांसारिकं वृत्तान्तं सातिशयं मोहप्रधानम् अपकारिणं च मन्यते, वीर्येण सम्पन्नो भवति, सर्वस्माद् बाह्याद् विषयाद् बिभेति, सर्वेषां प्रियादपि प्रमदादेर्जुगुप्सते, निरतिशयात्मलाभेन विस्मयते च तस्यैव मोक्षो भवति। आत्मरतेमोक्षहेतुत्वं भगवता श्रीमद्भगवद्गीतायां ध्वनितम्-

**यश्चात्मरतिरेव स्याद् आत्मतृप्तश्च मानवः ।**
**आत्मन्येव च संतुष्टः तस्य कार्यं न विद्यते ॥**

**आत्मरतेः स्थायिताया निराकरणम्-**

रत्यादिष्वन्यतमाया आत्मविषयाया रतेः शान्ते स्थायिता मुनेः सम्मता नास्ति । रत्यादीनां विभावस्य निरूपणे मुनिना 'आदि'

इति शब्दः प्रयुज्यते । यथा 'ऋतुमाल्यानुलेपन. .....लीलादिभिर्विभावैः' इत्यत्र। रत्यादीनां विभावनिर्देशे प्रयुक्तेनादिदेन भरतः तत्प्रकाराणां लौकिकानाम् अलौकिकानां च सर्वेषां पदार्थानां संग्रहं विधाय तेषु रत्यादिविभावतां स्वीकरोति । एवं सर्वेषां पदार्थानाम् अपवर्गविषयता मुनेरभिमता। तर्हि आत्मविषया रतिरेव शान्तस्य स्थायिनीतिस्वीकारे विनिगमना नास्ति । आत्मविषय उत्साहोऽपि हि स्थायित्वेन वक्तुं शक्यते। रत्यादिषु कस्यचनैकस्यैव स्थायित्वमिति स्वीकारेऽन्यस्य स्थायित्वं त्यक्तं भवेत्। अतः तादृश्या रतेरेव शान्तस्य स्थायिभावत्वे बीजं नास्ति। इदमपि वक्तुं न शक्यते यद् रतेः प्रतिपुरुषं भेदेनैकस्यैव शृङ्गारस्याऽनन्तो भेदो भवेद्, अतो मोक्षरूपेणैकेनैव फलेन सम्बन्धस्य कल्पनया रसस्यैकत्वं स्वीकरणीयम्, आत्मविषयाया रतेः शान्तस्य प्रमदादिविषयायाः शृङ्गारस्य च विभावता स्वीकार्या, एवं हि स्वीकारे क्षयरूपेणैकेनैव फलेन सम्बन्धाद् वीररौद्रयोरप्येकत्वं स्वीकरणीयं स्यात्, न त्वेतदभीष्टम्। तस्माद् आत्मविषया रतिः शान्तस्य स्थायिनीति वक्तुं न शक्यते।

आत्मविषया रतिः शान्तस्य स्थायिनीति वक्तुं न शक्यते।

**शमरूपं तत्त्वज्ञानमेव स्थायीति सिद्धान्तपक्षः-**

एवमभिनवभारत्यां शान्तस्य स्थायिभावविषये 'शमः, तत्त्वज्ञानजो निर्वेदः, तत्त्वज्ञानम्, आत्मज्ञानम्, आत्मरतिः, अभिन्ना रत्यादयः' इति षड् मतानि चर्चितानि। तत्र कस्य सिद्धान्तरूपेण स्थायिता स्वीकार्येत्यग्रे चर्चितम्। तदाधारेण वक्तुं शक्यते यद् आत्मैव स्थायी भावो वर्तते। '**कस्तर्ह्यत्र स्थायि? उच्यते, तत्त्वज्ञानमेव तावन्मोक्षसाधनमिति तस्यैव मोक्षे स्थायिता युक्ता। तत्त्वज्ञानं च नामात्मज्ञानमेव। आत्मनश्चाव्यतिरिक्तं स्यादस्यैव ज्ञानम्। परो ह्येवमात्मा अनात्मैव स्यात्।**' इत्यभिनवभारत्या स्पष्टं यद् आत्मैव स्थायी भवति । तत्त्वशब्देन तत्त्वज्ञानशब्देन आत्मज्ञानशब्देन चात्मोच्यते। आत्मनो ज्ञानमात्मनो भिन्नं न भवति। विशुद्ध ज्ञानमात्मनः स्वरूपभूतमस्ति। एवं विशुद्ध आनन्दोऽपीति '**तेनात्मैव ज्ञानानन्दादिविशुद्धधर्मयोगी परिकल्पितविषयो-**

आत्मैव स्थायी भवति।

**परागरहितोऽत्र स्थायी।'** इति वचनेन लभ्यते। अत्र प्रश्नो भवितुमर्हति यद् यदि आत्मा स्थायी वर्तते तर्हि तस्य स्थायिता कथं नोक्ता भरतेन। अस्योत्तरं वर्तते यदात्मैव रत्यादीनां चित्तवृत्तीनामाश्रयो विद्यते। आत्मभित्तावेव रत्यादयः स्वस्वकारणवशेन प्रादुर्भवन्ति तिरोभवन्ति च। तत्त्वज्ञानपदेन वाच्य आत्मा रत्यादीनां स्थायिनामपि आश्रयभूतत्वेन स्थायितमो वर्तते। रत्यादीनामाश्रयतयाऽऽत्मा स्वयं सिद्धो वर्तते। अतः सिद्धस्य तस्य कथनं नापेक्षितमिति भरतेनात्मनः स्थायिता पृथङ् नोक्ता। रत्यादय आत्मनोऽपेक्षया व्यभिचारिण एव सन्ति। तन्मध्ये नित्यस्थायिन आत्मनो गणनं खण्डमुण्डयोर्मध्ये गोत्वस्येव महिषेषु गोरिव च गणनमत्यन्तमनुचितं स्यात्। अत एव तत्त्वज्ञानपदेन वाच्यस्यात्मनः स्थायित्वेन पृथक् कथनं न कृतम्। अतः 'एकोनपञ्चाशदेव भावाः' इति सिद्धान्तस्य हानिर्न भवति। एषां समेषां भावानामाश्रयभूतो य आत्मा स एवैवं शान्तस्य स्थायी भवति। आत्मन आस्वादो रत्यादेरास्वादाद् भिन्नो विद्यते। रत्यादीनामास्वादः परस्परसम्बद्धत्वेन न भवति, न हि रतेरास्वादे जुगुप्सादीनां सम्बन्धो भासते। आत्मा तु समाधेव्युत्थानावसरे रत्यादिभिः कलुषं भाति। रत्यादीनां प्रतीतावप्रतीती वा सर्वत्रात्मस्वरूपमनुस्यूतं भवति। एवमात्मनः कदाचिदपि व्यभिचारित्वं न संभवतीति व्यभिचारिणां रत्यादीनाम् एकोनपञ्चाशतो भावानां मध्ये नित्वस्थायिनो निरूपणं मुनिना न कृतम्। व्यभिचारिणो वैचित्र्यमावहन्ति, न त्वात्मा वैचित्र्यावहः। अस्य व्युत्थानेऽपि प्रशान्तवाहिता भवतीति 'तस्य प्रशान्तवाहिता संस्कारात्' इति योगसूत्रेणापि प्रतिपादितम्। चित्तेन व्युत्थानसंस्कारस्य मलरहितनिरोधसंस्कारस्य च वहनमेव प्रशान्तवाहिता वर्तत इति योगसूत्रस्य तत्त्ववैशारद्यां टीकायां स्पष्टम्। एष एवात्मा मुनिना शमशब्देनोक्तः । इदं 'तदिमात्मस्वरूपमेव तत्त्वज्ञानं शमता (मः) च। (तथा च) यत्कालुष्योपरागविशेषा एवात्मनो रत्यादयः । तदनुगमेऽपि रूपव्यवधानसमाधिबलाद् अधिशय्य व्युत्थानेऽपि प्रशान्तता भवति' इत्याद्यभिनवभारतीवचनेन स्पष्टं वर्तते। यदि स एव निर्वेदशब्देनोच्यते तदा न कश्चन विरोधः। अन्यो निर्वेदस्तु दारिद्र्यादिजन्यो व्यभिचारिरूप एव। एवं

मुनिना यः शमपेदन तत्त्वज्ञानमात्मा वा शान्तस्य स्थायिभाव उक्तस्तत्र न कश्च विरोधः । शमपदेनात्मनो ग्रहणान्न 'एकान्नपञ्चाशद् भावाः' इति सिद्धान्तस्य न हानिः।

**शान्तस्य विभावादीनां निर्देशः-**

एवं शान्तस्य स्थायी शमादिपदवाच्य आत्मेत्यभिनवभारत्यां निर्णीतम्। इदानीं विभावादय उच्यन्ते अस्य विभावा वैराग्यम्, संसाराद् भयम्, ईश्वरप्रणिधानादयश्च, लौकिकाः,असाधारणा अलौकिकाः असाधारणाश्च सर्वे रत्यादयः स्थायिनोऽन्ये निर्वेदादयश्च व्यभिचारिणः, अनुभावाश्च यमनियमादि-भिरुपकृता रत्यादीनां त एवानुभावाः सन्ति। शान्ते प्रकर्षेण क्षीणा एव रत्यादय आस्वाद्यन्ते । यथा शृङ्गारादौ औत्सुक्यादयः प्रधान्येन भासन्ते तथा रागस्य विरोधिनि बीभत्से न, अपित्वभावमुखेनेति प्रसिद्ध विद्यते । एवमेव रत्यादयोऽन्ये व्यभिचारिणश्च शान्ते प्राधान्येन न भासन्ते, अपित्वभावस्य विशेषणत्वेनैव, अर्थादितेऽभावमुखेन भासन्ते। यथा महाव्रते क्रतौ नरकपालादीनां धारणं घृताञ्जनेन देवरात् पुत्रजननं चाऽगत्या करणीयत्वेन धर्मेऽन्यत्र निषेधरूपेणैव भासते तथा शान्ते रत्यादिरपि।

शान्तरस्यान्तरङ्गो व्यभिचारी भावः य आत्मनि कृतकृत्यो भवति तस्य तत्त्वज्ञस्य लोकानुग्रहायैवोद्यमो भवतीति परोपकारे लोकानुग्रहे वोत्साहः शान्तस्यान्तरङ्गो व्यभिचारी भावो वर्तते। अयमुत्साहः परोपकारस्येच्छया जन्यो यो प्रयत्नस्तद्रूपो भवति। अयमेव दयावीरोऽपि कथ्यते। दयाया अन्तरङ्गत्वेन केचन शान्तं दयावीरशब्देनापि व्यपदिशन्ति। अन्ये तु शान्तं धर्मवीरं वदन्ति । यद्यपि उत्साहस्थायिके वीरेऽहंकारः प्राणरूपो भवति, शान्ते तु तस्य प्रक्षय इति शान्ते कथमुत्साहोऽन्तरङ्ग इति प्रश्नो भवति तथापि तस्योत्तरं वर्तते यद् विरोधिनोऽपि रसस्य भावा रसान्तरे भवन्तीति सिद्धान्तो वर्तते। यथा रतिविरुद्धोऽपि निर्वेदः कदाचन श्रृङ्गारे भवति । एवमेव वीरविरुद्धेऽपि शान्तेऽहङ्कारविशिष्ट उत्साहः संभवति। किञ्च शान्ते क्वचनोत्साहस्यैव प्रकर्षो लभ्यते। यथा हर्षरचितस्य नागानन्दनाटकस्य-

रतिविरुद्धेऽपि निर्वेदः कदाचन शृङ्गारे भवति।

**'शम्या शाद्वलमासनं शुचि शिला सद्म द्रुमाणामधः**
**शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः।**
**इत्यप्रार्थितसर्वलभ्यविभवे दोषोऽयमेको वने**
**दुष्प्रापार्थिनि यत् परार्थघटनावन्ध्यैर्वृथा स्थीयते ।।'**

इति श्लोक तत्त्वज्ञस्य जीमूतवाहनस्य परोपकारे उत्साह एव प्रकर्षणास्वाद्यते। जीवतः प्राणिनः कदाचनापि उत्साहहीनाऽवस्था न भवति। उत्साहहीनो हि पाषाणतुल्यः मृतो भवति। ये तत्त्वज्ञानिनः कृतकृत्या भवन्ति तेषां सर्वमपि शरीरदानादिरूपमपि कार्यं परार्थं भवति। यत्तु **'आत्मानं गोपायेत्'** इत्यादिना गौतमसूत्रादौ सर्वतः शरीररक्षणं प्रतिपाद्यते तद् देहाभिमानिनाम् अकृतकृत्यानाम् अज्ञानिनां कृते वर्तते। किन्तु ये तत्त्वज्ञानिनः संन्यासिनो भवन्ति तेषां कृते तन्नास्ति। तादृशैः स्मृतिवचनैः,

**'धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः ।**
**तान् निघ्नता किन्न हतं रक्षता किं न रक्षितम्॥'**

इत्यादिवचनैश्च शरीररक्षायाः पुरुषार्थहेतुत्वमतत्त्वज्ञं प्रति प्रतिपाद्यते। संन्यासिनां कृते तु यथाशक्ति परोपकारः 'जलेऽग्नौ श्वभ्रे वा पतेत्' इत्यादिना शरीरत्यागोऽनुमन्यते। अतत्त्वज्ञो धर्मादिफलस्यानुसंधानं विना परोपकाराय शरीरं त्यक्तुं न प्रभवति। स भृगुपतनेन यदि शरीरं त्यजति तदा तत्राऽपि तस्य शुभतरदेहस्य प्राप्तेः कामना भवत्येव। तत्त्वज्ञस्य तु देहत्यागपर्यन्तं यद् यदपि कर्म परोपकाराय भवति तत् तत् सर्व फलानुसंधानं विनैव भवति। अत एव तत्त्वज्ञविषये 'ज्ञानिनां सर्वेष्वाश्रमेषु मुक्तिः' इति, 'देवार्चनरतः तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
श्राद्धं कृत्वा ददद् द्रव्यं गृहस्थोऽपि हि मुच्यते।' इति चोक्तम् । तत्त्वज्ञस्य विश्रान्तिलाभ एव स्वभावो भवति। एवं शान्ते दयारूप उत्साहो व्यभिचारिषु प्राधान्येन भवति। केषाञ्चन मते यथायोगं सर्वेऽपि व्यभिचारिणः शान्ते भवन्ति। अत एव **'तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः'** इति योगसूत्रे कथितम्। अतश्चेष्टारहितत्वेन शान्तेऽनुभावा न भवितुमर्हन्तीति कथनं

समीचीनं न वर्तते। ये तत्त्वज्ञानस्य बीजानाम् कारणं मोक्षशास्त्रादीनां संस्कारेण भाविता भवन्ति तेषां हृदयसंवादोऽत्र भवत्येव।

शान्तो रसानां प्रकृतिः तस्य सद्भावे प्रमाणान्तरं च-

शान्तो रसानां प्रकृतिः तस्य सद्भावे प्रमाणान्तरं च।

शान्तः समेषां रसानां प्रकृतिर्वर्तते, अन्ये रसास्त्वस्य विकृतयः। रत्यादिवासनाभिरुपहितः शमपदवाच्य आत्मैव सर्वत्र रसेष्वाद्यते। इदं "तस्मादस्ति शान्तो रसः। तथा च चिरन्तनपुस्तकेषु **'स्थायिभावान् रसत्वमुपनेष्यामः'** इत्यनन्तरं **'शान्तो नाम शमस्थायिभावात्मकः'** इत्यादि शान्तलक्षणं पठ्यते। सर्वेषां रसानां शान्तप्राय एवास्वादः........ तन्मुख्यतालाभात् वासनान्तरोपहित इत्यस्य सर्वप्रकृतित्वाभिधानाय पूर्वमभिधानम्" इत्यभिनवभारत्या वचनेन स्पष्टम्। 'स्वं स्वं निमित्तमासाद्य' इत्यादिरूपः संग्रहश्लोकोऽपि शान्तस्य रसानां प्रकृतित्वं प्रतिपादयति । इतिहासे पुराणे कोशे चापि शान्तस्योल्लेखोऽस्य रसस्य सद्भावे प्रमाणान्तरं वर्तते। अत एव- 'अष्टानामिह देवानां शृङ्गारादीन् प्रदर्शयेत्। मध्ये च देवदेवस्य शान्तं रूपं प्रकल्पयेत्।।' इत्यभिहितम्।

साधारण्येन प्रतीयमानं शमपदवाच्यमात्मस्वरूपं शान्तरसश्चोच्यते।

**शान्तरसस्यास्वादः** - उपरञ्जकैः रत्युत्साहादिभिरुपरक्तं विरलरत्ने हारे मध्ये श्वेतरं रत्नरागेणोपरक्तं सूत्रमिव भासमानं यदात्मतत्त्वं वर्तते तदेव काव्यनाट्याभ्यां साधारण्येन प्रतीयमानम् आत्मस्वरूपमेवाऽत्र आस्वाद्यं भवति । परन्तु संवित्स्वरूपं तत् परोन्मुखतारूपेण दुःखजालेन रहितमवभासते। इदम् 'तत्त्वास्वादोऽस्य कीदृशः? उच्यते- उपरागदायिभिः उत्साहरत्यादिभिः उपरक्तं यद् आत्मस्वरूपं तदेव विरलोम्भितरत्नान्तरालनिर्भासमानसिततरसूत्रवद् आभात-स्वरूपं सकलेषु रत्यादिषु उपरञ्जकेषु तथाभावेनापि सकृद् विभातोऽयमात्मेति न्यायेन भासमानं परोन्मुख-तात्मकसकलदुःखजालहीनं परमानन्दलाभसंविदेकत्वेन काव्यप्रयोगप्रबन्धाभ्यां साधारणतया निर्भासमानम् अन्तर्मुखावस्थाभेदेन लोकोत्तरानन्दायनं तथाविधहृदयं विधत्ते' इत्यभिनवभारत्यां स्पष्टम्।

एवमिह भवद्भिः वीर-भयानक बीभत्साऽद्भुत शान्तरसानां विषये ज्ञातम् । साधारण्येन प्रतीयमान उत्साहो वीररसः, साधारण्येन प्रतीयमानं भयं भयानकरसः, साधारण्येन प्रतीयमाना जुगुप्सा वीभत्सरसः, साधारण्येन प्रतीयमानो विस्मयोऽद्भुतरसः, साधारण्येन प्रतीयमानं शमपदवाच्यमात्मस्वरूपं शान्तरसश्चोच्यते। एवमेषां रसानां विभावादयोऽपि विचारिताः। विशेषेणाऽत्र स्थायिभावादिविषयेऽभिनवभारतीम् आश्रित्य विचारितम्।

## Summarised Overview

एवमिह भवद्भिः वीर-भयानक बीभत्साऽद्भुत शान्तरसानां विषये ज्ञातम् । साधारण्येन प्रतीयमान उत्साहो वीररसः, साधारण्येन प्रतीयमानं भयं भयानकरसः, साधारण्येन प्रतीयमाना जुगुप्सा वीभत्सरसः, साधारण्येन प्रतीयमानो विस्मयोऽद्भुतरसः, साधारण्येन प्रतीयमानं शमपदवाच्यमात्मस्वरूपं शान्तरसश्चोच्यते। एवमेषां रसानां विभावादयोऽपि विचारिताः।

## Assignments

1.नाट्यशास्त्रानुसारं शान्तस्य रसत्वं समर्थयत।
2.शान्तरसस्य स्थापना अभिनवभारत्यानुसारं निरूपयत।
3.शमरूपं तत्त्वज्ञानमेव शान्तरसस्य स्थायीति सिद्धान्तपक्षं स्थापयत।
4.शान्तस्य विभवादीन् विशदयत।

# Suggested Readings

1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

# References

1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith.The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice, Motilal Banarasidas Publishers, Delhi.1924

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# रससिद्धान्तनिरूपणम्

## BLOCK 4

SGOU

# UNIT 1

# लोल्लटस्य उत्पत्तिवादः तथा श्रीशङ्कुकस्य अनुमितिवादः

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

रसनिष्पत्तिविषयकं सर्वप्रथममुल्लेखं भरतमुनिना नाट्यशास्त्रे कृतम् । तदेव सर्वरससिद्धान्तानामाधारभित्तिः। भरतस्य रससूत्रस्य व्याख्यायामुत्तराचार्यैः स्वशक्त्याः प्रयोगं कृतम् । परिणामतः उत्पत्तिवादस्य अनुमितिवादस्य भुक्तिवादस्य अभिव्यक्तिवादस्य सिद्धान्तचतुष्टस्य विकासः जातये। "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति भरतस्य सूत्रम्। अत्र प्रयुक्तस्य निष्पत्तिशब्दस्य अर्थचतुष्टम् विद्यते- भट्टलोल्लटमतेन निष्पत्तिशब्दस्यार्थः उत्पत्तिः शंकुकमतेन अनुमितिः भट्टनायकमतेन भुक्तिः अभिनवगुप्तानुसारं अभिव्यक्तिश्च ।

भरतमुनेः "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" सूत्रस्य व्याख्या तट्टीकाकारैः कृता। एतेषु भट्टलोल्लटः शङ्कुकः भट्टनायकः अभिनवगुप्तश्च प्रमुखः व्याख्याकारः ।

## Keywords

रससूत्रं, निमित्तं, लोल्लटः, उत्पत्तिवादः, स्थायिभावो रसः, निराकरणम्, श्रीशङ्कुकस्य अनुमितिवादः, सादृश्यज्ञानम्।

## Discussion

### रससूत्रम्

सूत्रमिदं 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इति। अत्र निष्पत्तिसंयोगशब्दौ गृहीत्वा चतुर्षु व्याख्यातृषु मतभेदो दृश्यते। विभावानुभावव्यभिचारिशब्दानाम् अर्था भरतेन नाट्यशास्त्रे स्वयं प्रतिपादिताः। तत्र 'विभावः परदर्शनम्' इति पञ्चविंशेऽध्याये विभावस्य स्वरूपमुक्तम्। अनेन प्रतिपादितं यत् रत्यादिरूपस्य सुखादेर्जनकम् आत्मनो भिन्नस्य वस्तुनो ज्ञानं वर्तते तदेव विभाव उच्यते। तस्य ज्ञानस्य जनको विषयभूतो नायकादिरपि विभाव इति वक्तुं शक्यते। सप्तमाध्याये विभावपदार्थः 'विभावो विज्ञानार्थः। विभावः कारणं निमित्तं हेतुरिति पर्यायाः। विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इति विभावः' इत्यभिहितः। वाचिका रोमाञ्चादयः सात्त्विकाश्चाभिनया येन विशेषरूपेण भाव्यन्ते बोध्यन्ते स नायकादिर्विभाव उच्यते। रोमाञ्चो रत्याऽपि भवति भयेनापि च। तत्र यदि नायको नायिका वा भवति तदा रोमाञ्चो रतिजन्यः, यदा तु व्याघ्रो भवति तदा भयजन्य इति विशेषरूपेण निश्चयो नायकव्याघ्रादिविभावेनैव कर्तुं शक्यते। अतो नायकादिर्विभाव उच्यते। रत्यादेः कारणं नायकादिर्भवतीति स्थायिभावस्य कारणमनभावस्य विशेषरूपेण निश्चायकश्च नायकादिर्विभाव उच्यते। रत्यादेर्भावस्य कटाक्षादिरूपस्य कार्यस्य ज्ञानं रत्यादेरनुभवस्य कारणत्वेनाऽनुभाव उच्यते, अनेन हि विभावजन्योऽर्थो ज्ञाप्यत इति 'विभावेनाहृतं कार्यमनुभावेन नीयते' इति वचनेन सूचितम्। एवं तादृशज्ञानस्य विषयो

विभावः कारणं निमित्तं हेतुरिति पर्यायाः।

रत्यादिकार्यमपि अनुभाव उच्यते। रत्यादिभावानामनुभवस्य कारणत्वेनानुभाव इति सार्थकं नाम वर्तते। आत्मनि विश्रान्ता रत्यादिलक्षणसुखदुःखरूपा संवित् (ज्ञानम्) भाव उच्यत इति आत्मानुभवनं भावः' इति वचनेन भरतेन सूचितम्। पञ्चविंशेऽध्याये विभावादिविषयेऽभिनवभारत्याम् 'आत्मविश्रान्तं यदनुभवनं सुखदुःखसंविद्रूपं स भाव इत्यर्थः, आत्मगहणाद् घटाद्यनुभवनं न भाव इत्युक्तं भवति।... यत्तु व्यतिरिक्तवस्तुज्ञानं तत् सर्व सुखादिजनकत्वाद् विभावः।' इति सूचितम्। एकोनपञ्चाशति भावेषु वर्तमानाः त्रयस्त्रिंशद् निर्वेदादयो व्यभिचारिण उच्यन्ते, यत एते स्थायिभावम् अभितो विशेषेण चरन्ति । सप्तमेऽध्याये भावविभावीदीनां स्वरूपमेवमुक्तम्-

'विभावेनाहृतो योऽर्थस्त्वनुभावेन गम्यते।
वागङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः ॥
बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रिताः।
अनेन यस्मात्तेनायं विभाव इति संज्ञितः ।।
वागङ्गाभिनयेनेह यतस्त्वर्थोऽनुभाव्यते ।
वागङ्गोपाङ्गसंयुक्तः सोऽनुभावस्ततः स्मृतः ॥

विविधमभिमुखेन रसेषु चरन्तीति व्यभिचारिणः।अनेन निष्कर्षतो वक्तुं शक्यते यल्लोके रत्यादिभावस्य कारणं नायकादि, कार्यं कटाक्षादि, सहकारि लज्जादि भवति तदेव काव्ये नाट्ये च प्रकाश्यमानं क्रमेण विभावः,अनुभावः, व्यभिचारी च कथ्यते। भट्टलोल्लटादीनां मतं तु कारण-कार्य-सहकारीण्येव विभावानुभावव्यभिचारिशब्दानाम् अर्थाः सन्तीति प्रतिभाति, किन्तु तेषां पक्षो न सिद्धान्तः। एतेषां विभावानुभावव्यभिचारिणां रत्यादिस्थायिभावेन सह संयोगेन शृङ्गारादिरसस्य निष्पत्तिस्तथा भवति यथा गुडादिभिः चिञ्चादिभिर्गोधूमचूर्णाजलादिभिश्च परस्परसंयोगेन लोके षाडवनामकस्य रसस्य निष्पत्तिर्भवति । भरतकृतस्य रससूत्रस्यायमेव विवक्षितोऽर्थः।

भरतेन उक्तं रससूत्रस्य अर्थः

### रससूत्रस्य व्याख्यानानि

अस्य रससूत्रस्य भट्टलोल्लटादिभिः कृतानि व्याख्यानानि सन्ति।

**लोल्लटस्य उत्पत्तिवादः**

रससूत्रे विभावपदेन रत्यादेः स्थायिभावस्योत्पत्तेः कारणं नायिकादि गृह्यते। अनुभावशब्देनोत्पन्नस्य स्थायिभावस्य कार्यभूताः सात्त्विकादयो भावा गृह्यन्ते । अनुभावशब्देनात्र सूत्रे विभावाद्युपचितस्थायिभावरूपस्य रसस्य कार्यभूता भावाः कटाक्षादयो वा न ग्रहीतुं शक्यन्ते, यतो रसकार्याणां तेषां रसकारणेषु गणनं संगतं नास्ति। न हि रसस्य कार्यं रसस्य कारणं भवितुमर्हति । अतोऽनुपचितस्यैव स्थायिनः कार्यभूता भावा अत्र सूत्रेऽनुभावशब्देन ग्राह्याः। अतएव 'अनुभावाश्च न रसजन्या अत्र विवक्षिताः। तेषां रसकारणत्वेन गणनानर्हत्वात्। अपितु भावानामेव' इत्यभिनवभारती प्राह। एवं व्यभिचारिशब्देन रत्यादेः सहकारिणो लज्जादयो गृह्यन्ते।

न हि रसस्य कार्यं रसस्य कारणं भवितुमर्हति ।

एतेषां विभावादीनां स्थायिभावेन सह संयोगो भवति। एवं विभावादिसंयोगेन उपचितः परिपोषं बहुलत्वं प्राप्तः स्थायिभावो रसो भवति । यथा गुडचिञ्चागोधूमचूर्णजलादिसंयोगेन षाडवरसस्य निष्पत्तिर्भवति तथा विभावादीनां स्थायिनां संयोगेन रसस्य निष्पत्तिर्भवति । एवं सूत्रस्थस्य निष्पत्तिपदस्यार्थ उपचयः बहुली भवनं वर्तते। कस्योपचितः स्थायी रस इति प्रश्ने लोल्लटस्योत्तरमिदं वर्तते अनुकार्यस्य रामादेः। अनुकार्ये रामादौ संस्काररूपेण वर्तमानः सीतादिविभावरूपकारणेन जनितः, अनुभावपदवाच्येन कार्येण सात्त्विकभावेन औत्सुक्यादिना व्यभिचारिपदवाच्येन सहकारिणा चातिशयेनोपचयं प्रापितो रत्यादिस्थायी भावः शृङ्गारादिरस उच्यते। एवं विभावादिभिरुपचितोऽनुकार्यस्य रत्यादिभावो रसशब्दस्य मुख्यार्थो वर्तते। उपचयो नाम संस्कारात्मना सूक्ष्मरूपेण विद्यमानस्य रत्यादेः जननादिना स्थूलता वर्तते। रसशब्दो मुख्यया वृत्त्याऽभिधया तमेवोपचितं रत्यादिभावं बोधयति। रामादीनाम् अनुकार्याणाम् अनुकर्तरि नटेऽपि प्रतीयमानः स उपचितः स्थायी रसपदेन वक्तुं शक्यते, किन्तु स आरोपितत्वेन रसपदस्य लक्ष्यार्थः। एवम् अनुकार्याश्रयत्वेन प्रतीयमान उपचितः स्थायी रसपदस्य मुख्यार्थः, अनुकर्तृगतत्वेन प्रतीयमानो लक्ष्यार्थश्च वर्तते । नटे

विभावादिसंयोगेन उपचितः परिपोषं बहुलत्वं प्राप्तः स्थायिभावो रसो भवति।

यथा रामत्वमारोपितं तथा रामगतः स उपचितः स्थायी भावोऽपि। 'नटो रामः' इति प्रतीत्या रूपकालङ्कारयोगेन नाट्यस्य रूपकमिति संज्ञा भवतीति काव्यप्रकाशस्य विवरणेऽपि स्पष्टं विद्यते ।

यद्यप्यनुभावा लज्जादयो व्यभिचारिणश्च चित्तवृत्तिरूपत्वेन स्थायिना सह भवितुं नार्हन्ति, अतः स्थायिना सहकारित्वं न संभवति, तथापीह तेषां वासनारूपेण सदा वर्तमानस्य स्थायिनः सहकारित्वं तेनोपचयश्च विवक्षितम्। यथा दृष्टान्ते षाडवरसे कस्यचित् सुगन्धिकर्पूरादिपदार्थस्य वासनात्मतया जलादेश्चोद्भूततया स्थितिर्भवति तथाऽत्रापि स्थायिनो वासनारूपेण व्यभिचारिणश्चोद्भूततया स्थितिर्भवति। अनुकार्ये रामादौ वासनारूपेण वर्तमानस्य रत्यादिस्थायिनो सीतादिविभावेन जननम् अनुभावेन व्यभिचारिणा पोषणं चोपचयो वर्तते। उपचयरहितो रत्यादिस्तु स्थायी भाव उच्यते, न तु रसः। अत एव **'तेन स्थाय्येव विभावादिभिरुपचितो रसः। स्थायी भवत्वनुपचितः।'** इत्यभिनवभारती वदति । एवं भट्टलोल्लटस्य मते सूत्रस्थस्य विभावादिपदस्य कारणादिः, संयोगपदस्य मिश्रणम्, उपचाय्योपचायकभावो (पोष्यपोषकभावो) वा, निष्पत्तिपदस्य चोपचयः पुष्टिर्वार्थः।

तेन स्थाय्येव विभावादिभिरुपचितो रसः। स्थायी भवत्वनुपचितः।

एवं भट्टलोल्लटमतेन रामादेरनुकार्यस्य विभावादिभिरुपचितोऽनुकार्यरूपस्यानुसंधानेन नटेऽपि प्रतीयमानः स्थायी भावो रस उच्यते। अयमेव भरतरससूत्रस्यार्थः । भट्टलोल्लटसम्मतमेव रसस्वरूपं चिरन्तनैर्दण्डिप्रभृतिभिः स्वीकृतम्। अत एव काव्यादर्शे दण्डिना **'रतिः शृङ्गारतां गता। रूपबाहुल्ययोगेन।'** इत्यत्र रूपबाहुल्ययोगेन विभावादिभिरुपचयस्य योगेनोपचितस्य रतिभावस्य शृङ्गाररसत्वम्, **'अधिरुह्य परां कोटिं कोपो रौद्रात्मतां गतः'** इत्यत्र च परां कोटिम्-विभावादिभिरुपचयं प्राप्तस्य क्रोधस्थायिभावस्य रौद्ररसत्वं च प्रतिपादितम्। एवमुपचितः स्थायी भावो रस इति दण्डिप्रभृतीनामपि सम्मतम्।

स्थायी भावो रसः।

**भट्टलोल्लटमतस्य निराकरणम्-** भट्लोल्लटेन विभावादिभिरुपचितः स्थायी भावो रस उच्यते। एवं विभावादयः स्थायिन उपचयस्य हेतुत्वेन स्वीकृता भवन्ति, न तु बोधस्य कारणत्वेन। तेन सामाजिकार्ता रसप्रतीतिर्न संभवति। रसस्य प्रतीतये विभावदीनां लिङ्गत्वम् धूमादिवदग्नेः साधनत्वं स्वीकार्यम्। लिङ्गत्वस्यास्वीकारे रसस्यावगतिर्न सिद्धयतीति प्रथमो दोषः। रत्यादिभावानां पूर्वत एव स्थितेः स्वीकारे गवादिसिद्धपदार्थवद्अभिधेयतायाः प्रसङ्गः स्यात्, न च भायाः केनचित् पदेनाऽभिधीयन्त इति द्वितीयो दोषः।किञ्च भावानां सिद्धत्वे मुनिना लक्षणकरणं व्यर्थ भवेदिति तृतीया 'दोषः। रत्यादीनां विभावादिभिरुपचयस्य स्वीकारे विभावादीनामल्पत्वे मध्यत्वे बहुत्वे चोपचयेऽपि अल्पत्वं मध्यत्वं बहुत्वं च स्यात्। ततो विभावादितारतम्येन उपचये भेदेषु सत्सस्वेकस्यापि रसस्य भेदानामानन्त्यं स्यादिति चतुर्थो दोषः। मुनिना स्मितादिभिः प्रकारैर्हासस्य षट् प्रकारं उक्ताः। पूर्वरीत्या हासस्योपचये भेदान्तराणामनन्तानां प्राप्ती रसस्य प्रतिपादितं षोढात्वं विरुद्ध स्यादिति पञ्चमो दोषः। विप्रलम्भ शृङ्गारे दश कामदशा दर्शनश्रवणादयो मन्यन्ते। आसामपि प्रत्येक भेदेन दर्शनादिषु तारतम्येन च विप्रलम्भस्य दशानामनिष्टानां भेदानां स्वीकारस्यापत्तिर्भवेदिति षष्ठो दोषः। शोकादीनां विभावादिभिर्नियमेनोपचयो न दृश्यते।शोको हि प्रथमं पुत्रादिमरणे ज्ञाते तीव्रो भवति, कालक्रमेण तस्मिन् विभावे सत्यपि नोपचीयते, अपितु मन्दमन्दतरी भवति। एवं क्रोधोत्साहादीनामपि पूर्व तीव्रता पश्चाच्च सत्यपि कारणे हासो दृश्यते। एवमेव रत्यादिविषयेऽपि वक्तुं शक्यते। एवं विभावादीनां रत्याद्युपचयं प्रति कारणत्वं व्यभिचरतीति सप्तमो दोषः। अतो विभावादिभिरुपचितः स्थायी रस इति स्वीकर्तुं न शक्यते।

लोल्लटस्य मतं निराकरोति।

**श्रीशङ्कुकस्य अनुमितिवादः**

श्रीशङ्कुकस्य अनुमितिवादः

श्रीशङ्कको भट्टलोल्लटस्य व्याख्याने पूर्व दोषं प्रदर्शयति, ततश्च स्वमतेन रससूत्रं व्याख्याति, रसस्य स्वरूपं निर्धारयति च । श्रीशङ्ककस्य व्याख्यानम् अनुमितिवादस्य प्रवर्तक वर्तते। व्याख्याने रससूत्रे विद्यमानस्य संयोगशब्दस्य गम्यगमकभावः (अनुमेयानुमापकभावः), निष्पत्तिपदस्यानुमितिः, विभावादिपदस्य च लोल्लटवदेव कारणादिरर्थः, किन्तु मिलितानां विभावादीनाम् अनुमिती धूमादेरिव साधनत्वं भवति।

श्रीशङ्ककेन रससूत्रस्य व्याख्यानम् विभावानाम् रत्यादिस्थायिभावस्य कारणीभूतानां नायिकादीनाम्, अनुभावानाम्-कटाक्षादीनां कार्याणाम्, व्यभिचारिणाम् लज्जादीनां सहकारिणां च संयोगात् साध्यसाधनभावरूपात् सम्बन्धात् रसनिष्पत्तिः- रसस्य रामाद्यनुकार्यगतस्य रत्यादिस्थायिभावस्यानुमितिर्भवतीति सूत्रार्थो भवति। सहृदया रामभूमिकायां वर्तमानं नटं रामं मन्यन्ते। नटस्य रामरूपेण ज्ञानमिदं सम्यग् ज्ञानं नास्ति, यत इदं 'अयं न रामः, अपितु नटः' इति जायमानेनौत्तरकालिकेन ज्ञानेन बाध्यते। नापि 'अयं रामः' इति भ्रमरूपं मिथ्याज्ञानं भवतीत्यपि वक्तुं शक्यते, यतः 'नायं रामः अपितु नटः' इत्यौत्तरकालिकेन सम्यग्ज्ञानेन बाधे सति रामत्वेन ज्ञातुं न शक्यते, यदि बाधो न मन्यते तदा तस्य मिथ्यात्वमेव न स्यात्। एवमेव 'रामः स्याद् वा नटो वा' इति संशयात्मकमपि ज्ञानं न भवति, संशये सति सहृदयानां प्रवृत्तिर्हि नाट्ये न स्यात्, नापि च रामत्वं पूर्व साक्षात् कृतमिति नटे रामत्वस्य संशयो भवेत्। एवं 'रामसदृशोऽयम्' इति सादृश्यज्ञानमपि न संभवति, यतः सहृदयेन रामो न क्वचिदनुभूतः, अनुभूतचरस्यैव गवादेः सादृश्यस्य ज्ञानं गवयादौ भवति। किञ्च सहृदयानां सादृश्यप्रतीतिनानुभवेन सिद्धा। तर्हि

अनुभूतचरस्यैव गवादेः सादृश्यस्य ज्ञानं गवयादौ भवति

'रामोऽयम्' इति ज्ञानं कीदृशमिति प्रश्ने सत्युत्तरं भवति यदेतज्ज्ञानं सम्यङ् मिथ्या संशय-सादृश्यज्ञानेभ्यो विलक्षणं वर्तते, यथा चित्रिते तुरगे 'तुरगोऽयम्' इति ज्ञानं सम्यगादिज्ञानेभ्यो विलक्षणं ज्ञानमनुभवसिद्ध भवति। एवमेव चित्रतुरगादिज्ञानेन नटः 'राम' इति ज्ञायते।

विरुद्धा या 'अयं रामः, अयं न रामः' इत्याकारा या विरुद्धकोट्यवगाहिनी संशयात्मिका बुद्धिः ज्ञानं वर्तते, तस्या असंभेदेन असंबन्धेन अविवेचितसंप्लवः अविवेचितः न निश्चितः संप्लवः अभावो यस्य स चित्रतुरगवद् नटे भवन् 'रामः' इत्यनुभवः कयाचिदपि युक्त्या प्रमाणेन न निषेद्धं शक्यत इति 'विरुद्धबुद्धिसंभेद 'इत्यादेरर्थो वर्तते। एवं सिद्धं यन्त्रटः चित्रिततुरगवद् 'रामः' इति सहृदयैरवगम्यते। एवं तादृशेनानुभवेन रामत्वेन निश्चितो नटः काव्यानुसंधानस्य बलेन, अनुभावान् शिक्षाबलेन, व्यभिचारिणश्च कृत्रिमस्य स्वानुभावस्याऽर्जनस्य बलेन रङ्गे प्रकाशयति। यद्यपि नटेन प्रकाशिता विभावाद्य एते भवन्ति तथापि सहृदयैः कृत्रिमत्वेन न गृह्यन्ते। एवं नटेन प्रकाशितैर्विभावादिपदवाच्यैः कारणादिभिः साधनै रामत्वेन गृहीते रामानुकर्तरि नटेऽसन्नपि सहृदयैरनुमीयमानो रत्यादी स्थायी भावः शृङ्गारादिको रस उच्यते। नटेऽनूमीयमानो रत्यादिस्थायी न वास्तविकः, अपितु रामादिरत्याद्यनुकरणरूपः स । एवमनुक्रियमाणः स्थायी वास्तवस्थायिभिन्नत्वेन भिन्नेन रसनाम्ना व्यपदिश्यते। उक्तमभिनवभारत्याम् 'लिङ्गबलतः प्रतीयमानः स्थायी भावो मुख्यरामादिगतस्थाय्यनुकरणरूपः। अनुकरणरूपत्वादेव च नामान्तरेण व्यपदिष्टो रसः' इति। एवं कृत्रिमत्वेन कारणादयोऽपि विभावादिरूपेण नामान्तरेण व्यपदिश्यते।

अनुकरणरूपत्वादेव च नामान्तरेण व्यपदिष्टो रसः

**श्रीशङ्कुकस्य अनुमितिवादस्य निराकरणम्**

अभिनवगुप्तः कथयति यत् तस्योपाध्यायाः प्रतिहारेन्दुराजा भट्टनायकस्य व्याख्यानं तत्त्वशून्यं मन्यन्ते। अनुकरणरूपो रस इति यदुच्यते तत् कस्याभिप्रायेण वर्तते इति वक्तुं न शक्यते। किं रसस्यानुकरणरूपता भरतमुनेरभिप्रायेण,

सामाजिकस्याभिप्रायेण विविधव्याख्यात्रभिप्रायेण वेति शङ्कुकेन वक्तव्यम्। तत्र भरतो रसमनुकरणरूपं मनुत इति न वक्तुं शक्यते। अनुकरणं हि तस्य भवति यः पदार्थः पूर्व केनचित् प्रमाणेन ज्ञातो भवति, यथा पूर्व क्वचिद् दृष्टस्य सुरापानस्यानुकरणं पयः पिवता केनचित् 'सुरां पिबामि' इति कर्तुं शक्यते। नटेनान्येन केनचिद्वा रामादीनां रत्यादिः केनचित् प्रमाणेन नोपलब्धः। ततो नटेन रामादे रतेरनुकरणं कथं कर्तुं शक्यते? किञ्च सामाजिको नटगतं रोमाञ्चादि रत्यादि चानुकरणत्वेन न जानाति। 'अयं रामादिरतिमनुकरोति' इति कस्यचिदपि सामाजिकस्यानुभवो न वर्तते। इदमपि वक्तुं न शक्यते यत् कारणकार्यादिभिः प्रतिपन्ना नटस्यैव स्थायिचित्तवृत्ती रस उच्यते, यतो लौकिकी सा सत्यभूतैव वर्तते, न त्वनुकरणरूपा। ततश्च रसस्यानुकरणरूपत्वस्य कथने स्ववचनविरोधो भवति । किञ्चानुकार्ये रामादौ सत्यभूता अपि नटे कारणादिरूपा विभावादयोऽसत्यभूतत्वेन कृत्रिमा भवन्तीति यदुच्यते तदपि समीचीनं नास्ति, यतस्ते सामाजिकैः कृत्रिमत्वेन न गृह्यन्ते । कृत्रिमत्वेन गहणे सति रत्यादेरवगतिर्न संभवति। इदमपि वक्तुं न शक्यते यद् यथा धूमाकारस्य नीहारस्य ज्ञानेन पर्वतादावसतोऽप्यग्नेरवभासो भवति तथा नायिकाकटाक्षादिकारणाद्याकारस्य विभावादेर्ज्ञानिन नटेऽसतोऽपि रत्यादेरवगतिर्भवति, एवम् अरतिमानपि अक्रुद्धोऽपि च नटो रतिमानिव क्रुद्ध इव च प्रतिभासते, यतः सामाजिकानां नटे रत्यादिना तत्कार्यकटाक्षादिना वा सादृश्यस्य प्रतीतिरनुभवसिद्धा न वर्तते। सामाजिकानां भावशून्या प्रतीतिर्नटे न भवति । किञ्च सादृश्यप्रतीतिः स्वयमेव निषिद्धा। अतो नटे रत्याद्यनुकरणस्य प्रतिभासो भवतीति वचनं तत्त्वशून्यं वर्तते। नटे 'रामोऽयम्' इति या चित्रतुरगादिवत् सामाजिकानां प्रतीतिर्मन्यते सा यदि बाधकाभावेन न बाध्यते तदा

अनुमितिवादस्य निराकरणम्

सम्यग्ज्ञानरूपैव भवति, यद्युत्तरकालं बाधकोदये बाध्यते तदा सा मिथ्याज्ञानरूपैव भवति । अतस्तस्यां प्रतीतौ सम्यङ्मिथ्याज्ञानाभ्यां वैलक्षण्यं यदुक्तं तन्त्र समीचीनम्। नर्तकान्तरेऽपि 'रामोऽयम्' इति ज्ञानं भवति। अनेन रामत्वरूपस्य

सामान्यस्य अनुवृत्तिप्रत्ययहेतुत्वेन सिद्धिर्भवति । ततश्च रामत्वेन सता 'रामोऽयम्' इति ज्ञाने मिथ्यात्वं कथं स्यात् ?

किञ्च नटेन यद् विभावानाम् अनुसंधानमुक्तं तदपि न समीचीनम्, यतः 'ममेयं सीता' इत्याकारा प्रतीतिर्नटे न भवति। यदि सामाजिकान् प्रति नटेन 'ममेयं सीता' इति ज्ञापनमेव विभावानुसंधानमुच्यते तदा 'ममेय रतिः' इति स्थायिनोऽपि ज्ञापनस्य संभवेन काव्यात् स्थायिनोऽनुसंधानस्य निषेधो विफलो भवति। ततः शङ्ककेन 'स्थायी काव्यबलादपि नानुसंधेयः' इति न वक्तव्यम्। तथा स्थायिनोऽपि ह्यनुसंधानं संभवति। किञ्च सामाजिकानां नटे 'अस्येयं सीता, अयं सीताविषयकरतिमान्' इति प्रतीतिर्न भवति । तेन सामाजिकाभिप्रायेण रसस्य स्थाय्यनुकरणरूपता न संभवति। अनुकरणं कथमपि न संभवति। येन नटेन पूर्वं रामस्तस्य चित्तवृत्तिर्वा नोपलब्धा तेन 'रामं तस्य चित्तवृत्तिं वाऽनुकरोमि' इति सदृशकरणरूपम् अनुकरणं कर्तुं न शक्यते। यावत् सादृश्यस्य प्रतियोगि अनुकरणीयमुपमानं न ज्ञायते तावदनुकरणं न शक्यते कर्तुम् । तत्सदृशकरणमेवानुकरणं कथ्यते। यदि अनु-पश्चात् करणम् अनुकरणपदस्यार्थो मन्यते तदा लोकेऽपि सर्वत्राऽनुकरणत्वस्यातिप्रसङ्गो भवेत्। केनचित् सुरा पीता, ततोऽपरेण केनचित् सुरा पीता, तदाऽपरस्यापि सुरापानमपि अनुकरणं कथ्येत, किन्तु न कथ्यते। तेन सदृशकरणमेवानुकरणपदार्थ इति मन्तव्यम्। ततश्चाज्ञातरामादिना नटेन रामादेरनुकरणं कर्तुं न शक्यते। 'अहम् उत्तमप्रकृतेः शोकमनुभावं चानुकरोमि' इत्यत्र प्रश्नो भवति यत् कस्योत्तमप्रकृतेरिति? तत्र 'यस्य कस्यचिद्' इत्युत्तरं न संगच्छते, यतो यस्येति पदेन सामान्यार्थः सूच्यते सामान्येऽनुकर्ता नटोऽपि प्रविष्ट एव भवति, 'निर्विशेषं न सामान्यम्' इति नियमेन सामान्यविशेषयोरभेद एव भवतीति भेदाभावेन अनुकार्यानुकर्तृभावोऽनुकरणं वा न सिद्धयति। यावत् पूर्वं कश्चिद् विशेषो नोपलभ्यते तावत् तस्यानुकरणं न संभवति।

तत्सदृशकरणमेवानु करणं कथ्यते

शिक्षावशाद् विभावस्य स्मरणम्, हृदयसंवादाद् रत्यादिचित्तवृत्तिसाधारण्येन अनुभावानां प्रदर्शनम्, उचितकाक्वादियोजनया काव्यस्य पठनं चेत्येतावदेव नटो जानाति। एतावदेव ज्ञानम् अनुकारं न बोधयति। नटस्यैतज्ज्ञानं सामाजिकेरनुकरणत्वंन न ज्ञायते। नटेन रमणीयर्वशाद्यनुकरणमिव रामचेष्टितस्यानुकरणं नास्ति। शङ्ककेन यद् विभावादीनां लिङ्गत्वं स्वीकृतं तद् मुनिवचनेन विरुद्धयते। अनुमितौ हि व्याप्तिज्ञानाद्यनुसरणे रसप्रतीतौ विलम्बो भवति, व्याप्तिज्ञानादौ क्रमो लक्ष्यते च । किन्तु रत्यास्वादे क्रमो न लक्ष्यते। अत एव मुनिना ध्रुवा-गान-ताल-लास्यादीनां निरूपणं कृतम्। ध्रुवागानादीनां प्रयोगेण क्रमज्ञानादयो विघ्ना अपसार्यन्ते।

भावानुकरणं रसः

यच्च नटस्य रामत्वेन ग्रहणे चित्रतुरगन्यायोऽनुसृतः सोऽपि प्रकृते न समीचीनः। सिन्दूरहरितालादीनां वर्णकानां भित्तिफलकादौ सॉनवेशविशेषो हि चित्रमुच्यते । तत्र सिन्दूरादिभिः वास्तवो गोतुरगादिः तथा न व्यज्यते यथा प्रदीपादिभिर्वास्तवः स व्यज्यते, किन्तु सिन्दूरादिभिः तत्सदृशस्य समूहविशेषस्य व्यावृत्तिः क्रियते। गोतुरगाद्यवयवसदृशेन संत्रिवेशविशेषेण अवस्थिताः सिन्दूरादयो 'गवादिसृशोऽयम्' इति सादृश्यज्ञानस्यैव विषया भवन्ति। एवं प्रकृते नटो 'अयं रामसदृशः' इति रामसादृश्यस्य प्रतीतेर्विषयो न भवति। सादृश्यज्ञानं स्वयमेव श्रीशङ्ककेन निषिद्धम्। सिन्दूरादिवद् विभावादिसमूहो 'रतिसदृश' इति प्रतीतेर्विषयो न भवति। एवं न मुनेरभिप्रायेण, न नटाभिप्रायेण, नापि च सत्यविवेचकस्य व्याख्यातुरभिप्रायेण 'भावानुकरणं रसः' इति सिद्धयति । अतः शङ्कुकस्य व्याख्यानं न समीचीनम्।

## Summarised Overview

भरतमुनेः "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" सूत्रस्य व्याख्या तट्टीकाकारैः कृता।अस्मिन् एकके भट्टलोल्लटस्य उत्पत्तिवादः, श्रीशङ्कुकस्य अनुमितिवादः च विस्तरेण प्रतिपादितः।

## Assignments

1.लोल्लटस्य उत्पत्तिवादं विशदयत।
2. लोल्लटस्य उत्पत्तिवादस्य खण्डनं कुरुत।
3.श्रीशङ्कुकस्य अनुमितिवादं निरूपयत।
4. श्रीशङ्कुकस्य अनुमितिवादस्य खण्डनं च कुरुत।

## Suggested Readings


1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

# References

1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice, Motilal Banarasidas Publishers, Delhi.1924

SGOU

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# भट्टनायकस्य भुक्तिवादः खण्डनं च

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

रसनिष्पत्तिविषयकं सर्वप्रथममुल्लेखं भरतमुनिना नाट्यशास्त्रे कृतम् । तदेव सर्वरससिद्धान्तानामाधारभित्तिः। भरतस्य रससूत्रस्य व्याख्यायामुत्तराचार्यैः स्वशक्त्याः प्रयोगं कृतम् । परिणामतः उत्पत्तिवादस्य अनुमितिवादस्य भुक्तिवादस्य अभिव्यक्तिवादस्य सिद्धान्तचतुष्टस्य विकासः जातये। "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति भरतस्य सूत्रम्। अत्र प्रयुक्तस्य निष्पत्तिशब्दस्य अर्थचतुष्टम् विद्यते- भट्टलोल्लटमतेन निष्पत्तिशब्दस्यार्थः उत्पत्तिः शंकुकमतेन अनुमितिः भट्टनायकमतेन भुक्तिः अभिनवगुप्तानुसारं अभिव्यक्तिश्च ।

भरतमुनेः "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" सूत्रस्य व्याख्या तट्टीकाकारैः कृता। एतेषु भट्टलोल्लटः शङ्कुकः भट्टनायकः अभिनवगुप्तश्च प्रमुखः व्याख्याकारः ।

## Keywords

भट्टनायकः, भुक्तिवादः, भोज्यभोजकभावः, भुक्तेः सिद्धये रसस्य प्रतीतिः, निराकरणम्

## Discussion

भट्टनायकस्य भुक्तिवादः

### भुक्तिवादः

संयोगशब्दस्य भोज्यभोजकभावः, निष्पत्तिशब्दस्य च भुक्तिः भवति। विभावादिभिः स्थायी भुज्यते। भुक्तेः सिद्धये भट्टनायकेन रसस्य प्रतीतिः, उत्पत्तिः, अभिव्यक्तिश्चैताः तिस्रः स्वपरगतत्वविकल्पाभ्यां निरस्यन्ते। यथा- रसस्य या प्रतीतिः सामाजिके 'अहं रतिम् अनुभवामि' इतिरूपेण सामाजिकात्मनि भवति सा स्वगता कथ्यते। एषा स्वीकर्तुं न शक्यते, यतः सीतादिः सामाजिकं प्रति विभावो न भवति। सीतादयो हि रामादौ रतिप्रतीतेः कारणानि भवन्ति। एवं सामाजिके सीतादिना सामाजिके स्वकान्ताया अपि स्मरणं नसंभवति। देवताप्रायाणां सीतादीनां साधारण्यं कारणं विना न संगच्छते । एवं हनुमदादिगतानां समुद्रलङ्घनादीनां सामजिकेन सम्बन्धस्याभावेनोत्साहस्य 'अहम् समुद्रलङ्ङ्घनोत्साहवान्' इति प्रतीतिर्न संभवति। सामाजिके रत्यादिमतो रामादेः स्मरणमपि न संभवति, यतो रामादयः सामाजिकेन पूर्व ज्ञाता न सन्ति, अतः संस्काराभावेन स्मरणं कथं भवेत्? शब्देनाऽनुमादिना वा सामाजिके जायमाना रामादे रत्यादेः प्रतीतिः नायकमिथुनस्य प्रत्यक्षेण जाता तद्रतिप्रतीतिरिव रसपदेन लौकिकत्वाद् वक्तुं न शक्यते। किञ्च नायकमिथुनप्रत्यक्षेण सामाजिके लज्जा-स्पृहा जुगुप्सादीनां चित्तवृत्तीनामुदयेन व्यग्रता विलोक्यते। अतः प्रमाणान्तरेण जन्यायायाः प्रतीतेगोचरे रत्यादौ सुखमयत्वाभावेन रसत्वं

आत्मगतत्वेन रसस्य प्रतीतिः, उत्पत्तिः, अभिव्यक्तिः वा न स्वीकर्तुं शक्यते।

स्वीकर्तुं न शक्यते किञ्च सामाजिके स्वगतत्वेन प्रतीतौ करुणाद् दुःखित्वास्याप्यापत्तिः स्यात्। एवं स्वगतत्वेनोत्पत्तिरपि न स्वीकर्तुं शक्यते, सीतादयो हि सामाजिकस्य रत्यादिं प्रति कारणानि न सन्ति, शाकोत्पत्तेः स्वीकारे पूर्ववदेव दुःखित्वं सामाजिके स्यात्। एवं मृत्तिकायां शक्तिरूपेण = सूक्ष्मरूपेण स्थितस्य घटस्य कुम्भकारादिव्यापारेण इन्द्रियगोचतारूपा व्यक्तिरिव विभावादिभिः सामाजिकात्मनि संस्काररूपेण वर्तमानस्य रत्यादे रसरूपेण व्यक्तिरपि न स्वीकर्तुं शक्यते, यतो रसस्येन्द्रियगोचरता स्यात्, प्रतीतिपक्षे निगदिता दोषा अत्रापि स्युः। रसस्योत्पत्तौ अभिव्यक्तौ वा स्वीकृतायां विषयार्जनस्य तारतम्येन रसेऽपि तारतम्यं स्यात्। विभावादीनामल्पत्वे वहुत्वे च क्रमेण रसस्योत्पत्तौ अभिव्यक्तावपि चाल्पत्वं बहुत्वं च स्यात्। रसोऽल्पो बहुर्वा भवेत्। यथा लोके कारणस्याल्पत्वे बहुत्वे च कार्यस्यासत्कार्यवादे उत्पत्तिः सत्कार्यवादेऽभिव्यक्तिश्चाल्पा बहुला च दृश्यते। तथा सति रसस्य सुखमयत्वमेव न सिद्ध्येत्। अल्पविभावादिना जन्यो व्यक्तो वा रसो बहुविभावेन जन्यस्य व्यक्तस्य वा रसस्यापेक्षया स्वल्परसे सामाजिके बहुरसस्य सामाजिकान्तरस्यापेक्षया दुःखं जनयेत्। एवमात्मगतत्वेन रसस्य प्रतीतिः, उत्पत्तिः, अभिव्यक्तिर्वा न स्वीकर्तुं शक्यते।

परगतत्वेनापि उत्पत्त्यादयः स्वीकर्तुं न शक्यन्ते। सामाजिकात् परः भिन्नो यो नटादिर्भवति तद्गतत्वेन रसस्य प्रतीती, उत्पत्ती व्यक्तौ वा रसे सामाजिकात्मनः सम्बन्धस्याभावेन रसनीयता आनन्दमयता न स्यात्, आत्मसम्बन्धेनैव हि सर्वमानन्दमयं भवति, प्रत्युत प्रत्युक्षेण प्रतीतं रत्यादि यथा सामाजिके ब्रीडाऽऽतङ्कादि जनयति तथाऽत्रापि स्यात्, किञ्च सीतादीनां परं नटादिं प्रति विभावत्वाभावेन परस्मिन् नटादी रसस्य प्रतीतिरुत्पत्तिरभिव्यक्तिर्वा न संभवति। एवं स्वगतत्वेन प्रतीत्यादी ये दोषास्ते परगतत्वेनापि प्रतीत्यादावपि प्राप्नुवन्ति। नटस्यापि पूर्ववदेव सुखदुःखित्वापत्तिः प्राप्नोति। 'मया रसः प्रतीयते, मयि रस उत्पद्यते, अभिव्यज्यते' इति नटादिनानुभवति। एवं सहृदयगतत्वेन नटादिगतत्वेन च यदि

रसस्य प्रतीतिरुत्पत्तिरभिव्यक्तिर्वा न मन्यते तदा रसः कथं कुत्र च भवत्यनुभूयते वेति वक्तव्यमेव। यतां विभावादिभिः रसस्य निष्पत्तिर्मुनिनाऽभिहिता। अतो भट्टनायको रसस्य भोगमेवं साधयति-

काव्ये प्रयुक्ताः सीतादयः शब्दा अभिधाव्यापारेण सीतात्वादिधर्मेण विशिष्टां एष सीताद्यामेव बोधयन्ति। काव्ये दोषाभाव-गुणालङ्कारयोगेन नाट्ये च चतुर्विधस्याभिनयस्य संबन्धेन चाभिधातो द्वितीयो व्यापारो भवति, यस्य नाम साधारणीकरणं भावकत्वं च वर्तते। एतेन सीतादयः साधारणकान्तात्वादिधर्मस्य पुरस्कारेणोपस्थाप्यन्ते। सामाजिकैरेता सीतादयः साधारणीकरणस्य प्रभावेण साधारणकान्तादिरूपेण गृह्यन्ते। तेन सीतादिविभावस्य सामाजिकरत्यादिना सम्बन्धे कश्चन बाधो न भवति। साधारणस्य साधारण्येन ज्ञातस्य सम्बन्धो हि सर्वैरेव भवति। यथा साधारणानि नगरोद्यानानि सर्वैरेव भुज्यन्ते । भावकत्वव्यापारस्य योगेन विभावा अनुभावा व्यभिचारिणः स्थायिनश्च साधारण्येनैव स्फुरन्ति। एवं काव्यस्य प्रथमोंऽशोऽभिधा द्वितीयश्च भावकत्वम्-साधारणीकरणं वर्तते। सर्वे शब्दा अर्था अलङ्काराश्चाभिधाया एव विषया भवन्ति, रत्यादयः सर्वे भावास्तु भावकत्वस्य गोचरा भवन्ति। अनेन भावकत्त्वव्यापारेण रसास्वादे ये विभावादिगता मोहरूपा विशेषा धर्मास्तान् अपसारयति । अत एष घनमोहस्यारिरुक्तः । वस्तुत दोषभाव-गुणालङ्कारयोगरूपः चतुर्विधाभिनयरूपश्चापि वक्तुं शक्यते। दोषाभावादेरेवैष महिमा यल्लोकेऽसाधारणा अपि पदार्थाः काव्येन साधारण्येन बोध्यन्त इत्यग्रिमे पाठे प्रतिपादयिष्यते। भावकत्वानन्तरं भोजकत्वनामको भोगापरपर्यायः तृतीयो व्यापार उदेति। अस्य विषयः सामाजिको भवति। अयं सहृदयगते रजस्तमसी अभिभूय सत्त्वगुणं वर्धयति । रजस्तमसोरीषद् वेधो भवति। सामाजिके रजस्तमसोः ईषीदनुवेधेन द्रुति-विस्तार-दीप्तिरूपः, सत्त्वोद्रेकेण प्रकाशमय्या आनन्दमय्याश्च संविदो विषयान्तरपरिहारेण स्वरूपे विश्रान्तिरूपश्च व्यापारो भोजकत्वं भोगो वा व्यापारो वर्तते। अयं परब्रह्मास्वादतुल्यो भवति, न तु परब्रह्मास्वादरूप एव, यतो परब्रह्मास्वादे परब्रह्ममात्रमेव भासते

साधारणस्य साधारण्येन ज्ञातस्य सम्बन्धो हि सर्वैरेव भवति।

गुणानामीषदपि स्पर्शो न भवति च, किन्तु अत्र सत्त्वादिगुणाऽनुवेधो भवति। तदेवं भट्टनायकमते भावत्वव्यापारेण भाव्यमानः साधारण्येन बोध्यमानः अनुभवस्मृत्यनुमित्यादिविलक्षणेन तादृशेन भोजकत्वव्यापारेण भुज्यमानः साक्षात्क्रियमाणः साधरणो रत्यादी रस उच्यते। उक्तमभिनवभारत्याम्-

'तस्मात् काव्ये दोषाभाव-गुणालङ्कारमयत्वलक्षणेन नाट्ये चतुर्विधाभिनयरूपेण निबिडनिजमोहसंकटकाऽरिणा विभावादिसाधारणीकरणात्मनाऽभिधातो द्वितीयेनांशेन भावकत्वव्यापारेण भाव्यमानो रसोऽनुभवस्मृत्यादिविलक्षणेन रजस्तमोऽनुवेधवैचित्र्यबलाद् दुति-विस्तार-विकासलक्षणेन सत्त्वोदेकप्रकाशानन्दमयसंविद्विश्रान्तिलक्षणेन परब्रह्मास्वादसविधेन भोगेन परं भुज्यते ।

**अभिधा भावना चान्या तद्भोगीकृत्तिरेव च।**
**अभिधाधामतां याते शब्दार्थालङ्कृती ततः ॥**
**भावनाभाव्य एषोऽपि शृङ्गारादिगणो हि यत्।**
**तद्भोगीकृत्तिरूपेण व्याप्यते सिद्धिमान् नरः ।।'** इति।

अत्र विभावादिभिरुपचितोऽनुकार्यगतः स्थायिभावो रस उच्यते, स च रामादिरूपस्यानुसंधातरि नटेऽपि प्रतीयते। एवं नटे रस आरोपविषयः। रत्यादिस्थायिभावानां क्रमेण ह्रासादेरपि दर्शनेन तस्य मतं न समीचीनम्। अतः शङ्कुको वदति यच्चित्रतुरगादिन्यायेन रामत्वादिना गृहीते नटे कृत्रिमेणापि कृत्रिमतयाऽगृहीतेन विभावादिना लिङ्गेन (साधनेन) सामाजिकैरुनमीयमानः सीतादिविषयोऽनुक्रियमाणो रत्यादी रस उच्यते। अत्रापि नैके दोषाः प्रदर्शिता नटेन पूर्वम् अज्ञातस्य रामादे रत्यादेरनुकारणस्याऽसंभवः प्रदर्शितश्च। रसस्यानुकरणरूपता निराकृता। सांख्यानुसारिणा केनचनाचार्येण अनुभावविभावाभ्यां संस्कृतेन विभावेनोत्पद्यमानः सुखदुःखरूपो रतिशोकादी रस उक्तः। भरतमुनिना रसस्यानन्दमयत्वस्यैव स्वीकारेण सांख्यावादिनोऽपि मतं निरस्तम्। ततो भट्टनायकेन स्वगतत्वेन परगतत्वेन च रसस्य प्रतीतिः, असत्कार्यवादपक्षे उत्पत्तिः, सत्कार्यवादपक्षेऽभिव्यक्तिश्च विविधदोषप्रर्शनेन खण्डिता,

अभिधया विशेषधर्मपुरस्कारेणोपस्थापितानां रामादिपदार्थानां भावकत्वव्यापारेण साधारण्ये सति साधारणीकृतः सविदः स्वरूपे विश्रान्तिरूपेण भोजकत्यव्यापारेण भुज्यमानो रत्यादिभावो रस उक्तः, शब्दार्थालङ्खतिविषयाऽभिधा, भावादिविषयं भावकत्वम्, सहृदयविषयं भोजकत्वं चेति त्रयो व्यापाराः स्वीकृताश्च।

## Summarised Overview

भरतमुनेः "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" सूत्रस्य व्याख्या तट्टीकाकारैः कृता।अस्मिन् एकके भट्टनायकस्य भुक्तिवादः विस्तरेण निरूपितः।तदनन्तरं तस्य निरासः च प्रतिपादितः।

## Assignments

1.भट्टनायकस्य भुक्तिवादं विशदयत।
2. भट्टनायकस्य भुक्तिवादं निरस्यत।
3.भट्टनायकस्य भुक्तिवादस्य प्राधान्यं विशदयत।

## Suggested Readings

1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

## References

1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice, Motilal Banarasidas Publishers, Delhi.1924

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# अभिनवगुप्तस्य अभिव्यक्तिवादः

## Learning Outcomes

- भारतीयकाव्यशास्त्रस्य सामान्यबोधः।
- संस्कृतनाट्यशास्त्रस्य सामान्यावबोधः।
- भरतस्य अन्येषां नाट्यशास्त्रकाराणां च परिचयः।
- नाट्यशास्त्रस्य सविशेषज्ञानम्।

## Background

रसनिष्पत्तिविषयकं सर्वप्रथममुल्लेखं भरतमुनिना नाट्यशास्त्रे कृतम् । तदेव सर्वरससिद्धान्तानामाधारभित्तिः। भरतस्य रससूत्रस्य व्याख्यायामुत्तराचार्यैः स्वशक्त्याः प्रयोगं कृतम् । परिणामतः उत्पत्तिवादस्य अनुमितिवादस्य भुक्तिवादस्य अभिव्यक्तिवादस्य सिद्धान्तचतुष्टस्य विकासः जातये। "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति भरतस्य सूत्रम्। अत्र प्रयुक्तस्य निष्पत्तिशब्दस्य अर्थचतुष्टम् विद्यते- भट्टलोल्लटमतेन निष्पत्तिशब्दस्यार्थः उत्पत्तिः शंकुकमतेन अनुमितिः भट्टनायकमतेन भुक्तिः अभिनवगुप्तानुसारं अभिव्यक्तिश्च ।

भरतमुनेः "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" सूत्रस्य व्याख्या तट्टीकाकारैः कृता। एतेषु भट्टलोल्लटः शङ्कुकः भट्टनायकः अभिनवगुप्तश्च प्रमुखः व्याख्याकारः ।

## Keywords

अभिनवगुप्तः, अभिव्यक्तिवादः, अभिव्यञ्जनावादं, सरसं व्यङ्ग्यं, निराकरणम्

## Discussion

आस्वाद्यमानत्वात् रसः

अभिनवगुप्तस्य अभिव्यक्तिवादः - अभिनवगुप्तो भट्टनायकाभिमतं भाव- कत्व-भोजकत्व-व्यापारद्वयं निषिध्य अभिव्यञ्जनावादं प्रतिष्ठापयति । स च 'रसनिष्पत्तिः' इत्यस्य रसाभिव्यक्तिः इत्यर्थं स्वीकुरुते। एतन्मतं च आचार्यभरतस्य मतेनापि संगच्छते । अभिनवगुप्तो भावकत्व-भोजकत्व-व्यापारद्वयम् अशास्त्रीयं मनुते। 'आस्वाद्यत्त्वाद् रसः' इति भोजकत्वं रसस्वभाव एव। 'काव्यार्थान् भावयन्ति इति भावाः', एवं भाव- कत्वमपि भावानां वैशिष्ट्यमेव। अतो भावकत्व-भोजकत्व-द्वयम् अग्राह्यम् ।

सरसं व्यङ्ग्यं मनुते। रसो व्यञ्जनया सहृदयं प्रभावयति। रसास्वादश्च सहृदयानामेव। अत्र संयोगशब्देन व्यङ्ग्य-व्यञ्जकसम्बन्धो गृह्यते। स्थायिभावो व्यङ्ग्यः, विभावादयश्च व्यञ्जकाः। व्यञ्जनाया विभावनव्यापारेण विभावानां स्थायिभावानां च साधारणीकरणं भवति। एवं रामाद्यनुकार्याणां भावा वैशिष्ट्यविरहिताः सन्तः सहृदयानां हृत्स्थ-वासनारूपभावान् उद्बोधयन्ति। तन्मतानुसारम् 'न ह्येतत् चित्तवृत्तिवासनाशून्यः कश्चित् प्राणी भवति'। वासनैषा सुप्तावस्थायां विद्यमाना अभिनयादिभिः काव्यार्थे प्रकाशिते जागर्ति। यथा मृद्गन्धो जलसेचतेन प्रादुर्भवति, तथैव वासनाया अपि उदयः ।

## Summarised Overview

भरतमुनेः "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" सूत्रस्य व्याख्या तट्टीकाकारैः कृता।अभिनवगुप्तस्य अभिव्यक्तिवादःसविस्तरं अत्र प्रतिपादितः।

## Assignments

1. अभिनवगुप्तस्य अभिव्यक्तिवादं विशदयत।
2. रससूत्रव्याख्याने अभिनव गुप्तस्य अभिव्यक्तिवादस्य महत्त्वं प्रतिपादयत।
3. रससूत्रस्य चतुर्व्याख्यानानां प्रमुखानि कार्याणि विशदयत।

## Suggested Readings


1.Bharata Muni, Natyasastra, Edited by Manomohan Ghosh, Choukhamba Sanskrit Series Office, Varanasi,reprint 2017

2.Bharata Muni, Natyasastra,Part 1 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

3.Bharata Muni, Natyasastra,Part 2 Translation by K.P Narayana Pisharody,Kerala Sahithya Academi, Trissur, 1971

4.Dhananjaya.Dasarupaka. Chapter III, Chowkhambha Sanskrit Series, Varanasi.2014

# References


1.T.K. Ramachandra Iyer.A short History of Sanskrit Literature, R.S. Vadyar &Sons, Kalpathy, Palakad.2018

2.Dr. R. Makkad .The types of Sanskrit drama, , Charotar Book Stall, Gujarat.1936

3.A B Keith. The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice, Motilal Banarasidas Publishers, Delhi.1924


SGOU

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

SREENARAYANAGURU OPEN UNIVERSITY

**Reg.NO....................** **QP CODE..................**

**Name........................**

**SECOND SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE - 7 - M23SN07DC- नाट्यशास्त्रं सौन्दर्यशास्त्रं च**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या।

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION- A

(प्रथमो भागः)

**I.** एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत। **(5 x 2=10)**

**(Answer any five Questions in a Paragraph)**

1. नवरसाः के ?
2. दशरूपकेषु नाटकं विशदयत।
3. ऋग्वेदाद् पाठ्यं जग्राह।आशयं विशदयत।
4. चतुर्विधाभिनयाः के?
5. हास्यरसस्य भेदाः के ?
6. नाट्यशास्त्रस्य प्रथमाध्याये प्रतिपादिताः विषयाः के ?
7. निरुक्तम् नाम किम् ?
8. भरतमुनिः कः ?

## SECTION –B
(द्वितीयो भागः)

II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत। (6 x5=30)
**(Answer any six Questions in a page)**

9. दृश्यं श्रव्यमिति काव्यम् – विशदयत।
10. भट्टलोल्लटस्य उत्पत्तिवादं निरूपयत।
11. प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
    नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्।। आशयं विशदयत।
12. नाट्यवेदोत्पत्तिं विशदयत।
13. नाट्यशास्त्रस्य कर्तृत्वं रचनाकालं च विचारयत।
14. भट्टनायकस्य भुक्तिवादस्य निराकरणं विशदयत।
15. नाट्यं दृष्ट्वा असुराणां भावविकारः कथमासीत् इति विशदीकुरुत।
16. धर्मीसंग्रहविभागं प्रति विचारयत।
17. वीररसस्वरूपम्।
18. अभिनवभारत्यानुसारं शान्तरसं स्थापयत।

## SECTION – C
(तृतीयो भागः)

III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत। (2x15=30)
**(Write an essay on any two of the following)**

19. दशरूपकाणि निरूपयत।
20. भरतमुनिना प्रोक्तं रससूत्रं विचारयत।
21. नाट्यसंग्रहस्य विभागान् संक्षिप्य लिखत।
22. हास्यस्य स्वरूपं विशदयत।

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg.NO**..................                                             **QP CODE**............................

**Name**......................

**SECOND SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE – 7 – M23SN07DC- नाट्यशास्त्रं सौन्दर्यशास्त्रं च**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours**                                                                    **Max Marks:70**

---

सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपिः उपयोक्तव्या।

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## Section- A

**(प्रथमो भागः)**

I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।                **(5 x 2=10)**

**(Answer any five Questions in a word or Sentence)**

1. नाट्यशास्त्रस्य षष्ठे अध्याये प्रधानतया किं विचार्यते ?
2. नाट्यशास्त्रानुसारं रसः कः?
3. संग्रहस्य लक्षणं किम् ?
4. बीभत्सरसस्वरूपं विशदयत।
5. दशरूपकेषु प्रहसनं किम् ?
6. चतुर्विधाभिनयाः के ?
7. अभिनवगुप्तस्य अभिनवभारती नाम ग्रन्थे प्रतिपादितः विषयः कः?
8. भट्टनायकस्य भुक्तिवादः कः?

## SECTION –B

**(द्वितीयो भागः)**

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions)**

9. करुणरसस्य स्वरूपं विशदयत।
10. शङ्कुकस्य अनुमितिवादं निरूपयत।
11. धर्मीसंग्रहविभागं प्रति विचारयत।
12. नाट्यशास्त्रस्य प्रथमपञ्चाध्यायेषु प्रतिपादितानि प्रमुखानि विषयाणि कानि ?
13. नाट्यशास्त्रस्य टीकाकारान् अधिकृत्य लिखत।
14. नाट्यशास्त्रे प्रतिपादितं नान्दीपाठं निरूपयत।
15. नाट्यवृत्तयः काः?
16. नाट्यशास्त्रस्य प्रारम्भः कथं इति विशदयत।
17. अद्भुतरसस्वरूपं निरूपयत।
18. अभिनवगुप्तस्य अभिव्यक्तिवादं प्रति विचारयत।

## SECTION – C

**(तृतीयो भागः)**

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**

**(Write an essay on any two of the following)**

19. नाट्यशास्त्रे प्रतिपादितान् विषयान् संक्षिप्य लिखत।
20. नाट्यशास्त्रानुसारं श्रृङ्गाररसस्वरूपं विशदयत।
21. नाट्यशास्त्रानुसारं शान्तरसस्य रसत्वं समर्थयत।
22. नाट्यगृहविशेषान् विस्तरेण प्रतिपादयत।

SGOU

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

नाट्यशास्त्रं सौन्दर्यशास्त्रं च

COURSE CODE: M23SN07DC

SGOU

YouTube

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-971228-3-5
9 788197 122835